॥ अथशांतिमयूखप्रारंभः॥

१ ॥श्रीगणेशाय नमः॥ ॥श्रीहरिर्जयति॥ ॥योलीलयासंतनुते त्रिविश्वं तत्यालयत्यात्मनिवि
श्वरूपे॥ लयं तयत्याशु च हूर्णरूपः शिवं ततोऽत्याशु रविर्नमामो १ महोमहत्समाराध्य समाकर्ण्य
गुरोर्गिरः समुद्धरतो नीलकंठाय कुर्वे शांतिकपौष्टिकं २ प्रतारकैराहृतमत्र किंचिन्मयानुनिर्म्
लनयातदुज्झितं॥ जनान्नि तानो नदि तेन काचिन्नरवपुष्पदीनापचितिनरीयतो॥ ३॥ अस्पष्टपो
पविशेषनिदानकैहिकमात्रानिष्टनिवर्त्तकं पापाप्रयोजकं वैधं कर्म शांतिकं॥ इत्यादिरदानादा
वतिप्रतिग्रं वारयितुं निदानकांतं॥ आमुष्मिकानिष्टनिवर्त्तकं तं वारयितुमैहिकेति॥ प्रायश्चित्त
वारयितुं मात्रपदं॥ प्रायश्चित्तत्वामुष्मिकानिष्टनिवर्त्तकमपि अतिचारप्रत्यतिचारादौ वारयि राम
तुं पापाप्रयोजकमिति॥ तयोः फलतो हिंसात्वेन तदनुष्ठाने प्रायश्चित्तोक्तेन पापप्रयोजकत्वात्॥ १
अनिष्टानिवर्त्तकत्वं च शांतिकस्य तन्निदानपापनाशरूपसामग्रीविघटकत्वेन पुष्टिफलकं वै

धकर्म पौष्टिकं॥ ॥तत्र परिभाषा॥ ॥मार्कंडेयपुराणे॥ ॥शिरःस्नातश्च कुर्वीत दैवं पित्र्यमथा
पिवा॥ प्राङ्मुखोदङ्मुखो वापि दैवमश्नु कर्म च कारयेत्॥ तत्रैव॥ देवार्चनादिकर्माणि तथा गुर्वभि
वंदनं॥ कुर्वीत सम्यगाचम्य प्रयतोपि सदा द्विजः॥ इति मनुः॥ प्राणानायम्य कुर्वीत सर्वकर्माणि
संयतः॥ मार्कंडेयः॥ संकल्प्य विधिवत्कुर्यात् स्नानदानव्रतादिषु॥ इत्यादि॥ सोमापक्षतिथीनां
च तिमित्रानां च सर्वशः॥ उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेदिति मासपक्षतिथ्यः प्रयोगा
धिकरणत्वताः सर्वेपि॥ यत्तु अनेकदिनसाध्ये कर्मणि अथाद्यदिने संकल्पकालीनां तिथिमधिक
रणत्वेनोल्लिख्य ज्योतिष्टोमेनाहं यक्ष्य इत्यादिसंकल्पवाक्यं प्रयुंजते याज्ञिकाः॥ यत्तु पदानाम
योयोगांगमाहर्त्तव्यां॥ यदपि केचित्तेन रूपेण प्रयोगांगतया विहितानामेव मासादीनामुल्लेख इति
तदपि न॥ मानाभावात् अविहितमासादिक आधानादौ मासपक्षतिथीनां ज्योतिष्टोमप्रकारकं

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

शूं·म
२

व्रतादौचमासपक्षयोरुच्छेदवात्तावप्रसंगाच्च ॥ अतोज्योतिष्टोमादावेकादश्यादिपूर्णिमांतान
मुच्छेदवः ॥ एवमन्यत्रापीतिदिक् ॥ अत्रचशूद्राणामप्यधिकारः ॥ श्रावयेच्चतुरोवर्णान्कृत्वा
ब्राह्मणमग्रतइत्यादिवाक्येषुश्रावणस्यवृत्त्यर्थतयारागप्राप्तत्वेनतद्विधौचा ॥ वैयर्थ्यापत्ते
र्णिजविवक्षयाश्रवणविधिनातेषांपुराणश्रवणाधिकारेणज्ञानसम्भावात् ॥ वैदिकमंत्राना
विकल्पंतद्वत्सुकर्मस्वधिकारइतिचेन्नशृणु ॥ धर्मेप्सवस्तुधर्मज्ञाःसतांधर्ममनुष्ठिताः ॥ मंत्रवर्ज्यं
नदुष्यंतिप्रशंसांप्राप्नुवंतिचेति ॥ मनुनामंत्रवर्जनात् ॥ यत्तुमेधातिथिर्मंत्रवर्जितेऽपवासादि
ष्वधिकारार्थमिदंनतुसमंत्रकेषुमंत्रपर्युदासार्थमिति ॥ तन्न ॥ अमंत्रकोपवासादिषुश्रवणवि राम
धिनैवाधिकारसिद्धावेतद्वाक्यानर्थक्यापत्तेः ॥ अतएवमोक्षधर्मेष्वपि ॥ मंत्रवर्जंनदुष्यंतिकुर्व २
णाःपौष्टिकींक्रियामिति ॥ अत्रैतद्वाक्यस्यपौराणत्वेनतन्मात्रमात्रोपस्थितपौराणक्रियोद्देशेन

मंत्रवर्जनविधौपौष्टिकीमित्युद्देश्यविशेषणत्वेनाविवक्षितं ॥ एवंचमनुवाक्यस्यैतस्यचैकैवश्रु
तिमूलत्वेनकल्प्यते ॥ गृह्यपरिशिष्टे ॥ आदौविनायकःपूज्यःअंतेतुकुलदेवता ॥ पुण्याहवाच
नविधिंवक्ष्यामोयथाविधि ॥ प्रयोक्तुःकर्मणामादावंतेचोदयसिद्धये ॥ कर्मप्रदीपे ॥ कर्मादिषु
तुसर्वत्रमातरःसगणाधिपाः ॥ पूजनीयाःप्रयत्नेनपूजिताःपूजयंतिताः ॥ प्रतिमासुचशुभ्रासुलिखि
त्वावापटादिषु ॥ अपिवाक्षतपुंजेषुनैवेद्यैश्चपृथग्विधैः ॥ कुड्यलग्नावसोर्धाराःसप्तवारंघृतेनतु
कारयेत्पंचधारावानातिनीचानचोच्छ्रिताः ॥ आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितः ॥ षड्भ्यःपि
तृभ्यस्तदनुश्राद्धदानमुपक्रमेदिति ॥ षड्भ्यइतिछंदोगकातीयपरंअन्येषांनवदैवत्यं ॥ अन्वष्टकासु
वृद्धौचगयायांचक्षयेऽहनि ॥ अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासहेतिवचनात् ॥ सर्वत्राचार्योयज
मानसमशाखीयएव ॥ अन्यथाचार्यस्ययजमानेशाखासमाश्रयेत् ॥ अप्रमाणमृषिंकृत्वासोऽधे

श्री·म·
३

मसिमजतीति॥ ऋत्विजस्तु भिन्नशाखीया अपि॥ सर्वेप्याचार्यब्रह्मर्त्विजो मधुपर्केण पूज्याः॥ ऋत्विजो
वृत्वा मधुपर्कमाहरेदित्याश्वलायनोक्तेः॥ संपूज्य मधुपर्केण ऋत्विजः कर्म कारयेदिति विश्वामित्रोक्ते
श्च॥ यस्तु ऋत्विग्यच्छाखीयं कर्म करोति तच्छाखोक्तेन प्रकारेण काण्डानुसमयेन मधुपर्कं कुर्वंति यायज्ञि
काः केचित्॥ परे यजमानशाखोक्तेन॥ यजमानेन स्वशाखीयाः ऋत्विजश्च स्वस्वशाखीयाः पदा
र्थाः अनेकेषु ऋत्विक्षु पदार्थानुसमयेनानुष्ठेया इत्युक्तं॥ ततश्चाश्वलायनजन्यज्ञानस्यांग
त्वादेकप्रयोगविधिपरिग्रहाच्च॥ ऋत्विग्भ्यो देयमुक्तं लिंगपुराणे॥ वस्त्रयुग्मं तथापूरं केयूरं क ३
र्णभूषणं॥ अंगुलीभूषणं चैव मणिबंधस्य भूषणं॥ कंठाभरणमुक्तानि प्रारंभे धर्मकर्मणः॥ पु
रोहिताय दत्वाथ ऋत्विग्भ्यश्चापि दापयेत्॥ [illegible]॥ आपः पूर्यंतेस्मिन्निति अप्पूरं जलपात्रं॥ मत्स्यपु
राणे॥ यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः॥ पश्चिमद्वारमाश्रित्य प्रविशेद्यागमंडपं॥ स

मंतश्च सिद्धार्थान्विकिरेद्रक्षोघ्नमंत्रतः॥ प्रतिष्ठासारे॥ सर्वतः पंचगव्येन प्रोक्षयेद्यागमंडपं॥ आ
पो हि ष्ठादिऋचैनैव ततः स्वस्त्ययनं जपेत्॥ तत्र हेमाद्रौ वास्तुपूजाप्युक्ता॥ स मंडपं प्रविश्याथ तोर
णादि प्रपूज्य च वास्तुयागं ततः कुर्यात्प्रासादे मंडपेथवा॥ वास्तुमंडलं च नैरृत्यां नैरृत्यां दिशि वा
स्त्वीशं ब्रह्मणाद्यांश्च समर्चयेदिति शारदोक्तेः॥ वास्तुहोमस्तु भित्रस्थंडिले कार्यः मुख्यायतने वा
तत्राप्यादौ पृथक्प्रयोगतया प्रधानसमं तंत्रतया वा॥ शारदातिलके तु होम एव नोक्तः॥ सर्वत्र शां
तिकपौष्टिकमहादानादिलौकिकाग्नौ कार्यं श्रौतस्मार्ताग्निप्राप्तौ मानाभावात्॥ यत्तु मनुः॥ वैवा
हिकेग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि॥ पंचयज्ञविधानं च पक्तिं चान्वाहिकीं गृही इति तन्न स्वगृह्यो
क्तपरं वैवाहिक इति च दायाद्यकालीनयोरप्युपलक्षकं॥ तत्सजातीयसंस्कारस्यैकसाधनतात्र
च्छेदकत्वात्॥ यदपि याज्ञवल्क्यः॥ स्मार्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही॥ दायकालाहृते वा

विश्रौतवैतानिकाग्निष्विति ॥ तत्रापि सामान्यं स्मार्त्तेयदं ग्राह्यं तदुपसंहरति ॥ एतेनाहवनीयादयोऽनि
हस्ता ॥ यदाहवनीये जुहोतीत्यादौ अश्वप्रतिग्रहेष्टौ वैदिकत्वसाम्येन वैदिकाश्वदानप्रतिग्रहो
पस्थितिवत् वैदिकहोमोपस्थितेश्च ॥ यद्यप्यत्र गार्ह्यस्मार्त्त एव श्रौतं वैतानिक एवेति नियमे स्मर
त्युक्तेऽपि कर्मणि श्रौतस्मार्त्तयोः प्राप्तिः संभाव्यते ॥ तथापि न साहवनीयावसथ्यत्वरूपेणाकिंतु लौ
कसाधारणज्वलनत्वेनैव ॥ अवैधाहुतिः प्रक्षेपे आहवनीयत्वादिविघातापत्तेश्च ॥ अत एव सर्वाधा
निनऔपासनाभावात् वैतानिकाप्राप्तेश्च ॥ तेन गार्ह्ये लौकिक एव कार्यं अमुमेव समर्थं स्मरत्यर्थसा
रकृदपि संजग्राह ॥ गार्ह्यमौपासने कुर्यात्सर्वाधानी तु लौकिके ॥ स्मार्त्तं च लौकिके कुर्याच्छ्रौतं वैतानि
काग्निष्विति ॥ यत्तु नारायणवृत्तौ ॥ सर्वाधानिनासीमंतोन्नयनादिगार्ह्यकर्मार्थं स्मार्त्ताग्निरुत्पाद्य
य इति ॥ तत्र मूलं बौधायनसूत्रे ॥ यदपि विज्ञानेश्वरो गृह्ययज्ञऔपासन उक्त्वे ॥ तत्राग्निमूलमन्वेष्यं ॥

MEMORIAL

कातीयपरं वा तत् ॥ तत्सूत्रे तथाम्नानात् ॥ अत एव स विनायकशांतौ लौकिकाग्निमेवावोचत् ॥ अतः
स्मरत्युक्तं ॥ लौकिके एवेति ॥ कृत्यरत्नाकरे ॥ भुक्तपात्रं तु कांस्यं स्यात्तेनाग्निं प्रणयेद्बुधः ॥ तस्याभावे श
रावेण नवेनाभिमुखं च तं ॥ गोभिलीये ॥ आहृत्य चैव होतव्यो यो यत्र विहितोऽनलः ॥ लक्षहोमे च वह्निः स्या
त्कोटिहोमे हुताशनः ॥ पूर्णाहुत्यां मृडो नाम शांतिके वरदः सदा ॥ अन्येषु संस्कारादिकर्मस्वग्नेर्ना
मविशेषाः प्रयोगरत्ने ॥ होमे विशेषो गोभिलीये ॥ न मुक्तकेशो जुहुयात्रानुपातितजानुकः ॥ नुत्राने
नैव हस्तेन अंगुष्ठाग्रेण पीडितं ॥ संहतांगुलिपाणिस्तु वाग्यतो जुहुयाद्धविरिति ॥ बहुकर्तृके होमे
प्रत्याहुतित्यागाशक्तेः होमारंभ एव देवताभ्यस्तुभ्यं तेनोद्दिष्टं सर्वाणि द्रव्याणि त्यजेदिति हेमाद्रि
दूयः ॥ इति परिभाषा ॥ अथ विनायकस्नपनं ॥ याज्ञवल्क्यः ॥ विनायकः कर्मविघ्नसिद्ध्यर्थं विनियो
जितः ॥ गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥ तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत ॥ स्व

भेव गाहतेत्यर्थं जलं मुंडांश्च पश्यति ॥ काषायवाससश्चैव क्रव्यादांश्चाधिरोहति ॥ अंत्यजैर्गर्दभैरुष्ट्रैः
सहैकत्रावतिष्ठति ॥ व्रजन्नपि तथात्मानं मन्यतेनुगतं परैः ॥ तेन विनायकेन उपसृष्ट उपद्रुतः ॥
स्वप्ने स्रोतसा पह्रियते तत्र मज्जति वा तत्त्ववगाहनमात्रं विवक्षितं तस्य श्रुतत्वसूचकत्वात् ॥ अंत्यजै
श्च उष्ट्रैः प्रत्यक्षेण न्याय्य ॥ विमना विफलारंभः संसीदत्यनिमित्ततः ॥ तेनोपसृष्टो लभते न राज्यं राजन
दनः ॥ कुमारी नैव च भर्तारं अपत्यं गर्भमंगना ॥ आचार्यत्वं श्रोत्रियश्च न शिष्यो ध्ययनं तथा ॥ वणिक्
लाभं च नाप्नोति कृषिं चापि कृषीवलः ॥ संसीदंति कारणं विना दीनमनस्को भवति ॥ एतदुपलक्षणं य राम
स्य यदिष्टं स चेद् दृष्टसामग्रीसत्वेन न प्राप्नोति तदा तदुपद्रुतो बोध्यः ॥ एतदुपद्रवपरिहारार्थं कर्मदि ५
स्नपनं तस्य कर्तव्यं पुण्येह्नि विधिपूर्वकं ॥ अत्र पुण्येह्नि इत्यविशेषेपि विशेषोऽपरार्के भविष्ये ॥ शुक्लप
क्षे चतुर्थ्यां तु वारेऽधिषणस्य च ॥ तिष्ये च वा रनक्षत्रे तस्यैव पुरस्तोन्नपति ॥ ॥ तत्रादौ देवतापू

जा ॥ ॥ तत्रैव ॥ व्योमकेशं तु संपूज्य पार्वतीं भीमजं तथा ॥ हस्तस्य पितरं केतुं श्चार्कमारं सितं तथा ॥ धि
षणं छेदपुत्रं च कोणं लक्ष्मं च भारत ॥ विधुंतुदं बाहुलेयं नंदकस्य च धारिणमिति ॥ व्योमकेशः शिवः ॥ भी
मजो गणेशः ॥ आरो भौमः ॥ सितः शुक्रः ॥ धिषणो गुरुः ॥ छेदपुत्रः बुधः ॥ कोणः शनैश्चरः ॥ लक्ष्मतद्वांश्च
द्रः ॥ बाहुलेयः स्कंदः ॥ नंदकधारी कृष्णः ॥ गौरसर्षपकल्केन साज्येनोत्सादितस्य च ॥ सर्वौषधैः सर्वगं
धैर्विलिप्तशिरसस्तथा ॥ भद्रासनोपविष्टस्य स्वस्ति वाच्या द्विजाः शुभाः ॥ गौरसर्षपपिष्टेन गोघृत
युक्तेनोत्सादितस्योद्वर्तितस्य ॥ ॥ सर्वौषधानि ॥ ॥ छंदोगपरिशिष्टे ॥ कुष्टं मांसी हरिद्रे द्वे सुराशैले
यचंदने ॥ वचाकर्पूरमुस्ताश्च सर्वौषध्यः प्रकीर्तिता ॥ सर्वगंधैश्चंदनकुंकुमागरुकस्तूरिकाजातीफला
दिभिः ॥ वेद्यां सितवस्त्रप्रच्छादितश्रीपर्णीपीठं भद्रासनं ॥ स्वस्तिवाच्याः स्वस्तिवाचनीयाः ॥ ब्राह्मणद्वारा
स्वस्तिवाचनं कारयेदित्यर्थः ॥ अश्वस्थानाद्गजस्थानाद्वल्मिकात्संगमाद्ध्रदात् ॥ रथिकारोच्च नां गोष

गुग्गुलुं चाप्सु निक्षिपेत् ॥ या आहृता एकवर्णैश्चतुर्भिः कलशैर्ह्रदात् ॥ चर्मण्यानडुहे रक्ते स्थाप्यं भद्रा
सनं ततः ॥ आनडुहं चर्म वेद्यां प्राग्ग्रीवमूर्ध्वलोमावस्थाप्यमिति विज्ञानेश्वरः ॥ या आपस्तेपि चत्वारो
कलशास्तद्भासनस्य पूर्वादिचतुर्दिक्षु स्थाप्या इति सांप्रदायिकाः ॥ पूर्वादिदिक्क्रमयादवस्थिताः कल
शोदकेनाभिषेकक्रमेण मंत्रानाह ॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतं ॥ तेन त्वामभिषिंचामि
पावमान्यः पुनंतु ते ॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः ॥ भगमिंद्रश्च वायुश्च भगं सप्तर्षयो
ददुः यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु सर्वदा ॥ सहस्रा
क्षं बहुशाक्तिकं ॥ पावमानीयस्त्वनंतरमापठतिशेषः ॥ भगं कल्याणं ॥ दौर्भाग्यमकल्याणं ॥ उदग्धि
जवस्थितेनाभिषेके पूर्वोक्तास्त्रय एव मंत्राः ॥ सर्वैश्चतुर्थमिति विज्ञानेश्वरोक्तलिंगात् ॥ किंच ॥ स्ना
तस्य सार्षपं तैलं स्रुवेणौदुंबरेण तु ॥ जुहुयान्मूर्धनि कुशान्सव्येन परिगृह्य च ॥ सव्यपाणिगृही

तकुशांतरे तैसार्षपं तैलं दुंबरेण निर्मितेन स्रुवेण यजमानमूर्धनि जुहुयात् ॥ आचार्यः ॥ मितश्च संमि
तश्चैव तथा शालकटंकटौ ॥ कूष्मांडो राजपुत्रश्चेत्यंते स्वाहासमन्वितैः ॥ नामभिर्बलिमंत्रैश्च नमस्कार
समन्वितैः ॥ नमस्वस्ति स्वाहेति चतुर्थ्यंतानि चूषट्विनायकनामानीति विज्ञानेश्वरः ॥ अपरार्कस्तु शा
लकटंकटइत्येकवचनांतं पपाठ ॥ तेन तन्मते पंचैवाहुतयो भवंति ॥ अत्र लौकिकेग्नौ स्थालीपाकविधिना चरुं
कृत्वा तेन एवाहुतिषट्कं हुत्वेंद्रादिदशलोकपालेभ्यस्तन्नाम्ना बलिं दद्यादिति मिताक्षरायां ॥ तत्र चरुशे
षेण इंद्रादिभ्यो बलिदानं वक्ष्यमाणं चिंत्यं ॥ अंते स्वाहासमन्वितैर्नामभिर्जुहुयात् ॥ नमस्कारसमन्वितैश्च मि
तादिभ्यो बलिं दद्यादिति वक्ष्यमाणेन संबध्यत इति युक्तं ॥ दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः ॥ कृता
कृतांस्तंडुलांश्च पललौदनमेव च ॥ मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु ॥ पुष्पं चित्रं सुगंधं च सुरां
च त्रिविधामपि ॥ मूलकं पूरिकापूपांस्तथैवोंडेरकस्रजः ॥ दध्यन्नं पायसं चैव गुडपिष्टं समोदकं ॥ एतान्सर्वा

त्स्मात्कृत्यत्स्मोदकत्वात् ततः शिवा॥ कृतान्कृतान्सक्तूदवकृतान्॥ पललौदनः॥ तिलपिष्टमिश्र ओदन इति मि
ताक्षरायां॥ अयं च मांसमिश्र ओदन इति तु युक्तं॥ पललं क्रव्यमामिषमिति कोशात्॥ आमान्नपक्वान्नं मां
समेतावदेव तु॥ पक्वमपक्वं च मांसमन्यदित्यर्थः॥ विविधाः सुराः॥ गौडी पैष्टी माध्वी च॥ मूलकं कंदाकारो
भ्यविशेषः इति मिताक्षरायां॥ स्वरूपं तु न ग्राह्यमिति तु युक्तं॥ उभयमपि ग्राह्यमिति मदनार्णवे॥ अपूपास्त्र
स्तिद्धपक्का गोधूमाविकारा इति विज्ञानेश्वरः॥ कुंडरकाः पिष्टविकारास्ते नानाविधास्ते प्रोताः स्रज इत्युच्य
ते॥ गुडपिष्टं गुडमिश्रं अपूपाख्यादि विष्ट॥ अत्र सुरामांसमब्राह्मणविषयं॥ ब्राह्मणेस्तु मांसस्सुरास्थाने सल
वणपायसं दुग्धं च ग्राह्यं॥ पायसं लवणोपेतं मांसस्थाने प्रकल्पयेत्॥ दुग्धं लवणसंमिश्रं सुरास्थाने प्रकल्प
येत्॥ इति स्मरणादिति मदनार्णवादिषु॥ विनायकांबिकागायत्रीभ्यां विनायकमंबिकां च नमस्कृत्य पूर्वोक्तं
द्रव्यजातं तयोरग्रत उपकृत्य तत् सर्वं शूर्पे निधाय चतुष्पथे शूर्पं संस्थाप्य बलिं दद्यादेतैर्मंत्रैः॥ बलिं गृह्णं

न्विमे देवा आदित्या वसवस्तथा॥ मरुतो ह्यश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः॥ असुरा यातुधानाश्च पिशाचा
मातरोरगाः॥ शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः॥ जंभकाः सिद्धगंधर्वाः नागा विद्याधरा नगाः॥ दिक्पा
ला लोकपालाश्च ये च विघ्नविनायकाः॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः॥ माविघ्नं मा च मे पापं मा सं
तु परिपंथिनः॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः॥ दद्यादित्यत्रापि देहलीदीपवदन्वेति॥ विनायक
स्य जननीमुपतिष्ठेत्ततोंबिकां॥ दूर्वासर्षपपुष्पाणां दत्वार्घपूर्णमंजलिं॥ अनंतरं विनायकमंबिकां च दूर्वा
सर्षपमंजलिमर्घं च दत्वोपतिष्ठेत्ततोंबिकां॥॥ उपस्थानमंत्रमाह॥ रूपं देहि यशो देहि भगं भगवति
देहि मे॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥ देहि मे भवतं गमित्यस्य विनायकमुपतिष्ठे
ति विज्ञानेश्वरः॥ अत्र मदनः वैनायकोपस्थानं कृत्वांबिकोपस्थानं कार्यमित्याह॥ किंच॥ ततः शुक्लांबर
धरः शुक्लमाल्यानुलेपनः॥ ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि॥ गुरोराचार्याय॥ अपि त्वाद्याद्द्विर॥

ग्रा॰ म॰
८

मपि॥ एवंविधः कर्म कुर्वतः फलमुक्तं॥ एवं विनायकं संपूज्य ग्रहांश्चैव विधानतः॥ कर्मणां फलमाप्नोति श्रि
यमाप्नोत्यनुत्तमां॥ अस्या कर्मांगत्वेन पौष्टिकत्वेन वर्णचतुष्टयस्याप्यत्राधिकारः॥ शूद्रस्य तु मंत्र
वर्जनात् प्रत्यक्षमंत्रवर्जनं दुष्यति कुर्वाणः पौष्टिकीं क्रियामिति मोक्षधर्मे श्रवणात्॥ मदार्णवोपिय
जमानस्य शूद्रश्चेदिति वदन् तस्याधिकारमङ्गीचक्रेति॥॥ इति विनायकशांतिः॥ अथ प्रयोगः॥ कर्त्ता
देशकालौ संकीर्त्य विनायकोपसर्गनिवृत्त्यर्थममुककर्मणो निर्विघ्नतासिध्यर्थं वा विनायकस्नपनं
करिष्य इति संकल्पयेत्॥ ततः पुण्याहवाचनादि नांदीश्राद्धांतं यथोक्तं कुर्यात्॥ अपरे पुण्याहवाचनं
नेच्छंति॥ अग्रे तस्य कर्तव्यत्वात्॥ अथाचार्यमृत्विक्चतुष्टयं वृणुयात्॥ यजमानः प्रतिमाक्षतपुंजे
षु वाग्निं वा पार्वतीं गणेशं वसुदेवं केतुं अर्कं सोमं शुक्रं गुरुं बुधं शनिं चंडं राहुं स्कंदं दक्षं चावाहयेत् पू
जयेत्॥ तत्राचार्यः पंचवर्णचूर्णैः पूर्वादिचतुर्दिक्षु चत्वारि मध्ये चैकमिति स्वस्तिकपंचकमा ग्राम ८

लिख्य मध्यस्थस्वस्तिकोपर्यानडुहं रक्तचर्म प्राचीनग्रीवमूर्ध्वलोम संस्थाप्य तस्योपरि श्रीपर्णीपीठं
संस्थाप्य सितेन वाससा संछादयेत्॥ एतद्भद्रासनमिति॥ चतुर्षु स्वस्तिकेषु पूर्वादिदिक्षु चत्वारोपि ऋत्वि
जः कलशान् स्थापयेयुः॥ आचार्यो वा॥ तत्रायं प्रकारः॥ मही द्यौः पृथिवी च न इति भूमिं स्पृष्ट्वा तत्र प्राप्य ओष
धयः समिति यवान् क्षिप्त्वा॥ आकलशेष्विति तेषु कलशान् संस्थाप्य इमं मे गंगे इति तीर्थोदकेनापूर्य गंध
द्वारामिति चंदनागरुकस्तूरीकर्पूरगोरोचनादीन् गंधान् गुग्गुलं च निक्षिपेत्॥ या ओषधीरिति सर्वौषधीः
समीतियवान्॥ कांडात्कांडादिति दूर्वाः॥ अश्वत्थे व इति पंचपल्लवान्॥ स्योना पृथिवीत्यनेन उद्धृतासि वराहेण
कृष्णेन शतबाहुना॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमिति अनेन च पंचमृदः क्षिपेत्॥ याः फलिनीति फ
लं॥ सहिरत्नानीति पंचरत्नानि॥ हिरण्यरूप इति हिरण्यं॥ युवा सुवासा इत्यनेनैव सूत्रेण रक्तसूत्रेण च वे
ष्टयेत्॥ पूर्णा दर्वीति धान्यपूर्णपात्रं कलशोपरि निदध्यात्॥ अत्र च वरुणावाहनपूजने अपि केचिदाहुः

श्री·म·
१५

ततः कलशे सर्वे समुद्रा इति गंगाद्यावाहनं॥ ततः कुंभाभिमंत्रणं॥ कलशस्य मुखे विष्णुः कंठे रुद्रः स
माश्रिताः। मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः। कुक्षौ तु सागराः सप्त द्वीपा वसुंधरा। ऋग्वेदो
ऽथ यजुर्वेदः सामवेदो ह्यथर्वणः। अंगैश्च सहिताः सर्वे कलशं तु समाश्रिता इति॥ ततः कुंभप्रार्थना॥
देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं। त्वत्तोये सर्वतीर्था
नि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः। शिवः स्वयं त्वमेवासि विष्णुस्त्वं
च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः। त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः। त्वत्प्र
सादादिमं यज्ञं कर्तुमीहे जलोद्भव। सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदेति। ततस्त्विज आनो भद्रा राम
इति शांतिसूक्तं पठेयुरिति केचित्। आनो भद्रा इत्येति शांतिसूक्तस्य राहूगणो विश्वेदेवास्त्रिष्टुप् अं १५
त्यापंचमसप्तमीजगत्यौ। षष्ठी विराट्स्थाना त्रिष्टुप् शांतिसूक्तजपे विनियोगः। शंनो भगः शंनो वातः

MEMORIAL

पवतामित्यादिका वा। तस्मिन्नेव समये आचार्यो न्यासनस्थोत्तरत ईशान्यां वा वस्त्राच्छादितपीठादौ
विनायकप्रतिमामंबिकाप्रतिमां वा स्मृतारणपूर्वकं प्रतिष्ठाप्य षोडशोपचारैः पूजयेदिति निबंधकृ
तः। तत्र विनायकमंत्रः। गणानां त्वा गृत्समदो गणपतिर्जगती गणपत्यावाहने विनियोगः। ॐ गणा
नां त्वा। तत्पुरुषाय विघ्नदेवक्रतुंडाय धीमहि तन्नो दंतिः प्रचोदयात् इति वा। गौर्यै सूक्तं गौरीर्मिमा
य दीर्घतमा उमा जगती गौर्यावाहने विनियोगः। गौरीर्मिमाय। सुभगायै विद्महे काममालिन्यै धी
महि तन्नो गौरी प्रचोदयात् इति। अत्र मिताक्षरायां चरुहोमो न्तः शिष्टाश्च कुर्वंति। तस्मिन्पक्षे॥
आचार्यो गृह्योक्तविधिना कुंडे स्थंडिले वाग्निं प्रतिष्ठाप्य प्रादेशमात्रं समिद्द्वयमादायास्मिन्होक
र्मणि देवतापरिग्रहार्थमन्वाधानं करिष्य इति संकल्प्य चक्षुषी आज्येनेत्यंतमुक्त्वा अत्र प्रधानं मितं
संमितं शालंकटं कूष्मांडराजपुत्रं मेताः प्रधानदेवता एकैकया चर्वाहुत्या [illegible] शेषेण स्विष्टकृतमि

त्याघृत्काग्नावादध्यात्। अपरार्कमतेनुपचैवाहुतयस्तन्मते चाधारगेहोम इत्येचतथैवानुसंधेयं॥
ततः परिसमूहनादिचरुश्रपणांतं कृत्वा गोघृतखोलीकृतेन गौरसर्षपयेकल्केनोद्वर्तितांगं सर्वौ
षधीः चूर्णैः कस्तूरिकागरुचंदनादिभिर्विलिप्तशिरसं यजमानमाचार्योन्यदासनउपवेशयेत्॥
ततोयजमानःस्वन्यदासनात्पूर्वदिशावस्थितकलशमादायाभिषिंचेदाचार्यः॥ मंत्राश्च॥ सह
स्राक्षंशतधारमृषिभिःपावनंकृतं तेनत्वामभिषिंचामिपावमानाःपुनंतुमे ततोदक्षिणाद
शावस्थितंकलशमादायशंतेवरुणोराजाशंगंगस्यैवृहस्पतिः शमग्निश्चवायुश्चशंगसम
र्षयोदधुः इत्यनेनाभिषिंचेत् ततःपश्चिमदिगवस्थितमादायां यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्च
मूर्धनि ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुतेसदेति ततउदग्दिशावस्थितंकलशमादायएवंविधै
श्चिभिर्मंत्रैरभिषिंचेत् वदत्यरांशोण्येपिमंत्रान्काः एतद्वैपायनंप्रोक्तंसहस्राक्षमरविस्मृते॥

तेनत्वांशतधारेणपावमान्यःपुनंतुमां॥ शक्रादिदशदिक्पालाब्रह्माद्याःकेशवादयः॥ आपस्तेघ्नं
तुदौर्भाग्यंशांतिर्यच्छंतुसर्वदा सुमित्र्यानआपओषधयःसंतुदुर्मित्रास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः॥
समुद्रागिरयोनद्योमुनयश्चपतिव्रताः दौर्भाग्यंघ्नंतुतेसर्वेशांतिर्यच्छंतुसर्वदा॥ पादगुल्फोरुजंघासु
नितंबोदरनाभिषु स्तनोरुबाहुकक्षाग्रग्रीवाश्रुसांघ्रिसंधिषु नासाललाटकर्णेषुकेशांतेषुचय
स्थितं तदापोघ्नंतुदौर्भाग्यंशांतिर्यच्छंतुसर्वदा॥ इत्येतैरप्यभिषिंचेदितिकेचित् चतुर्थकलशाभि
षेचनएवैतेपठनीयाः॥ अथाचार्योयजमानस्यपश्चिमतस्तिष्ठन्सव्यपाणिगृहीतकुशांतर्हितयज
मानशिरसिश्रौदुंबरेणस्रुवेणसार्षपंतैलंजुहुयात्॥ ॐमितायस्वाहा॥ यजमानोमितायेदंनममेति
त्यजेदित्येवंसर्वत्रापि॥ ॐसंमितायस्वाहा॥ ॐशालाय॥ ॐकटंकटाय॥ ॐकूष्मांडाय॥ ॐराजपुत्रायेति॥
अथाचार्योग्नेरर्चनाद्याज्यभागांतंकृत्वावरुणमितादिभ्यएवजुहुयाद्यजमानस्तुपूर्ववत्त्यजेत्॥

आचार्यः स्विष्टकृदादि प्रणीताविमोकांतं कर्मशेषं समापयेत् । यजमानस्त्वत्रिषेकश्रीलायाभिं
द्रादिदशलोकपालेभ्यो नामादिग्भ्यो विदिग्भ्यश्च बलीन् दद्यात् । एतानि अग्निस्थापनचरुहोमदि
क्पालबलिदानानि मितान्यसरामनुरुध्योक्तानि । ततो मितायएषबलिर्नममेति पायसेनमा
सन्नक्तेनचमितादिभ्यो बलिं दत्वा विनायकांबिकयोरग्रतः सकृद्दवघ्नतंदुलानां मांसेनजिल
पिष्टेनचमिश्रमोदनं मत्स्यमांसं पक्वमपक्वं वा गौडीपैष्टीमाध्वीति त्रिधा सुरा च ब्राह्मणस्य मांस
स्थाने सलवणमाषान्नं सुरास्थाने सलवणदुग्धं चित्रं पुष्पं सुगंधिद्रव्यं मूलकपूरिकाः अपू
पाः कुंदेरकस्रजः । दध्यन्नं पायसं गुडमिश्रं तंदुलादिपिष्टमोदकांश्च पात्रे संस्थाप्य तत्पुरुषाय वि राम
ग्रहे इति मंत्रेण विनायकाय स्कन्नगाय विघ्नरूद्रेति मंत्रेण चांबिकायै निवेदयेत् । अथाचार्यस्ततन ११
श्शेषं सर्वमुपहारमशेषं संस्थाप्य चतुष्पथं गत्वा तत्र गोमयेनोपलिप्य कुशानास्तीर्य तत्र शूर्पं प्राङ्मु

खं संस्थापयेत् । यजमानस्त्वेतैर्मंत्रैर्बलिं दद्यात् । बलिं गृह्णंत्विमे देवा आदित्या वसवस्तथा । मरु
तोश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः । असुरा यातुधानाश्च पिशाचा मातरोरगाः । शाकिन्यो यक्षवे
तालयोगिन्यः पूतनाः शिवाः । जृंभकाः सिद्धगंधर्वा नागा विद्याधरा नगाः । दिक्पाला लोकपालाश्च ये
च विघ्नविनायकाः । जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः । मा विघ्नं मा च मे पापं मा संतु परिपंथि
नः सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः । इति देवादित्यवसुमरुदाश्विरुद्रसुपर्णपन्नगग्रहा
सुरयातुधानपिशाचमातृगणशाकिनीयक्षवेतालयोगिनीपूतनाशिवजंभकसिद्धगंधर्वनागवि
द्याधरनगदिक्पाललोकपालविघ्नविनायकजगच्छांतिकर्तृब्रह्मादिमहर्षिभूतप्रेतेभ्य इदं नमम
ेति त्यागः । ततः शिरसा भूमिं गत्वा पुष्पयुतमर्घं तत्पुरुषायेति मंत्रेण विनायकाय स्कन्नगायेत्यंबिका
यैच दद्यात् । ततो दूर्वासर्षपपुष्पाणां पूर्वोक्तविनायकमंत्रेण विनायकांजलिं दद्यात् । अंबिकायैतं

त्रैणतथैवदद्यात् ततोविनायकमंबिकं चोपतिष्ठेत् मंत्रस्तु॥ रूपंदेहियशोदेहिभगंभगवन्
देहिमे पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमे अस्मिन्भगंभगवन्देहिमेइत्यस्यविनायकमु
पतिष्ठेत् अनंतरंयजमानःप्राङ्मुखोपविष्टःउदङ्मुखमाचार्यादीन्पूजयित्वाचार्यायवासोयुग्मरूप्यं
सत्विग्भ्यश्चान्यांयथाशक्तिदक्षिणांदद्यात् ततउत्तिष्ठ ब्राह्मणस्पतइत्यनेनयांतुदेवगणाःस
र्वेइत्यनेनविनायकमंबिकांचोपस्थायविसृज्यप्रतिपादितसर्वांसामग्रीमाचार्यायदद्यात् ततो
यथाशक्तिभूयसींदक्षिणांदीनानाथेभ्योदत्वायथाशक्तिविनायकप्रीत्यर्थमंबिकाप्रीतयेच ब्रा
ह्मणान्भोजयित्वासंकल्पवायस्यस्वस्त्येत्याद्युक्त्वान्यूनातिरिक्तंसर्वंसंपूर्णमस्त्विति तान्संप्रा
र्थ्यतैरनुज्ञातःसुहृद्युतोह्युपभुंजीत॥॥ इतिश्रीमच्छंकरभट्टसूरिसूनुभट्टनीलकंठकृतौ भा
स्करेशांतिमयूखेविनायकशांतिपद्धतिः॥॥ अथग्रहयज्ञः॥॥ स्कांदे॥॥ देवदानवगंधर्वायक्ष

राक्षसकिंनराः पीडितेग्रहपीडाभिः किंपुनर्भुविमानवाः शनैश्चरेणसौदासोनरमांसेनयोजितः राहु
णापीडितोराजानलोभ्रांतोमहीतले अंगारकनिरोधेनरामोराष्ट्राद्विवासितः अष्टमेनशशांके
नहिरण्यकशिपुर्हतः रविणासप्तमस्थेनरावणोविनिपातितः गुरुणाजन्मसंस्थेनहतोराजासु
योधनः पांडवाबुधेपीडायांविकर्मणिनियोजिताः षष्ठेनोशनसायुद्धेहिरण्याक्षोनिपातितः एतेचान्ये
चबहवोग्रहदोषेणपीडिताः याज्ञवल्क्यः ग्रहाधीनानरेंद्राणामुच्छ्रायाःपतनानिचाभावाभावौ
चजगतस्तस्मात्पूज्यतमाग्रहाः प्रयोगपारिजातेतुत्यत्रपरिमले कार्यारंभेषुसर्वेषुप्रतिष्ठास्वध्व
रेषुच नववेश्मप्रवेशेचगर्भाधानादिकर्मसु आरोग्यस्नानसमयेसंक्रांतौरोगसंभवे अभिचारे
चयःकुर्याद्ग्रहपूजांविधानतः सोभिष्टफलमाप्नोतिनिर्विघ्नेनसंशयइति याज्ञवल्क्यः श्रीकामः
शांतिकामोवाग्रहयज्ञंसमाचरेत् वृष्ट्यायुःपुष्टिकामोवातथैवाभिचरन्नपि मात्स्ये ग्रहयज्ञस्त्रिधा

प्रोक्तापुराणज्ञैःतिकोविदैः॥ प्रथमायुतहोमश्चलक्षहोमस्ततःपरं॥ तृतीयःकोटिहोमस्तुसर्वकाम
फलप्रदः॥ ग्रहस्यान्तरपूर्वेणमंडपंकारयेद्बुधः॥ हस्तायतनहस्तोवाचतुरस्रमुदक्प्लवं॥ द्वादश
हस्तमथाष्टौवाहस्तान्कुर्याद्विधानतः॥ तस्यद्वाराणिचत्वारिकर्तव्यानिविचक्षणैः॥ स्कांदे॥ नवग्रह
मखेकुंडंहस्तमात्रंसमंभवेत्॥ चतुरस्रमधोहस्तंयोनिवक्त्रंसमेखलं॥ योनिवक्त्रंयस्यतत्र पुत्रा
दिकामनायांतुयोन्याद्याकाराअपिभवंति॥ चतुरंगुलविस्तारामेखलातद्वदुच्छ्रिता॥ अत्रविशे
षायत्तदेशादेकैवमेखलामान्या॥ वितस्तिमात्रयोनिःस्यात्षट्सप्तांगुलविस्तृता॥ कूर्मपृष्ठोन्नता
मध्येपार्श्वयोश्चांगुलोच्छ्रिता॥ गजोष्ठसदृशीतद्वदायतांछिद्रसंयुता॥ मेखलोपरिसर्वत्रअश्वत्थ
दलसन्निभा॥ एवंकुंडंचमंडपेशानभागेउदीच्यांचेतिहेमाद्रिः॥ अयुतादिहोमंप्रकृत्यवसिष्ठस्तु॥
कुंडंतन्मध्यभागेतुकारयेच्चतुरस्रकं॥ कुंडस्येशानभागेतुग्रहवेदीप्रकल्पयेत्इत्याह॥ अत्रचतुर

ग्राम
१३

स्रमित्यनेनक्षत्रियादिपुरस्कारेणविहितानामाकारविशेषाणांस्त्रीपुरस्कारेणविहितस्ययोन्याका
रस्यनिवृत्तिः॥ पुनौपुत्राश्वत्थदलेद्वाभ्यांइत्याद्याःकाम्यास्वाकाराभवंत्येववेद्याविशेषमाहगोभिलः॥
कुंडस्यप्रागुदीच्यांवाप्राच्यामुत्तरतोपिवा॥ चतुरस्रंचतुर्धारंकर्तव्यंग्रहपीठकं॥ श्रीकामःपूर्वतःकुर्या
त्पुष्ट्यर्थंदक्षिणेनतु॥ पश्चाद्विजन्मसिद्ध्यर्थंशांत्यर्थेचोत्तरेणतु॥ ईशान्यांसर्वकामायत्वाग्नेय्यांअ
भिचारके॥ नैरृत्यांपुत्रलाभायपुष्ट्यर्थेवायवेनत्विति॥ वेदीतुस्थंडिलपक्षेपिकार्या॥ वसिष्ठः॥ लिखेदष्ट
दलंपद्मंवेदिकोपरितंदुलैः॥ अत्रैकाग्निसाध्यत्वपक्षमुक्तानिषांनवसंख्यांकुंडेषुतत्रब्रह्मकारा
श्चाह॥ प्रयोगपारिजातेत्रगर्गः॥॥ मनोरमेषुचोद्देशेहोमशालामलंकृतां॥ कृत्वातुसंवृतांसा
धोग्रहस्थानंप्रकल्पयेत्॥ तन्मध्येभास्करस्थानंभवेत्पूर्वोत्तरेबुधं॥ पूर्वस्मिन्भार्गवस्थानंसौमं
दक्षिणपूर्वके॥ दक्षिणस्यांकुजस्थानंराहोर्दक्षिणपश्चिमे॥ शनेस्तुपश्चिमेस्थानंकेतोरुत्तरपश्चिमे॥

ग्रा॰म॰
१५

उत्तरस्यां गुरोः स्थानेएवं च स्थंडिलं भवेत् । स्थंडिलं मग्नसर्थ्ये । भास्करस्यतु वृत्तं स्याच्चंद्रस्य चतुरस्र
कं । कुजस्यतु त्रिकोणं स्याद्बाणकारं बुधस्यतु । गुरोर्दीर्घचतुष्कोणं पंचकोणं सितस्यतु चापाकृ
रंज्ञानेराहोः शूर्पं केतोर्ध्वजाकृति । नवधा विभजेदग्निं श्रौतकर्मविधानतः । ऋत्विजश्च यथा
गं कुंडेषु ब्राह्मणाः पृथक् । अथ स्रुवेण जुहुयात्सूर्यपावकरुद्रकान् । ऋत्विजो जुहुयुः सर्वे
वेणैव पृथक् पृथक् । अष्टोचश्च कलान् गृह्य समारोपणमग्निषु । प्रधानाग्नौ विधायाथ नित्य
मं समाचरेदिति । अत्रैवं स्थंडिलं भवेदित्यनेन स्थंडिलानां कुंडानां च सस्त्राकारस्तत्र दिक्षु निवे
श्वोक्तेः । ब्राह्मणाः पृथगित्यनेन नाचार्या नवब्राह्मणाश्चस्तुक्तं । अत्रार्थसंक्षेपप्रयोगपारिजाते मध्य
कुंडेस्मान्नाग्निप्रणीयततोन नाचार्याः । अष्टसु कुंडेषु अग्निं प्रणीयाज्यभागांते कीदिसमिद्भिर्गुडौद
नादिहविभिराज्येन च ग्रहादिमंत्रैर्हुत्वा व्यस्तसमस्तव्याहृतिभिश्च तिलान्हुत्वा स्विष्टकृदादि हो

DR. BHAU DAJI MEMORIAL

मशेषं कृत्वा पूर्णाहुतीर्जुहुयुरिति ॥ कुंडमुक्तं स्कांदे ॥ तस्य चोत्तरपूर्वेण स्थंडिलं हस्तमात्रकं त्रिवप्रच
तुरस्रं च वितस्त्युच्छ्रयसंमितं स्थंडिलं वेदिः । वप्रो मेखलाः । मानं से द्व्यंगुलोत्सेधो वप्रः प्रथमः समुदाहृतः ।
अंगुलोच्छ्रायसंयुक्ते वप्रद्वयमथापरि अंगुलस्तत्र विस्तारः सर्वेषां कथितो बुधैः । तत्र ग्रहाणां रूपया
ज्ञयाज्ञवल्क्यः । सूर्यसोमो महीपुत्रः सोमपुत्रो बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः ।
स्कांदे । नवग्रहमखे कुर्यादृत्विजश्चतुरः शुभान् । अथवा चैकमन्यच्च विधिना ब्राह्मणं सह । त्रिवि
धमपि नवग्रहमुपक्रम्य वसिष्ठस्तु । षोडशब्राह्मणान्शुद्धान् कुंडान्दंतविवर्जितान् । तेषां मध्ये
श्रेष्ठतमम् आचार्यं तं प्रकल्पयेदिति । अत्र पारिजाते न वाचार्यो एको ब्रह्मा षड् ऋत्विजः । आचार्यस्यो
न वस्य च ग्रहार्चनफलं तत इत्युक्तेः । आचार्यकर्म एव एव कुर्यात् । परे त्वारंभमात्राधे न्वीयाग्र
हदक्षिणा अपि तस्य एव देया इत्याद्युक्तं । तदयुक्तं । उपक्रम्य स्वे काचार्येन वाचार्यसमुदये प्रा

बद्धपद्मासीतिवत्॥ लिंगसमवायमात्रेण नवग्रहत्युपसंहारस्थपदोपपत्तेः॥ उपक्रमेपि॥ यद्वा प्याचा
र्यस्य संस्कार्यत्वेनैकत्वमविवक्षितं तथाप्याचार्यस्य नवत्वेकेनन्नाद्युपयोगा न्नावासंस्कार्यत्वानुप
पत्तेः॥ द्वतश्चाचार्यः स्वकर्म कुर्यादितिकल्पितेवाक्य उपादेयत्वादाचार्यस्यन्न्तेन्नाद्युपयोगान्नावासंस्का
र्यत्वोनुपपादितं चेदं मध्वर्युं वृणीतेहोतारं वृणीते पुरोहितं वृणीत इत्यत्र मिश्रैः॥ जन्मस्थगोत्र
मग्निश्च वर्णाः स्थानमुखानि च॥ योज्ञात्वा कुरुते शांतिं ग्रहास्तेनावमानिताः॥ तत्र वर्णजन्मानि आ
रुद्रामोदरायिवद्रूपराशारः॥ रक्तकश्यपजोभानुः शुक्लोऽत्रसस्तत्र्यात्री॥ रक्तोरुद्रसुतो भौमः पीतः सो
मसुतो बुधः॥ पीतोंगिरसासुराचार्यः शुक्लो भृगुद्वहः॥ कृष्णः शनी रवेः पुत्रः कृष्णो राहुः प्रजापतेः॥ कृ राम
ष्णः केतुर्ब्रह्मणस्तस्य कृष्णापापास्त्रयोप्यमी॥ स्कांदे॥ उत्पन्नोऽर्कः कलिंगेषु यमुनायां च चंद्रमा २५
अंगारकस्त्ववंत्यायां मगधायां हिमांशुजः॥ सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा॥ शनैश्चर

स्तु सौराष्ट्रे राहुर्बैराटिवापुरा॥ अंतर्वेद्यां तथा केतुरित्येतान्ग्रहसंभवाः॥ यस्य यस्य च यद्गोत्रं तन्नि
वक्ष्याम्यतः परं॥ आदित्यः काश्यपो गोत्रे आत्रेयश्चंद्रमा भवेत्॥ भारद्वाजो भवेद्भौमस्तथात्रेयः
सोमजः॥ आंगिरसो गुरोर्गोत्रं शुक्रो वै भार्गवस्तथा॥ शनिः काश्यप एवाथ राहुः पैठीनसिस्तथा॥ वि
नवोजैमिनीयाश्च ग्रहाग्निस्तदनंतरं॥ आदित्यः कपिलोनाम पिंगलः सोम उच्यते॥ धूमकेतुस्तथा
भौमो जठराग्निर्बुधः स्मृतः॥ गुरोश्चैव शिखी नाम शुक्रो भवति हाटकः॥ शनैश्चरो महातेजा राहुकेतो
कृतान्नानः॥ एतानि ग्रहविशेषतोऽग्निनामानि॥ कर्मविशेषतोपि देवीपुराणे॥ शुभो ग्रहविधौ ह्यग्नि र्
लक्षहोमे पराजितः॥ कोटिहोमे शिवो वह्निः सर्वकामप्रदायकः॥ कविंतु॥ लक्षहोमे तु वह्निः स्यात्कोटि
होमे हुताशनः॥ स्कांदे॥ भास्करांगारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ॥ सोमपुत्रो गुरुश्चैव तावुभौ पी
तकौ स्मृतौ॥ कृष्णं शनैश्चरं विद्याद्राहुं चित्रं च केतवः॥ मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन हि॥

दक्षिणेलोहितंविद्याद्बुधंपूर्वोत्तरेणतु। उत्तरेणगुरुंविंद्यात्पूर्वेणैवतुभार्गवं। पश्चिमेनशनिंवि-
द्याद्राहुंदक्षिणपश्चिमे। पश्चिमोत्तरतःकेतुःस्थाप्योवैशुक्लतंदुलैः। अथवावर्णकैःकार्याःकार्याः
स्वर्णादिधातुभिः। याज्ञवल्क्यः। ताम्रकास्फटिकाद्रक्तचंदनात्स्वर्णजावुभौ। रजतादयसस्सीसा
त्कांस्यात्कार्याग्रहास्तथा। वसिष्ठः। यथारुचिप्रमाणेनप्रतिमाकल्पयेत्सुधीः। अत्रसर्वत्रग्रहाणां
सूर्यादिक्रमःस्पष्टः।। बोधायनस्तु।। सूर्यांगारकशुक्रचंद्रबुधगुरुशनयइत्याह।। स्कांदे।। तांबु
लंमंडलाकारंसोमंतुचतुरस्रकं। अंगारकंत्रिकोणंतुबुधंबाणाकृतिंतथा। दीर्घचतुरस्रंगुरुं
चास्त्रंभार्गवंतथा। धनुस्तुल्यंशनिंविद्याद्राहुंसूर्पाकृतिंतथा। ध्वजाकाराकेतवश्चगणेशंत राम
त्ररूपिणं हस्तपादाद्यवयवयुक्तंस्थापयेच्छुक्लतंदुलैर्वर्णकैर्लेख्याहस्येतत्पक्षयोर्मंडलाकार १६
नेतिहेमाद्रिः। तत्रैव। शुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्यावुदङ्मुखौ। प्रत्यङ्मुखःशनिःसोमःदो

षादक्षिणतोमुखाः। इदंचशुक्रादीनांप्राङ्मुखत्वात्। आदित्याभिमुखाःसर्वेप्रतिमापक्षोक्तादित्या
भिमुखत्वेचविकल्पतोयत्तुहेमाद्रिर्विकल्पपरिजिहीर्षया। प्राङ्मुखानूर्ध्वदृष्टिन्उदङ्मुखोसमदृष्टिः
प्रत्यङ्मुखोधोदृष्टिःदक्षिणतोमुखाःदक्षिणदृष्ट्याइत्याचष्ट।। तत्रमूलंविचिंत्यं। विरोधात्तावः
स्थ्यंचवर्णरूपगुणैर्युक्तान्ध्यात्वावाहनेनुतान्। मात्स्ये। पुण्येह्निविप्रकथितेकृत्वाब्राह्मणवाच
नं। अग्निप्रणयनंकृत्वाक्रियामावाहयेत्सुरान्। देवानांतत्रसंस्थाप्याविंशतिर्द्वादशाधिकाः। आ
दित्याभिमुखाःसर्वेसाधिप्रत्यधिदेवताः।। विष्णुधर्मोत्तरे।। अतःपरंप्रवक्ष्यामियोदेवोयोग्रहःस्मृ
तः। अग्निरर्कःसोमोवरुणःपरिकीर्तितः। अंगारकःकुमारश्चबुधश्चभगवान्हरिः। बृहस्पतिः
स्मृतःशुक्रःशुक्रोदेवीचपार्वती। प्रजापतिःशनिश्चैवराहुर्ज्ञेयोगणाधिपः। विश्वकर्मास्मृतःकेतुर्
ग्रहास्तेसुराःस्मृताः। अतएवाग्न्यादिलिंगकामंत्राः। सूर्यादिस्थापनमुक्तःस्कांदेअग्निहुतेदिने।।।

ग्रो॰ म॰
१७

यस्सूर्यायाएवं तरुत्यपि॥ स्योना पृथिवी नो भाय इदं विष्णुर्बुधाय च॥ इं बृ आसासुरेज्याय शुक्रं ज्योतिः
सिताय च॥ प्रजापतेतिसौराय आयं गौरितिराहवे केतवे ब्रह्मजज्ञानं स्वैस्वैः मंत्रैः प्रतिष्ठिता॥ एतेषां
च मंत्राणां व्याहृत्यावाहयेत्तु तानित्यन्ये श्रीत्र्याहृतित्रिरावाहनेविकल्पः॥ मदनस्त्वावाहनस्था
पनयोर्त्रिद्धाव्याहृतित्रिरावाहनं॥ एते मंत्रैः स्थापनमित्युक्तेपारिजातो वामनस्तु॥ प्रणवं स्वादितः कृ
त्वा भूर्भुवः स्वस्ततः परं॥ चतुर्थ्यानामसंयुक्तं नमस्कारांतयोजितं॥ एवमेव समाख्यातो ग्रहपूजावि
धायकः॥ अनेनावाहनं कुर्याद्धनेनैव विसर्जनमित्युक्तं॥॥ आवाहनवाक्येषु विश्वेषमादुबोध
यन॥॥ किरीटिनं पद्मासनं पद्मकरं पद्मगर्भसमद्युतिं॥ सप्ताश्वं सप्तरज्जुं कलिंगदेशजं काश्यपगो राम
त्रं विश्वामित्रार्षं त्रिष्टुप्छंदसं रक्तांबरधरं रक्तचंदनं रक्ताभरणभूषितं रक्तगंधानुलेपनं रक्तछत्रध्व १७
जं पताकोपशोभितं मुकुटकेयूरमणिशोभितं आरुह्य रथं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले दे

प्रविष्टमधिदेवताग्निसहितं प्रत्यधिदेवतेश्वरसहितं रक्तवृत्तमंडले पूर्वाभिमुखं आदित्यं आवा
हयामि॥ किरीटिनं रक्तमाल्यांबरं रक्तस्रगंगदाधरं चतुर्भुजं मेषगमनं अवंतिकादेशजं वासिष्ठगोत्र
जं ज्ञामदग्न्यार्षं जगतीछंदसं रक्तांबरधरं रक्ताभरणभूषितं रक्तमाल्यानुलेपनं रक्तछत्रध्वजप
ताकोपशोभितं मुकुटकेयूरमणिशोभितं आरुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्ट
मधिदेवतासहितं प्रत्यधिदेवतास्कंदसहितं त्रिकोणरक्तमंडले दक्षिणामुखं मंगलमावाहयामि
किरीटिनं श्वेतवर्णं चतुर्भुजं दंडिनं वरदं कांस्यं सार्द्धहस्तत्रवकमंडलं कीराटदेशजं भार्गवगोत्रजं॥ शौ
नकार्षं पंक्तिछंदसं श्वेतांबरधरं श्वेतं श्वेताभरणभूषितं श्वेतगंधानुलेपनं श्वेतछत्रध्वजपता
कितं मुकुटकेयूरमणिशोभितं आरुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदे
वतेंद्राणीसहितं प्रत्यधिदेवतेंद्रसहितं शुक्लपंचकोणमंडले प्राङ्मुखं भगवंतं शुक्लमावाहयामि

किरीटिनं श्वेतांबरधरं दन्ताश्वं श्वेतभूषणं पाशपाणिं द्विबाहुं वनायुदेशजमत्रिगोत्रमात्रेयार्षं
मनुष्टुप्छंदसं श्वेताभरणभूषितं श्वेतगंधानुलेपनं श्वेतछत्रपताकिनं मुकुटकेयूरमणिशोभि
तमारूढरथं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडलप्रविष्टमधिदेवतोमासहितं चतुरस्रमंडलं प्रत्य
ग्मुखं सोममावाहयामि॥ किरीटिनं पीतमाल्यांबरधरं पीतवर्णं कर्णिकारस्थं मरुज्ञातिखड्गचर्मगदा
पाणिं सिंहस्थं वरदं मगधदेशजं पीताभरणभूषितं पीतमाल्यानुलेपनं श्वेतछत्रविजयपताकि
नं मुकुटकेयूरमणिशोभितमारूढरथं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडलं प्रविष्टमधिदेवतावि
ष्णुसहितं पीतबाणमंडले दक्षिणाभिमुखं बुधमावाहयामि॥ किरीटिनं पीतवर्णं चतुर्भुजं दंडि
वरदं साक्षसूत्रकमंडलुं सिंधुदेशजमांगिरसगोत्रं वासिष्ठार्षमनुष्टुप्छंदसं पीतांबरधरं पीता
भरणभूषितं पीतगंधानुलेपनं पीतध्वजपताकिनं मुकुटकेयूरमणिभूषितमारूढरथं दिव्यं

मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवतारुद्रसहितं प्रत्यधिदेवतासहितं पीतदीर्घचतु
रस्रमंडले उदङ्मुखं गुरुमावाहयामि॥ किरीटिनं मीद्रवर्णं चतुर्भुजं दंडिवरदं नीलसमद्युतिं शूल
धरं गृध्रवाहनं सबाणबाणासनधरं सौराष्ट्रदेशजं काश्यपगोत्रजं त्र्यग्वार्षं गायत्रीछंदसं कृष्णां
बरधरं कृष्णाभरणभूषितं कृष्णगंधानुलेपनं कृष्णछत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमा
रूढरथं दिव्यं मेरुप्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवताप्रजापतिसहितं प्रत्यधिदेवताय
मसहितं कृष्णधनुर्मंडले प्राङ्मुखं शनैश्चरमावाहयामि॥ किरीटिनं करालवदनं खड्गचर्मशूलधरं
सिंहासनस्थं पूर्वदेशजं पाटलिगोत्रमांगिरसमार्षमनुष्टुप्छंदसं कृष्णांबरधरं कृष्णाभरणभूषि
तं कृष्णगंधानुलेपनं कृष्णछत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारूढरथं दिव्यं मेरुं प्रद
क्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवतासहितं प्रत्यधिदेवताकालसहितं शूर्पमंडले दक्षिणाभि

शां॰म॰
१८५ मुखं राहुमावाहयामि धूम्रान् द्विबाहून् पात्राधरान् विकृताननान् गृध्रवाहनान् किरीटिनो म
ध्यदेशजान् जैमिनिगोत्रजान् गौतमार्षी नानाछंदसश्चित्रांबरधरांश्चित्राभरणान् बिनान्
चित्रगंधानुलेपनान्। धूम्रपिंगध्वजपताकिनां मुकुटकेयूरमणिशोभितान् आरूढरथदि
मेरुप्रदक्षिणीकुर्वाणान् ग्रहमंडले प्रविष्टान् अधिदेवता ब्रह्मसहितान् प्रत्यधिदेवता चित्रगुप्त
सहितान् कृष्णपिंगलध्वजमंडले दक्षिणामुखान् केतून् आवाहयामि। स्कांदे। ईश्वरं भास्करस्य
याद् उमां विद्यान्निशाकरे। स्कंदमंगारके विद्याद् बुधे नारायणं विदुः। गुरौ वेदनिधिं विद्यात् शुक्रे श
क्रो विधीयते। शनैश्चरे यमं विद्याद्राहौ कालं तथैव च। चित्रगुप्ताधिपः केतोरित्येते ग्रहदेवता।
वेदनिधिर्ब्रह्मा। तत्रैव। वक्ष्येऽस्थानानि देवानामीश्वरादि यथाक्रमे। सूर्यस्येवोत्तरे न्यूनमुमां सोम १८५
स्य दक्षिणे। स्कंदमंगारकस्यैव दक्षिणस्यां निवेशयेत्। सौम्यात् पश्चिमतो विष्णुं ब्रह्मा जीवस्य उत्त

DR BHAU DAJI MEMORIAL

तः इंद्रमैत्रासितो द्विदिग्मंदादाग्नेयतो यमं। राहोः पूर्वोत्तरे कालं सर्वेभ्य उत्तरेण यावत् केतोर्नैर्ऋतिदिग्
भागे चित्रगुप्तं निधापयेत्। स्कांदे। अतः स्थापनमंत्राः स्वकथायामनुपूर्वशः। ईश्वरं त्र्यंबकं चेति श्री
ते चेति पार्वती। यदक्रंदेति च स्कंदं विष्णुं विष्णोरराटमिति। आब्रह्मन्निति ब्रह्माणं सजोषा इति वासवं
यमाय त्वेति च यमं कालं कार्ष्णीरसीति च चित्रावसुमिति मंत्रेण चित्रगुप्तं निधापयेत्। अग्निरापः क्षि
तिरापः क्षितिर्विष्णुरिंद्रश्चैंद्री प्रजापतिः। सर्वा ब्रह्मा च निर्दिष्टा अधिदेवा यथाक्रमे। अग्निं दूतमिति त्व
प्रवीरुणस्य दुत्तमं। स्योना पृथिवीमे दित्याइदं विष्णुस्तु विचक्रमे। इंद्रायेंद्रो मरुत्वती प्रस्यो त्रानपर्णो
त्राचीस्थितौ। प्रजापते प्रजेशास्य एष ब्रह्मेति वै विधिः। मंत्रो नमोस्तु सर्पेभ्यः सूर्याणां स्थापने मतः।
ग्रहदेवाधिदेवानां नैवेद्यं कुसुमानि च। ग्रहवृक्षासनं दानं नैवेद्यं कुसुमानि च। ग्रहवृक्षासनंदा
नं स्थापनं चानुपूर्वशः। अत्र सूर्योदयो ग्रहाः ईश्वरादयो देवा अग्न्यादयोऽधिदेवाः तत्रेश्वरादिदे

शां॰प॰
२०

वानायेस्येवो त्तरेन्नंतुमित्यादिनापूर्वस्थानान्युक्तानि॥ अग्न्यादयोधिदेवास्तुग्रहदेवमोर्मध्येस्था
प्याः तथाचमदनरत्ने गोभिलः वसिष्ठौ ग्रहदेवतयोर्मध्येअधिदेवान्निधापयेत्॥ तत्रैवसंग्र
हेतुईश्वरादयोदेवाअधिदेवतात्वेनप्रकृताः॥ अग्न्यादयस्तुप्रत्यधिदेवतात्वेनतेषांस्थानांत
रंचोक्तं॥ अधिदेवीदक्षिणेवामेप्रत्यधिदेवताः॥ स्थापनीयाः प्रयत्नेनव्याहृतीभिःपृथक्पृ २ तत्रै
ववासिष्ठीयेतुदेवतानांस्थानांतरंक्वचिन्मंत्रांतरंचोक्तं॥ रुद्रमेवकंमंत्रेणरवेरुत्तरतोन्यसेत्॥
सोमस्याग्नेयदिग्भागिश्रीश्वेतेमेनकान्यजां॥ यदक्रंदेतिसोमस्यस्कंदंयाम्येप्रदापयेत्॥ विष्णुंविष्णो
रराटेतियजेत्पूर्वेबुधस्यच॥ गुरोरुत्तरतोन्यस्येद्ब्रह्माब्रह्मेतिमंत्रतः॥ सजोषइतिमंत्रेणस्यप्राच्यां
त्वार्कनिधापयेत्॥ शनेःपश्चिमतःस्थाप्यायमायन्वेत्यचायमः॥ काष्ठीरसीतिमंत्रेणराहोःकालंत
थोत्तरे चित्रगुप्तंतुकेतूनांचित्रायस्वेतितेनतु॥ ग्रहाणांदेवताख्याताःशृणुप्रत्यधिदेवताः॥ अग्नि

राम
२०

रापोधराविष्णुरिंद्रेंद्राणीप्रजापतिः॥ सर्पाब्रह्माचनिर्दिष्टाअधिदेवायथाक्रमं॥ ग्रहदेवतयोर्मध्येअ
धिदेवान्निवेशयेत्॥ एतानिचवासिष्ठीयवचांसिकैश्चिन्नाद्रियंते॥ पारिजाते॥ पद्मप्राग्दलमारभ्यद
लाग्रेषुक्रमान्न्यसेत्॥ इंद्रादिलोकपालांश्चतत्तन्मंत्रैःप्रपूजयेत्॥ विनायकंतथादुर्गांवायुमाकाशमेवच॥
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ॥ एतेचविनायकाद्याःपंचग्रहेभ्यउत्तरतःस्थापयेदितिसांप्र
दायिकाः॥ दक्षिणपश्चिमवायव्योत्तरपूर्वेषुयथाक्रममितिअन्ये॥ राहुमंददिनेशानामुत्तरस्यांयथाक्र
मं॥ गणेशोदुर्गावायुश्चराहुकेत्वोश्चदक्षिणे॥ आकाशमाश्विनौचेतिपंचैतान्स्थापयेद्बुधइतिसंग्रहव
चनानुसारेणेतिपितामहचरणाः॥ रूपनारायणाश्च॥ स्कांदे॥ उत्तरेत्वनिलस्यथास्यांगुरुकेत्वोश्चदक्षिणे॥
गणाधिपंप्रतिष्ठाप्यसर्वदैवतमस्कृतं॥ रविग्रन्निकेतुसूक्रणांमध्येइतिफलितोर्थः॥ विनायकपदमुप
लक्षणं तेनदुर्गादयोप्यत्रैवस्थाप्याइतिकेचित्॥ चंदनादिनियमस्तत्रैव॥ दिवाकरस्तुजास्यांदि

दापयेद्रक्तचंदनं॥ चंद्रे च भार्गवे चैव सितवर्णं प्रदापयेत्॥ चंदनादि नियमस्तत्रैव॥ कुंकुमेन॥
नुसंयुक्तं चंदनं जीवसौम्ययोः॥ अगरुं चंदनं दद्याद्राकेत्वर्कजेषु च॥ ग्रहवर्णानि पुष्पाणि ग
यत्राधूपमाददेत्॥ रवेः कुंदरुकं धूपं अग्निनस्तु घृताहुताः॥ भौमे सर्जरसं चैव अगरुं च बुधे
स्मृतं॥ सिह्लकं गुरवे दद्यात् शुक्रे बिल्वागुरुं तथा गुग्गुलुं मंदवारे तु लाक्षां राहोश्च केतवे॥ कुंकुरु
कः सर्जकी निर्यासः॥ सिह्लकं सिल्हकात्कीतमध्यदेशे प्रसिद्धं बिल्वागुरुं बिल्वफलं निर्यासस्सदि
नमगरुं मंदवारे ज्ञातिः॥ ॐ दीप्यस्वेति मंत्रेण दीपं दद्यादतंद्रितः॥ विहितं गंधपुष्पादीनामसं
भवे तु याज्ञवल्क्यः॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च गंधाश्च बलयश्चैव धूपो देयश्च
गुग्गुलुः॥ स्कांदे गुडोदनं रवेर्दद्यात् सोमाय घृतपायसं॥ ओदिताय हविष्यान्नं बुधाय क्षीरया
ष्टिकं॥ दध्योदनं गुरोर्दद्यात् शुक्राय च घृतोदनं॥ मितितं तिलमाषेक नैवेद्यं कुर्यान्नैश्चरे॥ राहोर्मांसौ

दनं दद्यात्केतोश्चित्रौदनं तथा॥ चित्रौदनं तिलतंडुलमिश्रं स्यादजाक्षीरं च शोणितं॥ कर्णानासाग्रक्षी
तं स्यादेतच्चित्रौदनं स्मृतमिति दामोदरः॥ एतैरेव ग्रहद्रव्यैर्ब्राह्मणाश्चापि भोज्याः॥ तथा च याज्ञवल्क्यः॥
गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं॥ दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च॥ दद्याद्ग्रहक्रमादेत
द्द्विजेभ्यो भोजनं बुधः॥ शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं॥ वसिष्ठः॥ उपचाराणि सर्वेषामपि
शुक्लान्येतैः सदा॥ गंधानाविशुक्लेगंधपुष्पा नाविसुगंधकं॥ धूपानादि गुग्गुलुः स्याद्व्यानावेतु मिश्र
कं॥ पंचामृगवामेव मिश्रकं तवदाचनेति॥ मात्स्ये॥ प्रागुत्तरेण तस्माच्च वेद्यन्ते स्तु विलक्षितं॥ घृतप
ल्लवसंयुक्तं फलवस्त्रयुगान्वितं॥ पंचरत्नसमायुक्तं पंचभंगयुतं तथा॥ स्थापयेद्व्रणं कुंभं वरुणं
तत्र विन्यसेत्॥ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च॥ गजाश्वरथ्यावल्मीकात्संगमाद्ध्रदगोकुलात्॥
मृदमानीय विप्रेंद्र वेसिषधिसमन्वितः॥ स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित्॥ याज्ञवल्क्यः॥

अर्कपलाशाः खदिरश्चापामार्गोश्वत्थपिप्पलः। उदुंबरः शमीदूर्वा कुशाश्च समिधः क्रमात्॥ ईश्वरादि
देवतानां स्वस्वग्रहसमिद्भिरेव होमः। हेमाद्रौ देवीपुराणे॥ गणाधिपतये देयाः प्रथमा तु वराहुतिः।
समिधन्नस्तु विशेषमाह॥ याज्ञवल्क्यः। होतव्या मधुसर्पिभ्यां दध्ना क्षीरेण वा युताइति॥ न चात्र संप्र
तिपन्नदेवताकानेकद्रव्याणामेवैवाहुतिः। सन्त्वाप्य वदिति वाच्यं॥ आदौ तु समिद्भिराज्यैः पृथग्
होत्तरं ज्ञातमिति वासिष्ठात्। अन्यत्रापि संप्रतिपन्नदेवताकस्मार्तकर्मण्यनेकद्रव्यके पृथगेव
होमइति सांप्रदायिकाः। बहुकर्तृकेषु कर्मसु प्रायो वचनान्यपि वा॥ स्कांदे॥ आकृष्णेन सहस्रांशोरिमं दे राम
वसवेदवे। अग्निमूर्द्धेति भौमाय उद्बुध्यस्वेति बुधाय। बृहस्पतेति च गुरोः शुक्रायोन्नात्परस्तुते॥ २२
शनैश्चरस्य मंत्रोयं शन्नोदेवीरुदाहृतः। कयानमिति राहोः केतुं कृण्वन्नकेतवे॥ मात्स्ये॥ आवो
राजेति रुद्रस्य भुवः स्कंदादि देवतानां यदृती दृस्य प्रकीर्तितः॥ तथाय वस्य वायं गौरिति होमः प्रकी

र्तित॥ कालस्य ब्रह्मयज्ञानमिति मंत्र प्रशस्यते॥ चित्रगुप्तस्य चाज्ञातमिति पौराणिका विदुः॥ अग्निदूतं
वृणीमहेइति वह्नेरुदाहृतः। उदुत्तमं चवरुणेति अपां मंत्रः प्रकीर्तितं॥ इमे पृथिव्यांतरिक्षमिति वे
देषु पठ्यते॥ सहस्रशीर्षा पुरुषइति विष्णोरुदाहृतः। इंद्रायेंद्रोमरुत्वातइति शाक्रस्य शस्यते॥ उत्तान
पर्णेसुभगेइति ग्राम्याः समाचरेत्॥ प्रजापते पुनर्होमं प्रजापतेइति स्मृतः। नमोस्तु सर्पेभ्यइति सर्पाणां मं
त्रउच्यते॥ एषब्रह्मापत्नीविजइति ब्रह्मण उदाहृतः। विनायकस्य चान्तनइति मंत्रो बुधैः स्मृतः॥ जातवेद
सेसुनवामइति दुर्गामंत्रोत्र उच्यते॥ पूर्णाहुतिं च मूर्द्धानं दिवइत्यनिपातयेत्॥ स्कांदे। नैवेद्यं शेषं हुत्वा च
होममंत्रादनंतरं॥ अथ व्याहृतित्रि हुत्वा एकैकस्य यथाक्रमं॥ अष्टोत्तरं च साहस्रं ज्ञातमथाधिकल
प्या॥ अष्टाविंशतिरष्टौ वा एकैकस्य तु होमयेत्॥ होतव्यं च घृतं तथान्व रुत्तक्षादिकं पुनः॥ मैत्रेर्दश्या
हुतिर्हुत्वा होमो व्याहृतिभिः स्मृतः॥ अथेति॥ अथचेत्यर्थः॥ गर्हीत्वा नाम यांबिकामिति वता मदन

ग्रां·प्र·
२३

स्त्वथचेत्येवपपाठ। तत्रमंत्राणांव्याहृतीनांचपरस्परंविकल्पः अष्टोत्तरसहस्रादिसंख्यानुपलब्धये
पि। नैवेद्यत्रोषहोमस्तुशाखाविशेषपरइतिअपिसएव। लक्षादिकःपुनर्व्याहृतिभिर्होमोमंत्रैर्वाव्या
हृतीर्हुत्वास्वतंत्रत्यन्वयः। मंत्रैर्यद्वमंत्रैः व्याहृतिभिर्वास्ताभिः समस्ताभिर्वा। नातचरणस्तु। अथ
व्याहृतिभिर्हुत्वेतिविधिनेहोमलक्षादिसंख्यासिध्यर्थं। मंत्रैरित्यादिनुचरुहोमोहुत्वरंसोमंराजानमि
तियथाप्रकृतिस्विष्टकृद्धुत्वासूर्यादिमंत्रैर्वाआदद्याहुतीः प्रतिदैवंलक्षहोमादिद्रव्येणहुत्वाव्याहृ
तिभिर्लक्षादिहोमः कार्यइत्याहुः। यद्वाद्यन्यतमद्रव्येणग्रहादिभ्यः प्रत्येकंदशाहुतीस्तन्मंत्रैर्हुत्वाते राम
नै। वद्रव्येणव्यस्तसमस्तव्याहृतिभिरयुतलक्षकोट्यन्यतमद्रव्येणग्रहादिभ्यः प्रत्येकंदशाहुतीस्त २३
न्मंत्रैर्हुत्वातेनैवतानिचदेवीपुराणे॥ यवव्रीहिघृतक्षीरतिलकंगुप्रसारिकाः। पंकजोशीरबिल्वा
र्कदलाहोमेप्रकीर्तिताः। उदङ्मुखाः प्राङ्मुखावाकार्याब्राह्मणपुंगवाः॥ मंत्रवंतश्चकर्तव्याः स्वरवःप्र

तिदैवतं॥ हुत्वाचतांश्चस्वस्वसम्यकततोहोमंसमाचरेत्॥ चर्वादिकंचघृताद्यंनंहोतव्यंचघृताद्य
नंचरुलक्ष्यादिकंपुनरितिमान्स्यात्। जंस्यंद्राक्ष्यादि। चरुर्नैवेद्यविशिष्टोगुडौदनादिः। तानिद्रव्या
णुक्ताइत्येतानिदूर्वाविल्वःसमित्संख्यासमाहुतीरित्यास्वलायनोक्तेः॥ अधिदेवतादिभ्योपिहोमेदे
माद्रौ। चरुणावासमिद्भिश्चसर्पिषावातिलैःक्रमात्। तत्रमंत्रैश्चहोतव्याःक्रमादत्राधिदेवताः॥ ग
द्यपरिशिष्टे। प्रधानदशांशेनपार्श्वयोर्देवयोरिति॥ अधिदेवतादिहोमेसंख्यावासिष्ठे। द्वित्राश्चैवा
धिदैवत्याः पंचानांचैवपंचधेति॥ पंचानांगणेशादीनांपंचधाप्रत्येकमित्यर्थः॥ केचित्तुद्वौत्रयोवा
धित्राविनायकादीनांपंचवा॥ एवेकामिति। ततः प्रयोगपारिजाते॥ इंद्रादिलोकपालांश्चतत्रमंत्रैः
प्रपूजयेत्। तत्रमंत्रैर्जपंकुर्यात्ततोहोमंसमारभेत्। नरसिंहपुराणे॥ ततोव्याहृतिभिश्चाज्यहुत्वा
ब्रीहितिलादिकं। यावत्प्रपूज्यतेसंख्यालक्षंवाकोटिरेववा॥ नान्नार्थादयुतमि। पद्मयज्ञश्चनतियमतः।

ग्रा·म·
२४

दीनः स्वस्त्ययनः सम्यग्ध्याने उतिस्त्रिविष्यात्वरात्म ॥ ततो व्याहृतिभिः कुर्यात्तिलहोमं प्रयत्नतः ॥ प्रथमो
युतहोमः स्याल्लक्षहोमो द्वितीयकः ॥ तृतीयः कोटिहोमस्यात्त्रिविधो ग्रहयज्ञकः ॥ एकरात्रं त्रिरात्रं
वा पंचरात्रमथापि वा ॥ शिवगाथां विष्णुगाथां शांतिब्राह्मणभोजनं ॥ समापयेत्प्रदिनं एवं प्रक्रिसमं
न्वितः इति ॥ वासिष्ठे ॥ अथाभिषेकं मंत्रेण वाद्यमंगलगीतकैः ॥ पूर्णकुंभेन तेनैव होमांते प्रागुद
ङ्मुखैः ॥ अव्यंगावयवैर्ब्रह्मन् क्षेमस्रग्दामभूषितैः ॥ यजमानस्य कर्तव्यं चतुर्भिः स्नापनं द्विजैः
अभिषेकमंत्राः प्रयोगे वक्ष्यंते वसिष्ठः ॥ स्वस्तिकं कल्पयेत्पश्चात्कुंडस्येशानभागतः ॥ यजमान स्याभ
भिषेकार्थं तत्रासनं न्यसेत् ॥ प्राङ्मुखस्योपविष्टस्य यजमानस्य तत्र च ॥ अभिषेकं ततः कुं
र्युः साचार्याश्चोऽऋत्विजः ॥ विविधैर्मंगलैर्घोषैः सूतमागधजैः सह ॥ ततस्तस्याभिषिक्तस्य रक्षार्थं
बलिमुत्क्षिपेत् ॥ दिग्विदिक्षु विचित्रान्नैर्दीपैर्नीराजयेत्ततः ॥ शुक्लमाल्यांबरधरः शुक्लगंधानुलि

नः ॥ ततो मंडपमागत्य ध्यायेदग्निसुरान्ग्रहान् ॥ प्रत्येकं प्रतिमंत्रैश्च दद्यात्पुष्पांजलिं ततः इति वाम
नः ॥ आचार्यप्रभृतिभ्यश्च ग्रहार्चनफलं ततः ॥ समिदाज्यचरूणां च तिलहोमफलं च यत् ॥ ब्रह्मत्वे
कुंभपूजायां चार्चनस्य फलं च यत् ॥ गणपक्षेत्रपान्वीन्द्रदुर्गादिव्यंगदेवताः ॥ तासां वा यत्फलं स
म्यक् गृह्णीयाज्जलपूर्वकं ॥ एतानि च वामनवचनानि निर्मूलानीति पितामहचरणाः ॥ वसिष्ठो
क्तिलवचांस्यपि वेद्यद्राक् ॥ वसिष्ठः ॥ ततो जयादीन्जुहुयात्पूर्णाहुतिमथाचरेत् ॥ तत्रैव ॥ मंत्रे
ण सप्त ते अग्न इति पूर्णाहुतिं चरेत् ॥ अग्निपुराणे ॥ मूर्धानं दिवमंत्रेण संस्रवेण च धारया ॥ द
द्यादुत्थाय पूर्णां वै नोपविश्य कदाचनेति ॥ मात्स्ये ॥ पूर्णाहुतिं च मूर्धानं दिव इत्या निपातयेत् ॥ अ
त्र निम्नशाखोगतेकादशाद्दशाद्यकपालनिर्दैश्यं द्वाग्निसवदनेकमंत्रयुक्ता या अनेकस्मृत्युक्ता
या अपि पूर्णाहुतिश्चैकत्वान्मंत्राणां विकल्पः ॥ तथाश्वयाजने चत्वारत्विन्द्रेन त्रिलानां याम्यान्तु

ग्रां॰प्र॰
२५

वाक्यानां समुच्चयेन तु पठंति॥ वसोर्धारा त्वयुतहोमे नास्ति प्रमाणगौरवात्॥ ततः शुक्लांबरधरः
शुक्लगंधानुलेपनः॥ सर्वौषधैः सर्वगंधैः स्नापितो वेदपुंगवैः॥ यजमानः सपत्नीकः ऋत्विजस्तान्स-
माहितः॥ दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः॥ सूर्याय कपिलां धेनुं दद्याच्छंखं तथेंदवे॥ रक्तं धु-
रंधरं दद्यात्सौमाय कुकुद्मिनं॥ बुधाय जातरूपं च गुरवे पीतवाससी॥ श्वेताश्वं दैत्यगुरवे कृष्णां
गामर्कसूनवे॥ आयसं राहवे दद्यात्केतवे छागमुत्तमं॥ सुवर्णेन समाः कार्या यजमानेन दक्षिणाः॥
बुधप्रीत्यर्थदेयहेम्ना सकलसर्वोत्पत्त्यतः समाप्तिके चिन्त्य॥ अस्मिन्पक्षे षोडशमाषविशिष्टे ह्नवा-
चित्सुवर्णपदमानस्याप्तेस्तादृशसुवर्णमूल्यं प्रत्येकमिति परे॥ बहुल्पमूल्येषु तथा हेम्ना पिदेयं॥ ग्राम २५
यथा सर्वाः प्रत्येकं दशमाषसुवर्णेन समा भवंतीति तु सम्यक्॥ सर्वेषामथवा गावो गुरुर्वा येन तु-
ष्यति॥ स्वमंत्रेण प्रदातव्याः सर्वाः सर्वाः सर्वत्र दक्षिणाः॥ स्कांदे॥ केतवे छागमांसादि सर्वेषामेव कां-

चनमिति॥ तत्रैव यस्तु पीडाकरो नित्यं स्वल्पवित्तस्य वा ग्रहः॥ तमेव पूजयेद्भक्त्या दक्षिणाभिः स्वश-
क्तितः॥ दानोद्योगे ग्रहाश्च सायुतः॥ यथाशक्तितो विप्रानृत्विजश्चेतरानपि॥ एकमेकाहुतौ विप्रं भो-
मत्वन्तेन भोजयेत्॥ अत्यर्थे मध्यमश्चापि विप्रमेकं शताहुतौ॥ सहस्रस्याहुतेर्वैकं जघन्योपि विप्रं भो-
जयेत्॥ तत्रैव॥ तस्माद्दनुसमहाक्तोपि दक्षिणा चाल्पमेव च॥ जपैः प्रणामैः स्तोत्रैश्च तोषयेत्तर्पयेत्त-
तः॥ स्कांदे॥ यथा ग्रहो द्विजेस्तावद्विधिज्ञो वेदपारगः॥ तोषयेत्पटुवस्त्राद्यैस्तुष्टमेनं विसर्जयेत्॥ अ-
न्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः॥ यजमानमदक्षिण्यो नास्ति यज्ञसमो रिपुः॥ तत्रैव॥ यथा सम-
न्वितं यन्त्रं यन्त्रेण प्रतिहन्यते॥ एवं समुच्छ्रितं घोरं ग्रहशांत्या विनश्यति॥ अहिंसकस्य दांतस्य ध-
र्मार्जितधनस्य च॥ नित्यं च नियमस्थस्य सदा सानुग्रहाः ग्रहाः॥ ग्रहा गावो नरेंद्राश्च ब्राह्मणा-
श्च विशेषतः॥ पूजिताः पूजयंत्येते निर्दहंत्यपमानिताः॥ ग्रहाणामिदमातिथ्यं कुर्यात्संवत्सरा-

दपि॥ आरोग्यबलसंपन्नो जीवेच्च शरदां शतं॥ मात्स्ये॥ एवं समग्रां निष्पाद्य सर्वान्देवान्विसर्ज
येत्॥ तत्र मंत्रः॥ यांतु देवगणाः सर्वे पूजामादाय पार्थिव। इष्टकामप्रदानार्थं पुनरागमनाय च॥
तु विष्णो त्वरे॥ ततः समाचेयत्तेनु कारयेत्तु महोत्सवं॥ शंखतूर्यनिनादेन ब्रह्मघोषरवेण च॥
मात्स्ये॥ अनेन विधिना यस्तु ग्रहपूजां समाचरेत्॥ सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते॥
स देवायुतहोमोयं नवग्रहमखः स्मृतः॥ विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु॥ निर्विघ्नार्थं मुनि
श्रेष्ठ तथोद्वेगाद्भुतेषु च॥ वश्यकर्माभिचारादौ तथैवोच्चाटनादिके॥ नवग्रहमखं कृत्वा ततः
काम्यं समाचरेत्॥ अन्यथा फलदं पुंसां न काम्यं जायते क्वचित्॥ तस्मादयुतहोमस्य विधानं तु
समाचरेत्॥ विवाहेत्यादिना विवाहादिषु काम्येषु च कर्मस्वंगत्वमुक्तं॥ अत्र ग्रहस्वरूपवर्ण राम
देवगोत्राग्निस्थानं मुखाकारस्थापन होममंत्रचंदनधूपनैवेद्यसमिद्दक्षिणाधिदेवता २६

प्रत्यधिदेवतोपदेशकवाक्येष्वधिदेवताप्रत्यधिदेवताविनायकादिपंचलोकपालानामनेक
स्मृतिपुराणभेदेन त्रयो विसंवादितैरनेकैः पर्यायशब्दैरुपस्थितेर्नात्रैव वैध्यशब्दनियमः ना
पि मंत्रवर्णैनैकशब्दोपस्थितेः॥ शब्दविशेषैर्देवतात्वं द्योतनस्मारकतया मंत्रविनियोगेन मं
त्राणां देवताप्रापकत्वायोगात्॥ तेषां बाहुल्येनास्पष्टलिंगत्वाच्च॥ अतोद्रव्यतादिषु स्वरूपादि
निर्देशास्मृतिमंत्रवर्णोपस्थितिशब्दानामन्यतमेन शब्देनादित्यो ग्रहादीनामिति शिष्टाचारो
प्येव॥ अत्र व्याहृतिकरणे के युतहोमे ग्निवायुसूर्यप्रजापतय एव देवताः न ग्रहाः ऐंद्रादिवन्नप्र
काशत्वेन विनियोगाभावात्॥ अत एव पारिजाते॥ भूर्भुवः स्वश्चेति तिस्रो व्याहृतयो जपेत्॥
अग्निश्चर्होमेतिसन्निश्चतुर्थी स्यात्समासतः॥ समस्ताभिरेव होमः स चाग्निवायुसूर्यदेवत्यइ
ति तु मदनः॥ सर्वव्याहृतिहोमेन ग्रहा देवता इति प्रधानं चात्र ग्रहपूजा॥ तद्धोमो युतहोमश्च॥

श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेत्। इत्यादिना तत्पूजातद्धोमयोः फलसंबंधात् ग्रह
यज्ञस्त्रिधेत्युक्त्वा प्रथमोयुतहोम इत्यादियुतलक्षकोटिहोमानां ग्रहयज्ञविकृतित्वेनोपक्रमा
त्। तस्मादयुतहोमस्य विधानं तु शमाचरेदित्युपसंहाराच्चाग्रहणाग्रहदेवत्यकर्मसमस्तहोमप्रा
णत्वेनतंत्रपदध्वनीतिवल्लिंगसमवायेन ग्रहयज्ञांगत्वं। नातच्चरणास्तु अयुतहोमादीनामे
व प्राधान्यं ग्रहहोमस्त्वंगमित्याहुः तदाशयं न जाने। यदि कामनाश्रुत्येन फलसंबंधः श्रीकामः
शांतिकामो वा ग्रहयज्ञं समाचरेदित्यादि, सतावत्पूजाहोमयोरेवोचितः ग्रहसंबंध राम
प्राप्तेः ग्रहयज्ञशब्दस्य तन्नामत्वात्। नचायुतहोमादीनां फलसंबंधेन प्रकरणपाठात् ग्रहपू २७
जाहोमयोरंगत्वमिति वाच्यं। वैपरीत्यस्यापि सुवचत्वात्। अयुतहोमादिशब्दानां ग्रहयज्ञस
मानाधिकरण्येन ग्रहयज्ञनामत्वं तु लिंगसमवायेन न तदंगत्वेन अर्थवादिकं फलसं

बंधस्तु। अनेन विधिना यस्तु ग्रहपूजां समाचरेत्। सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते इ
त्यत्र यज्ञदेवपूजासंगतिकरणेदानेष्वित्यनुशिष्टयोः पूजायोश्चयोः सदेवायुतहोमोयमित्या
द्युपक्रम्य पतिर्विघ्नार्थमुनिश्रेष्ठ इत्यादिना त्वयुतहोमानामपि स्मृतिषु तु प्रायश्चार्थवादिकमे
व फलं। अत्र कामनाश्रुत्योपनीते फले सत्यार्थवादिकं संबध्यते। नचेति तु विचारांतरं। किंच याज्ञ
वल्क्यादिस्मृतिषु न तावदयुतहोमादीनां विधिर्नाप्यनुवादः। अतो ग्रहपूजाहोमयोः प्राधान्या
न्नावैतत्रस्येतिकर्तव्यतासंबंधेन स्यात्। अतो ग्रहपूजाहोमयोरपि प्राधान्यन्ततायुतादिहोमं
विनापि शास्त्रान्तरोक्तग्रहयागास्मासं विनैक शास्त्रीयग्रहयागास्मास मात्राणामिव पूजाग्रहदेव
त्यहोमयोरेवानुष्ठानं कुर्वंति तच्छिष्टानां संगच्छते। ग्रहपूजाहोमयोरंगत्वे त्वंगमात्रानुष्ठान
मेव स्यात्॥॥ इत्ययुतहोमः॥॥ अथ ग्रहादीनां लक्षणानि॥ मात्स्ये॥ पद्मासनः पद्मकरः पद्मगर्भ

समद्युतिः सप्ताश्वरथसंस्थश्च द्विभुजः स्यात्सदा रविः। श्वेतः श्वेतांबरधरादेशाश्वः श्वेतभूषणः॥
गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी। रक्तमाल्यांबरधरः शक्तिशूलगदाधरः। चतुर्भुजो मे
षगमो वरदः स्याद्धरासुतः। पीतमाल्यांबरधरः कर्णिकारसमद्युतिः। खड्गचर्मगदापाणिः सिंहस्थो
वरदो बुधः। देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ। दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू। मं
दुनीलद्युतिः शूलवरदो गृध्रवाहनः। बाणबाणासनः कर्त्रीकर्त्तव्योऽर्कसुतः सदा। करालवदनः
खड्गचर्मशूली वरप्रदः। नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते। धूम्राद्विबाहवः सर्वे गदिनो विकृ
ताननाः। गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः। सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः। श्वंश्वंगु
लेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदेति॥ अथाधिदेवताप्रत्यधिदेवतालक्षणानि विष्णुधर्मोत्तरे॥
पंचवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः। कपालशूलखट्वांगी चंद्रमौलिः सदाशिवः। अक्षसूत्रं चक

मलं दर्पणं च कमंडलुं। उमा विनिर्दिष्टस्त्रिषु पूजिता त्रिदशैरपि। कुमारः षण्मुखः कार्यः शिखंडकविभूष
णः। रक्तांबरधरो देवो मयूरवरवाहनः। कुक्कुटश्च तथा घंटा तस्य दक्षिणहस्तयोः। पताका वैजयंती
स्याच्छक्तिः कार्या च वामयोः। विष्णुः कौमोदकीपद्मशंखचक्रगदाधरः। प्रदक्षिणं दक्षिणाधः करादार
भ्यतित्यगाः। पद्मासनस्थो जटिलो ब्रह्मा कार्यश्चतुर्भुजः। अक्षमालास्रुवं बिभ्रत्पुस्तकं च कमंडलुं॥
चतुर्दंतगजारूढो वज्री कुलिशास्त्रकरः। प्राचीपतिः प्रकर्त्तव्यो नानाभरणभूषितैः। ईषन्नीलोपमः
कार्यो दंडहस्तो विजानता। रक्तदृक्पाशहस्तश्च महामहिषवाहनः। कालः करालवदनो नीलांगश्च
विभीषणः। पाशहस्तोऽदंडहस्तः कार्यो दक्षिणकरात्तथा। अपीच्यवेषस्त्वाकारद्विभुजं सौम्यदर्शनं द
क्षिणे लेखिनी चित्रगुप्तं वामे तु पात्रकं। पिंगलश्मश्रुकेशाक्षः पीनांगजठरोरुणः। छागस्थः साक्षसूत्रो
ग्निः सप्तार्चिः शक्तिधारकः। विघ्नितं च मरेणास्य करमन्यं प्रकल्पयेत्। आपः स्त्रीरूपधारिण्यः श्वे

नामकरवाहना। दध्माताः पात्राकलशौ मुक्ताभरणभूषिता। शुक्लवर्णा महाकार्या दिव्याभरणभूषिता
चतुर्भुजा सौम्यवपुश्चडें शुक्लदशांबरी। रत्नपात्रं सस्यपात्रं पात्रमौषधिसंयुतं। पद्मं करे च कर्त्तव्यं भुजे
याद्वतंदन दिग्गजानां चतुर्णां सा कार्या पृष्ठगता तथा। विष्णोरिंद्रस्य चोक्तं वामेन्याच्या करेमायि
सौम्या संतानमंजरी। वरदा मंडिता कार्या द्विभुजा च तथा शची। यज्ञोपवीती तं सस्य एकवक्त्रश्चतुर्भुजः
अक्षं स्रुवं स्रुचं बिभ्रत् कुंडिकां च प्रजापतिः। अक्षं अक्षमाला कुंडिकां कमंडलुं। अक्षसूत्रधराः सपाकुं
डिकापुष्करवणः। एकजोगास्त्रिजोगा वा सर्वे कार्याश्च तीषणा। ग्रहाणां लक्षणमुक्तं। ग्रहाणां दक्षिण
पार्श्वस्थापयेदधिदेवता। ग्रहाणामुत्तरे पार्श्वस्थाप्याः प्रत्यधिदेवताः। अथ विनायकादिलक्षणानि।
चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्यो गजाननः। नागयज्ञोपवीतश्च ब्रह्मांकस्तत्त्रोदरः। दक्षे दंतं करे द २८
द्याद्द्वितीये चाक्षसूत्रकं। तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा। शाक्तिबाणं तथा शूलं खड्गं चक्रं च द

MEMORIAL

क्षिणे। चंद्रबिंबमथो वामे खेटं शूर्पं कपालकं। स्कंदकं च बिभ्राणा सिंहारूढा चतुर्भुजा। एषा देवी समु
दिष्टा दुर्गा दुर्गार्तिहारिणी। धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः। वरदानकरो धूम्रवर्णः कार्यो
विजानता। नीलोत्पलाभं गगनं तद्वर्णांबरधारि च। चंडार्कदंडहस्तं कर्त्तव्यं द्विभुजं सौम्यं खड्गवत्। द्विभु
जौ देवभिषजौ कर्त्तव्यौ रूपमास्थितौ। तयोः औषधयः कार्या दिव्या दक्षिणहस्तयोः। वामयोः पुस्तकौ
कार्यौ दर्शनीयौ तथा द्विजाः। एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादवः। नारीयुगं प्रकर्त्तव्यं सरूपं चारुदर्श
नं। रत्ना नांउकरे कार्यं चंद्रशुक्लांबरे तथा॥ ॥ अथ लोकपालरूपाणि॥ ॥ तत्रेंद्राग्नियमरूपाण्यधिदे
वतोक्तानि। खड्गचर्मधरो व्यालो निर्ऋतिर्नरवाहनः। वायुर्विनायकादि पंचकं तूक्तः। सोमग्रहेषु अनंतः प्र
त्यधिदेवतासु॥ अथ लक्षहोमः॥ तत्र ग्रहपीडादीनि निमित्तान्युक्तान्यपुत्रहोमारंभे देवीपुराणेपि॥
लक्षहोमं प्रवक्ष्यामि यथाप्रोक्तं तु शंभुना। भूमिकंपे दिग्दाहे ग्रहयुद्ध उपस्थिते। केतुसंदर्शने चैव

शां॰म॰
३०

आदित्यस्य चक्रं पते कृष्णवर्णोथवा सूर्यस्तथा छिद्रसमन्वितो। रक्तवृष्टिस्तथा नद्यो विपरीता वहंति वा।
निर्गलं गमनाद्रूपं वारि मध्येव्यवस्थितं। उपसर्गास्तथा लोके जंतुक्षयकारकाः यस्य राशौ ग्रहाः
पंच अथ सप्त सुराधिप ग्रहणं च प्रसूर्यस्य ग्रहैर्वाष्टमसंस्थितिरित्यादि तथा कंपनं स्वेदनं गात्रेत्रं
बुधानाथलक्ष्यणं देवतानां स्फुराध्यक्षत्याताः क्षयकारकाः लक्षहोमं च कुर्वीत कोटिहोमम था
पिवेति मात्स्ये अस्माद्दश गुणाः प्रोक्ता लक्षहोमस्वयं त्रुता आहुतिभिः प्रयत्नेन दक्षिणाभिस्तथै
व च द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं पुनः लक्षहोमे भवेत्कुंडं योनिवक्त्रं त्रिमेखलं व्यासतो द्वि
हस्तविस्तृतं फलतश्चतुर्हस्तायतं भवतीत्यर्थः तथा तस्य चोत्तरपूर्वेण वितत्रयं समितं प्रागुदक्
त्यामंगारकंग्रहक्षमायांनक्षत्रोजनं॥क्षमान्त्यः॥सप्तमेत्वथसंप्राप्तेहेमंताम्रेतिवेद्रूप्यैर्वारक्तवस्त्र
युगलंतंकुंकुमेनानुलेपितं॥निवेद्यन्नकंसारपुष्पधूपाक्षतादिभिः॥होमंघृततिलैःकुर्यात्कुज
नाम्नाचमंत्रवित्॥समिधोष्टोत्तरशतमष्टाविंशतिरेववा॥होतव्यामधुसर्पिभ्यांदध्नाचैवघृते
नच॥मंत्रेणानेनतद्दद्याद्ब्राह्मणायकुटुंबिने॥कुजकुप्रसन्नोभवत्वंमंगलःपरिपव्यसे।अमंगलं
निहत्याशुसर्वदायच्छमंगलं॥एवंकृतेभौमकृतंदुःखंतंशांतिमाप्नुयात्॥कर्त्तव्यंभौमपीडासुतत
स्मात्प्रयतमानसैः॥ ॥अथबुधशांतिः॥ ॥विश्रारवासुबुधंग्रहसप्तनक्षत्रान्यथाचरेत्॥बुधं
हेममयंकृत्वास्थापितंकांस्यभाजने॥शुक्लवस्त्रयुगच्छन्नंशुक्लमाल्यानुलेपनं॥गुडौदनोपसंकृ
तंब्राह्मणायनिवेदयेत्॥बुधत्वंबुधिजननोबोधवान्सर्वदानृणां॥तत्वावबोधंकुरुमेसोमपुत्रन

मोनमः॥होमंघृततिलैःकुर्याद्बुधनाम्नाचमंत्रवित्॥समीधोष्टोत्तरशतमष्टाविंशतिरेववा॥होतव्या
मधुसर्पिभ्यांदध्नाचैवघृतेनच॥बुधशांतिरियंप्रोक्ताबुधवैकृतनाशिनी॥बुधदोषेषुकर्त्तव्यातथा
शांतिकपौष्टिके॥ ॥अथगुरोःशांतिः॥ ॥गुरुश्चेदनुराधासुपूजयेत्कृत्तिकोत्तरःपूर्वोक्तविधिनायो
गेसप्तनक्षत्रान्यथाचरेत्॥हेमंहेममयेपात्रेस्थापयित्वाबृहस्पतिंपीतांबरयुगच्छन्नपीतयज्ञोपवी
तिनं॥पादुकोपानच्छत्रकमंडलुविभूषितं॥पूजयेत्पीतकुसुमैःकुंकुमेनविलेपितं॥धूपदीपादिभिर्दि
व्यैःफलैश्चंदनतंदुलैःखंडखाद्योपहारैश्चगुरोरग्रेनिवेदयेत्॥धर्मशास्त्रार्थतत्वज्ञज्ञानविज्ञानपा
रग॥विबुधार्त्तिहराचिंत्यदेवाचार्यनमोस्तुते॥होमंघृततिलैःकुर्याद्गुरुनाम्नाचमंत्रवित्॥समिधो
ष्टोत्तरशतमष्टाविंशतिरेववा॥होतव्यामधुसर्पिभ्यांदध्नाचैवघृतेनच॥समिधोत्राश्वत्थस्य॥एत
द्व्रतंमहापुण्यंसर्वपापहरंशुभं॥तुष्टिपुष्टिकरंनृणांगुरोर्वैकृतनाशनं॥विषमस्थेगुरौकार्यामहा

शांतिरियं रत्निः॥ ॥अथ गुरुपूजा॥ ॥स्कांदे॥ कन्याविवाहकाले तु शुद्धिर्यस्य न विद्यते ब्राह्मणसो
पनयने यस्य स्याद्दुःस्थितं गतः। दुःस्थितप्राप्त॥ एभिः पूजा गुरोः कार्या विधिवत्कुंतिनाविते॥ मदंती
कामपुष्पाणि पत्रं पालाशसर्षपा॥ मदंती यूथिका॥ कामोदमनवृक्षाख्या॥ गडूची वा त्वपामार्गो वि
उंगंत्रां रविनीवचा॥ सहदेवी विष्णुक्रांता सर्वौषध्यः शतावरी॥ कुष्ठं मांसहरिद्रे द्वे मुरा शैलेय चंद
नं॥ वचा कर्पूरमुस्तं च सर्वौषध्यः प्रकीर्तिताः॥ तथैवाश्वत्थन्यग्रोधाच पंचगव्यं जलं तथा॥ न्यूतंन वोद
कुंभं चयीतवस्त्रसमन्वितं॥ पंचरत्नैः समायुक्तं ईशान्यां स्थापितेन लात्॥ या ओषधीति मंत्रेण स
र्वास्तस्मिन्विनिक्षिपेत्॥ कुंभस्योपरि तागेतु स्थापयित्वा बृहस्पतिं॥ सुवर्णपात्रे सौवर्णां प्रतिमां
तु युधिष्ठिर॥ कारयेत्तु यथाशक्त्या वित्तशाठ्यविवर्जितः॥ पीतवस्त्रयुगच्छन्नां पीतयज्ञोपवीतिनीं॥
पूजयेद्गंधपुष्पाद्यैस्ततो होमं समाचरेत्॥ समिधोश्वत्थवृक्षस्य होतव्याष्टोत्तरशतं॥ तिलव्रीहि

यवाज्ये श्रंहोतव्यं च यथाक्रमं॥ बृहस्पते तिमंत्रेण ऋषिछंदसमन्वितः॥ दध्योदनं च नैवेद्यं फलं तांबू
लसंयुतं॥ मंत्रेणानेन कौंतेय सम्यक् सपुतः पुनः॥ नमस्तेंगिरसां नाथ गुरो चार्य बृहस्पते॥ क्रूरग्र
हैः पीडितानाममृताय नमो नमः॥ पूजयित्वा सुराचार्यं पश्चादर्घं निवेदयेत्॥ गंभीर दृढरूपांग देवे
ज्यसुमतप्रभो॥ नमस्ते वाक्पते शांत गृहाणार्घं नमोस्तु ते॥ अर्घमंत्रः॥ अर्घं दत्वा सुरेशाय ऊपहोम
समापयेत्॥ नत्वा यजेत्सुराचार्यं होमपूजादिसंस्कृतं॥ न त्वं गृहाण शांत्यर्थं बृहस्पतेन मो नमः॥ स
र्वसंकल्पमंत्रः॥ मंत्रेणानेन संकल्प्य पश्चात्संप्रार्थन्तरपजीवो बृहस्पतिः सुरिराचार्यो गुरुरं गिराः॥ वा
चस्पतिर्देवमंत्री शुभं कुर्यात्सदा मम॥ प्रार्थनामंत्रः एवं संप्रार्थयेद्देवं आचार्यं च प्रपूजयेत्॥ सर्वोप
चारसंयुक्तां प्रतिमां तां युधिष्ठिर॥ प्रणम्य च गवा युक्तामाचार्याय निवेदयेत्॥ अथाचार्यस्तु नियतो
वेदवेदांगपारगः॥ यजमानं सपत्नीकं शांतविन्नजितेंद्रियं॥ कुंभोदकं गृहीत्वा तु मंत्रैः प्रसिंचयेत्॥

इदमापो ध्यमंत्रेण तमग्निं च मन्यातथा ॥ या ओषधीरथावती: कूष्मांडैश्चाभिषिचयेत् ॥ पश्चात्सं
भोजयेद्विप्रान् यथाशक्त्या युधिष्ठिर ॥ एवं कृत्वा गुरो: पूजां सर्वान्कामानवाप्नुयात् ॥ संक्रांताव
पि कौंतेय तथास्तास्युदयेषु च ॥ कुर्वन् बृहस्पते पूजां अनीदृंफलमाप्नुयात् ॥ संक्रांतौ गुरुसंक्रांतौ
॥ ॥इति गुरुपूजा॥ ॥अथ शुक्रशांति:॥ ॥भविष्ये ॥ शुक्रं ज्येष्टासु संगृह्य क्षमायां नक्तभोजनं ॥
क्षमात्र: ॥ गुरूक्रमक्रम मार्गेण द्विजसंतर्पणेन च ॥ सप्तमे त्वयसंप्राप्ते रौप्यशुक्रां तु कारयेत् ॥ वंश
पात्रे च संस्थाप्य पूजयेत्सितपंकजै: ॥ तद्भावे सितै: पुष्पैस्तांबूलैश्चंदनेन च ॥ अग्रे तस्य प्रदातव्यं
पायसं घृतसंप्लुतं दद्यादनेन मंत्रेण ब्राह्मणाय कुटुंबिने ॥ भार्गवोत्तर्गः शुक्रश्च शुचि: स्रुतिविश्रा
रद: ॥ हित्वाग्रहकृतान् दोषानायुरारोग्यदोस्तु स: ॥ होमघृततिलै: कुर्याच्छुक्रस्य मंत्रवि
त् ॥ समिधोष्टोत्तरशतमष्टाविंशतिरेव वा ॥ होतव्या मधुसर्पिभ्यां दध्ना चैव घृतेन वा ॥ ॥ अथ

प्रतिशुक्रादिशांति: ॥ ॥तत्रैव मात्स्ये ॥ अथात: शृणु भूपाल प्रतिशुक्रस्य शांतये ॥ यात्रारंभे वसाने
च तथा शुक्रोदये सति ॥ शुक्रपूजा प्रकर्तव्या तां निशामय भारत ॥ राजते वाथ सौवर्णे कांस्यपात्रे थवा
पुन: ॥ शुक्रपुष्पांबरयुते श्वेततंदुलपूरिते ॥ निधाय राजतं शुक्रं शुचिमुक्ताफलान्वितं ॥ मत्स्याश्वेतस
मायुक्तं सामगाय निवेदयेत् ॥ नमस्ते सर्वलोकेश नमस्ते भृगुनंदन ॥ देव सर्वार्थसिध्यर्थं गृहाणार्घ्यं
नमोस्तु ते ॥ दत्त्वैवमर्घ्यं कौंतेय प्रणिपत्य विसर्जयेत् ॥ एवं शुक्रोदये कुर्याद्यात्रादिषु च भारत ॥ तन्न तद्व
द्वाचस्पते पूजां प्रवक्ष्यामि युधिष्ठिर ॥ सौवर्णपात्रे सौवर्णममरेज्यपुरोहितं ॥ पीतपुष्पांबरधरं कृ
त्वाथ सर्षपै: पालाशाश्वत्थत्वक्शेन पंचगव्यतिलेन तु ॥ भंगपल्लव: पीतांगरागवसनो घृतहोम
तु कारयेत् ॥ प्रणम्य तांग वासांसि ब्राह्मणाय निवेदयेत् ॥ नमस्ते गिरसो नाथ वाक्पते च बृहस्प
ते ॥ क्रूरग्रहै: पीडितानामभयाय नमो नम: ॥ संक्रांतावपि कौंतेय यात्रास्वथुदयेषु च ॥ कुर्वन्बृह

स्यते तस्य तां सर्वान्कामानवाप्नुयात्॥ अथवा मौक्तिकान्येव सुवर्णानि तु पूर्द्दितिः॥ भार्गवांगिरसौ विं
लं नान्यत्र प्रतिपादयेत्॥ ॥इति शुक्रादिशांतिः॥ ॥अथ शांति राहुकेतुशांतिः॥ ॥ भविष्ये॥
शांतिश्चैव राहुकेतुं॥ लोहपात्रेषु निक्षिपेत्॥ कृष्णागरुः स्मृतो धूपो दक्षिणा चास्य शांतिके॥ यथा
क्रमं शमीदूर्वाकुशानां समिधः स्मृताः॥ सप्तमे लवणं संप्राप्ते न्यूनवर्णान्वा धकारयेत्॥ कृष्णा वस्त्र
युगच्छन्नमेवं कारयेद्बुधः॥ गन्धमाल्यासमालस्य कृष्णा शान्ति विविधं च॥ होमावसानितन्मं सर्वं ब्राह्मण
यो वपाठयेत्॥ शनैश्चर नमस्तेस्तु नमस्ते राहवे तथा॥ केतवे च नमस्तुभ्यं॥ सर्वशांतिप्रसद्धत॥
एवं कृते तत्र वेद्य तत्र तत्क्षिवो धनरूपो नमः॥ यदि जौ मोरविस्तुतो नास्कन्द राहुरणा सद्यः केतुश्च मूर्तिः
तिष्ठति सर्वपीडाकरा ग्रहाः॥ अनेन तु मानत्रेण सर्वशाम्यन्त्युपद्रवाः॥ ॥इति शन्यादिशां
तिः॥ ॥अथ शनिव्रतं॥ ॥ भविष्ये॥ त्रयोः॥ ततो मंदस्य दिवसे स्नात्वा नमस्ये गत्पूर्वकं॥ कार्यं देयं च वि

प्रायतैलम संगहूतवे॥ यस्तु संवत्सरं यावत् शनिदिने नरः॥ तैलं ददाति विप्राणां स्वशक्त्या स्मा स
ज्यते पिवा॥ ततसंवत्सरस्यांते प्राप्ते तस्य दिने पुनः॥ लोहं समर्पितं सौरिं तैलकुंभे विनिक्षिपेत्॥ लोह
बाम्रमये वाथ कृष्णवस्त्रयुगान्वितं॥ कृष्णगो दक्षिणायुक्तं कृष्णकंबलशांतितं॥ स्वयमस्यंगतः स्ना
त्वा कृष्णपुष्पैः समर्चयेत्॥ सुराधिगंधपुष्पैश्च कृशरात्रैस्तिलौदनैः॥ पूजयित्वा सूर्यपुत्रं नमस्वेति
पुनः पुनः॥ कृष्णाय द्विजमुख्याय मदन्नावेनराय च॥ देयः शनैश्चरो नन्त्रसामंत्रेणानेन वैद्विजात्मरा
बलोकनवशात्कवनं नाभाति योग्रहोरुष्टः॥ तुष्टो धनकुसुखं ददाति सोस्मान्कशनैश्चरः पातु॥ यः
पुनर्नष्टराज्याय नराय परितोषितः॥ स्वप्ने ददानिजं राज्यं स मे सौरिः प्रसीदतु॥ कोणांनीलांजनप्रख्यं
मंदचेष्टाप्रसारिणं॥ छायामार्तंडसंभूतं नमस्यामि शनैश्चरं॥ नमोर्कपुत्राय शनैश्चराय नीहारवर्णां
जनमेचकाय॥ श्रुत्वा रहस्यं भवकामदस्त्वं फलप्रदो मे भव सूर्यपुत्र॥ नमोस्तु प्रेतराजाय कृष्णदे

स्थाय वै नमः॥ शनैश्चराय क्रूराय शुद्धबुद्धिप्रदायिने॥ य एभिर्नामभिः स्तौति तस्य तुष्टिं ददात्य
सौ॥ तदीयं तु भयं तस्य स्वप्नेपि न भविष्यति॥ स्कांदे॥ श्रावणे मासि संजाते शनौ नने शनिवासरे
लोहरूपं शनिं कृत्वा स्थाप्यं पंचामृते न वै॥ पुष्पैरष्टविधैर्धूपैः फलैश्चैव विशेषतः॥ नामभिः पू
जयेदेतैः क्रमेणायदृशत्रमे॥ कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोंतको यमः॥ सौरिः शनैश्चरो मंद
पिप्पलादेन संस्तुतः॥ शत्रोदेवीति सर्वत्र वैदिकेन च पूजयेत्॥ पूजयित्वाथ नैवेद्यं ततः कुर्यात्कृ
सरान्नं॥ समाषन्नकं प्रथमे द्वितीये पायसं शुभं॥ तृतीये त्वबलिकार्या चतुर्थे पूरिकाः शुभाः॥ अं
बिली नक नेदुं न पिष्टादिनिर्मितो लेह्यविशेषः॥ इति शनिव्रतं॥ अथ शनिस्तोत्रं॥ ॥ ततः कृतां
जलिर्भूत्वा शनिचक्रे सबालकः॥ पिप्पलादो द्विजश्रेष्ठः प्रणिपत्य मुहुर्मुहुः॥ नमस्ते कोणसंस्था
य पिंगलाय नमोस्तु ते॥ नमस्ते बभ्रुरूपाय कृष्णाय च नमोस्तु ते॥ नमस्ते रौद्रदेहाय नमस्ते चां राम
६४

तकाय च॥ नमस्ते यज्ञसंज्ञाय नमस्ते सौरये विभो॥ नमस्ते मंदसंज्ञाय शनैश्चर नमोस्तु ते॥ प्रसादं कु
रु देवेशा दीनस्य प्रणतस्य च॥ शनैश्चर उवाच॥ ॥ परितुष्टोस्मि ते ब्रह्मन्स्तोत्रेणानेन सांप्रतं॥ वरं व
रय भो ब्रह्मन्येन यच्छामि वांछितं॥ पिप्पलाद उवाच॥ ॥ अद्यप्रभृति नो पीडा बालानां रविनंदन॥ त्वया
कार्या महाभाग न स्वकीया कथंचन॥ यावद्द्वाषष्टिकं जातं मम बाह्येन सूर्यज॥ स्तोत्रेणानेन योत्यस्त्वद्भ
यात्प्रातरुपस्थितः॥ तस्य पीडा न कर्तव्या त्वया भास्करनंदन॥ तस्य पीडा न कर्तव्या देयो वा नो महाभुज॥
अर्द्धाष्टमिकया भोगे तावके संस्थिते नराः॥ सार्द्धसप्तवर्षपर्यंत द्वादशजन्मद्वितीयराशित्रियः शनैश्चरयोगः
सोर्द्धाष्टमिकयायोग इत्युच्यते॥ तवावरे तु संप्राप्ते यस्तिलान्लोहसंयुतान्॥ नरःश्राद्धाद्ददाति नो तस्य पीडा का
र्या त्वया विभो॥ कृष्णां गां यस्तु विप्राय तवोद्देशेन यच्छति॥ अर्द्धाष्टमिकया(पी) तस्य कार्या त्वया न च॥
शमीसमिद्भिर्यो लोहं तवोद्देशेन निर्वपेत्॥ तथा कृष्णतिलैश्चैव कृष्णपुष्पानुलेपनैः॥ पूजां करो

डाक्टर भाऊदाजी इत्याख्य स्मारकम् MEMORIAL

तियस्तुस्यं रूपं वा गुग्गुलं ददेत् ॥ स्वस्य वस्त्रेण संवेष्ट्य त्यातस्य त्वयाव्यथा ॥ सूत उवाच ॥ ॥ ए
वमुक्तः ज्ञानिस्तेन बाढमित्येव जल्पच ॥ नारदं समनुज्ञाप्य जगाम निजसंश्रयं ॥ ॥ इति ज्ञानेश्वरसं
शांतिः ॥ ॥ अथार्कविवाहप्रयोगरत्ने ॥ ॥ तृतीयां मानुषीं नैव चतुर्थीं यः समुद्वहेत् ॥ पुत्रपौत्रा
दि सपन्नकुटुंबी साग्निको ज्वरः ॥ उद्वहेदिति सिध्यर्थं तृतीयां तक दाचनः ॥ मोहादज्ञानतो वापि य
दि यच्छेत्तु मानुषीं ॥ नश्यत्येव न संदेहो गर्गस्य वचनं यथा ॥ तत्र वसंग्रहे तृतीयां यदि चोद्वहे
त् हिंसा विधवा भवेत् ॥ चतुर्थ्यादि विवाहार्थं तृतीयेऽर्कं समुद्वहेत् ॥ आदित्य दिवसे वापि हस्ते वै
वा शनैश्चरे ॥ शुद्धे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकं ॥ व्यासः ॥ स्नात्वा लंकृतवासास्तु रक्तगंधादि
भूषितः ॥ सपुष्पफलनम्राग्रे श्वार्कगुल्मं समाश्रयेत् ॥ सद्लक्षणेन संयुक्ते अर्कसंस्थाप्य यत्नतः ॥ अ
र्कं कन्याप्रदानार्थमाचार्यं कल्पयेत्पुरा ॥ अर्कसंनिधिमागत्य तत्र स्वस्त्यादि वाचयेत् ॥ नांदीश्रा

द्धं हिरण्येन अथ वर्गान्प्रपूजयेत् ॥ पूजयेन्मधुपर्केण वरं विप्रस्य हस्ततः ॥ यज्ञोपवीतं वस्त्रं च यस्
स्त कर्णादि भूषणं ॥ उष्णीषं गंधमाल्यादि वराया सै प्रदापयेत् ॥ स्वशाखोक्तप्रकारेण मधुपर्क
समाचरेत् ॥ आस्ते ॥ याम्यास्त्रा चामुद्रीं च वा सुपुष्पफलसंयुतां ॥ परिस्थयत्नतो धस्तास्थं डिलादि
यथाविधिः कुर्यादिति शेषः ॥ कृत्वार्कपुरतस्तिष्ठन्प्रार्थयेत द्विजोत्तमः ॥ त्रिलोकवासिन् सप्ताश्व छा
यया सहितो रवे ॥ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु ॥ तत्राध्यारोपि देवत्वा छायया सहितं र
विं ॥ वस्त्रैर्माल्यैस्तथा गंधैस्तन्मंत्रेणैव पूजयेत् ॥ तत्रैव श्वेतवस्त्रेण तथा कार्पाससंतुभिः ॥ गंधपु
ष्पैः सम्यगर्चांनि लिंगैरभिषिच्य च ॥ गुडोदनं तु नैवेद्यं तांबूलं च समर्पयेत् ॥ व्यासः ॥ अर्कं प्रदक्षिणी
कुर्वन्नूजपेन्मंत्रमिमं बुधः ॥ मम प्रीतिकरो येयं मया सृष्टा पुरातनी ॥ अर्कजा ब्रह्मणा सृष्टा अस्मा
कं प्रतिरक्षतु ॥ पुनः प्रदक्षिणी कुर्यान्मंत्रेणानेन मंत्रवित् ॥ नमस्ते मंगलदेवि नमः सवितुरात्मजे ॥

आदिमं रूपयादेविपत्नी त्वं मे उदागता॥ अर्के त्वं ब्रह्मणा सृष्टा सर्वप्राणिहिताय च॥ वृक्षाणामा
दिभूतस्त्वं देवानां प्रीतिवर्द्धनः॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय॥ ततश्च कन्यावर
णात्रिपुरुषं कुलमुच्चरेत्॥ आदित्यसविता चार्कपुत्री पौत्री च नप्त्रिका॥ गोत्रे काश्यपमित्युक्ते
लोके लौकिकमाचरेत्॥ सुमुहूर्ते निरीक्ष्य तु स्वस्तिसूक्तमुदीरयन्॥ आशीर्भिः सहितैः कुर्यादाचा
र्यप्रमुखैर्द्विजैः॥ अथ चार्यं समाहूय विधिना तन्मुखाद्बुतां॥ परिगृह्य ततो होमं गृह्योक्तविधिना
चरेत्॥ व्यासः॥ अर्ककन्यामिमां विप्र यथाशक्ति विभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र स
माश्रयेत्॥ अंगलग्नकृतकर्माणि कृत्वा कंकणपूर्वकं॥ यावत्त्वं चावृतस्तत्र तावदेकं प्रवेशयेत्॥
स्वशाखोक्तेन मंत्रेण गायत्र्या वाथ वा जपेत्॥ पंचोक्तस्य पुत्रस्तत्रैकं धेबध्नातिमंत्रतः॥ भूरुसा
मेतिमंत्रेणस्तत्ररक्षां प्रकल्पयेत्॥ अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा॥ कुंभांश्च निक्षिपेत् राम
६६

पश्चादाग्नेयादिचतुष्टये॥ सवस्त्रं प्रतिकुंभं च त्रिसूत्रेणैव वेष्टयेत्॥ प्रतिकुंभं महाविष्णुं संपूज्य परमे
श्वरं पाद्यार्घ्यादिनैवेद्यांतं कुर्यान्नियोगं च मंत्रवित्॥ अत्र शौनकोक्तहोमप्रकारः॥ तृतीयस्त्रीविवाहे
तु संप्राप्ते पुरुषस्य तु॥ अर्कविवाहं वक्ष्यामि शौनकोहं विधानतः॥ अर्कसंनिधिमागत्य तत्र स्वस्ता
दिवाचयेत्॥ नांदीश्राद्धं प्रकुर्वीत स्थंडिलं च प्रकल्पयेत्॥ अर्कमभ्यर्च्य सौर्यं च गंधपुष्पाक्षतादिभिः॥
सूर्यास्त्वयं देवत्ययेः॥ सचाभावृत्तिनया॥ स्वयं बालं कृतस्तद्वद्ब्रह्ममात्यादिभिः शुभैः॥ अर्कस्योत्तरदे
शे पुसमन्वारब्धपतया॥ एतया अर्ककन्यया॥ उच्छ्वेखनादिकं कुर्याद्॥ धारानमतः परं॥ अस्या कु
तिं च जुहुयात् संगो निरनयेकया॥ वसैः त्वत्कामकामाये स्वे तयाचितितः परं॥ व्यस्तानि समस्ता
नि ततश्च विष्टकृत्त्वे तु॥ परिषेचनपर्यंत मयाश्चेत्यादिकं क्रमात्॥ प्रार्थनामंत्रादि विषयेमाह
व्यासः॥ पुनः प्रदक्षिणीकृत्य मंत्रमेतमुदीरयेत्॥ मया कृतमिदं कर्मस्थावरेषु जरायुणा॥ अर्क

त्यानि नो देहि तत्सर्वं त्वं तु मर्दसी तु त्वा शांतिसूक्तानि जप्त्वा तं विसर्जयेत्पुनः गोयुग्मं दक्षिणां द
द्यादाचार्याय च भक्तितः ॥ तत्सर्वं गुरवे दद्यादंते पुण्याहमाचरेत् ॥ ॥ अथ प्रयोगः ॥ ॥ तृतीयवि
वाहात्प्राग्दिनचतुष्टयाधिकमवहिते रविवारे शनिवारे हस्तनक्षत्रे शुभे दिने नरेवा ग्रामवि
त्प्राच्यामुदीच्यां वा पुष्पफलयुतार्कोधस्तात्स्थंडिलं कृत्वार्कपश्चिमतउपविश्य मासपक्षाद्यु
ल्लिख्य मम तृतीयमानुषीविवाहजदोषापनुत्यर्थं अर्कविवाहं करिष्य इति संकल्प्य गणेशपूजा
स्वस्तिवाचनमातृपूजनवृद्धिश्राद्धाचार्यवरणानि कुर्यात् ॥ तत्र वृद्धिश्राद्धं हेम्ना अथाचार्येणार्
जितो वरः ॥ त्रिलोकवासिन सप्ताश्वच्छायया सहितो रवे ॥ तृतीयोद्वाहजं दोषं निवारय सुखं कु
रु ॥ इत्यर्कं संप्रार्थ्य कं आवृक्षेनेति छायासहितं रविमावाह्य श्वेतवस्त्रसूत्राभ्यामावेष्ट्य संपूज्य
पाहि ष्टे त्यादिभिर्पिच्छगुडौदनं तांबूलादि समर्प्य प्रदक्षिणां कुर्वन् मम प्रीतिकरायेयं मया राम ६७

सृष्टा पुरातनी अर्कं ब्रह्मणा सृष्टा अस्माकं परिरक्षत्विति पठेत् ॥ द्वितीयप्रदक्षिणायां तु नम
स्ते मंगले देवि नमः सवितुरात्मजे ॥ त्राहि मां कृपया देवि पत्नीत्वं मे इहागता ॥ अर्कत्वं ब्रह्मणा सृष्टः
सर्वप्राणिहिताय च ॥ वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः ॥ तृतीयोद्वाहजं पापं मृत्युं चाशु
विनाशयेति ॥ ततआचार्येण मासपक्षाद्युल्लिख्य काश्यपगोत्रामादित्यपुत्रीं सवितुः पौत्रीं अर्कस्य
प्रपौत्रीमिमामर्ककन्यामित्युक्ते वरः स्वस्ति न इन्द्रो वृद्धश्रवा इति सूक्तं पठन्नर्कं निरीक्षेत ॥ ततआचा
र्यो विप्रे सहाग्निपाद त्वामुकगोत्रायामुकशर्मणे संप्रददे इत्यर्ककन्यां दत्वार्ककन्यामिमां विप्रय
थाशक्ति विभूषितां गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रयेति पठेत् ॥ वरस्तु यज्ञो मे कामः समृध्यतामि
ति ॥ प्रथमां च मे मे इति द्वितीयां यशो मे इति तृतीयामिति त्रीन् हुतांजलीन् अर्कोपरि क्षिप्त्वा गाय
त्र्या परित्वे त्यादिना चा ॥ पंचावृतास्सूत्रेणार्कमावेष्ट्य तत्सूत्रं पुनः पंचगुणं कृत्वार्कस्य स्कंधे बध्नीयात् ॥

मतिरक्षांपरिकल्प्यकर्कस्यदिग्विदिक्षुअष्टौकुंभान्संस्थाप्यवस्त्रेणत्रिःसूत्रेणचावेष्ट्यहरिद्रागंधा
द्यंतःक्षिप्त्वातेषुसाम्नामरुद्विष्णुमावाह्यषोडशोपचारैःसंपूज्यस्थंडिलेग्निंप्रतिष्ठाप्यआघारा
वाज्येनेत्यंतमुक्त्वात्रप्रधानंबृहस्पतिमग्निंवायुंसूर्यंप्रजापतिंचाज्यशेषेणास्यहुत्वाघारांते
संगोभिरंगिराबृहस्पतिस्त्रिष्टुप्‌अर्कविवाहहोमेविनियोगः॥ॐसंगोभिरांगिरसोनक्षमाणोभग
इवेदर्यमणंनिनाय।जनेमित्रोनदंपतीअनक्तिबृहस्पतेवाजयाशूरिवाजौस्वाहाबृहस्पतयइ
दंनममेतित्यजेत्॥यस्मैत्वावामदेवोग्निस्त्रिष्टुप्विनियोगः॥प्राग्वत्‌ॐयस्मैत्वाकामकामायवयंस
म्राड्यजामहे।तमर्कस्मभ्यंकामंदत्वाप्येदंघृतंपिबस्वाहाअग्नयइदं।ततोव्यस्तसमस्तव्याहृतीर्हु
त्वास्विष्टकृदादिकर्मशेषंसमाप्यार्कंप्रदक्षिणीकृत्यमयाकृतमिदंकर्मस्थावरेषुजरायुणा।अ
र्कापत्यानिनोदेहितत्सर्वंक्षंतुमर्हसीतिप्रार्थ्याचार्यायगोयुग्ममन्येभ्यश्चविप्रेभ्योयथाशक्ति

दक्षिणांदत्वाशांतिसूक्तंजापयित्वापूज्योपस्करानाचार्यायदत्वादिनचतुष्टयमग्निकुंभांश्चरक्षेत॥
कुंभेषुमरुद्विष्णुपूजयेत्॥पंचमदिनकृत्यंब्राह्मे॥चतुर्थदिवसेतीतेपूर्ववत्तांप्रपूज्यच॥विसृज्यरो
ममग्निंचविधिनामानुषीपरां॥उद्वहेदन्यथानैवपुत्रपौत्रसमृद्धिमान्॥ ॥इतिश्रीमन्नीलकंठ
कृतेभास्करेशांतिमयूखेऽर्कविवाहः॥ ॥अथरजोदर्शनशांतिः॥ ॥नारदः॥कुलीरवृषचापांत्यनृयु
कन्यातुलाघटाः॥राशयःशुभदास्तेषानारीणांप्रथमार्तवं॥कुलीरःकर्कः॥चापंधनुः॥अंत्योमीनः
नृयुङ्मिथुनंघटःकुंभः॥स्मृतिचंद्रिकायां॥शुक्लपक्षेसुशीलास्यात्कृष्णेसाकुलटाभवेत्॥कृष्ण
स्यदशमीयावन्मध्यमंफलमादिशेत्॥तथानत्रैव॥अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि॥प
रिघस्यचपूर्वार्धेव्यतीपातेचवैधृते॥संध्यासूपप्लवेविष्ट्यामशुभंप्रथमार्तवं रोगापतिव्रताः
दुःखीपुत्रिणीभोगभोगिनी॥पतिव्रताक्लेशापुत्रासूर्यवारादिषुक्रमात्॥कश्यपपरस्तु॥अष्टमी

षष्ठ्यामारिक्ता द्वादशी संक्रमेपि वा॥ वैधृतौ च व्यतीपाते ग्रहणे चंद्रसूर्ययोः॥ विष्ट्यां संध्या
सु तिथ्यायां दुर्भगा प्रथमार्तवान क्षत्रफलमाह॥ गर्गः॥ सुभगा चैव दुःशीला वंध्या पुत्रसमन्वि
ताः॥ धर्मयुक्ता व्रतघ्नी च सरसे तानमोदनी॥ सुपुत्रा चैव दुःपुत्रा पितृवेश्मरता सदा॥ दीना
प्रजावती चैव पुत्राद्या चित्रकारिणी॥ साध्वी पतिव्रता नित्यं सपुत्रा कष्टचारिणी॥ स्वकर्म
निरतादिस्या पुण्या पौत्रादि संयुता॥ नित्यं धनकथासक्ता पुत्रधान्यसमन्विता॥ सुखा प्राज्ञा
गुणवती दस्राद्धीढेः क्रमात्फले॥ स्मृतिरत्ने॥ सुतं चैव तु पूर्वाह्णे मध्याह्ने मध्यमं फलं॥ अप
राह्णे च वैधव्यं पूर्वरात्रे सुतं भवेत्॥ मध्यरात्रे तु संध्यास्वापररात्रे सुतान्विता॥ कश्यपः मलि
नांमंदवारे तु रात्रावपि तथैव चेति॥ स्मृत्यंतरे मध्याह्ने तु भवेद्दंध्या निशीथे विधवा भवे
त्॥ तथा॥ अमासंक्रांतिविष्ट्यां च व्यतीपाते च वैधृतौ॥ परिघस्य तु पूर्वार्द्धे षट्स्वरगंडाति

गंडयोः॥ व्याघाते नवशूले तु नाड्याः पंचतुर्दशीने॥ वैधव्यं धनहानिं च सुतनाशं मरुन्मये॥ वैधव्यं
मात्रुवृद्धिं च दारिद्र्यं क्षीणजीवनं॥ तेजो हानिप्रमायाति सदा पुष्पवती क्रमात्॥ स्थलभेदे फलभे
दमाह॥ ग्रामाद्बहिः परिग्रामे वेश्या चेद्व्यभिचारिणी॥ पतिव्रता पतिस्थाने सुशीला गृहमध्यके॥
ग्राममध्ये तु वृद्धिश्च विधवा च दिगंबरा॥ परागारे च दुःशीला आयुष्यं जलसंनिधौ॥ वनमध्ये तु क
न्याया धनधान्यसमृद्धिदा॥ परागारइत्यनेनैव पितृगृहं निषिद्धं॥ तथा च त्रिशाचारः॥ विश्लोव नि
षेधस्तु न धस्तुन न दृश्यते॥ तथा चंद्रेसगुणं संयुक्ते देवरातमताच्छुतं॥ शाबाल्ये चेपितृश्रुत्तमि
तिगुरवः॥ वस्त्रफलमाह वसिष्ठः॥ सुभगा श्वेतवस्त्रा स्याद्दृढवस्त्रा पतिव्रता॥ क्षौमवस्त्रा क्षिती
शा स्यान्नववस्त्रा सुखान्विता॥ दुर्भगा जीर्णवस्त्रा स्याद्रोगिणी रक्तवाससा॥ नीलांबरधरा नारी
विधवा पुष्पिता यदि॥ मलिनांबरनो नारी दरिद्रा स्याद्रजस्वला॥ रजोबिंदुफलमाह सराव॥ वस्त्रे

MEMORIAL

स्युर्विषमारके बिंदवः पुत्रमाप्नुयात्॥ समाश्चेत्कन्यकाश्चेतिफलंस्यात्प्रथमात्रिवे॥ देवरातः॥ संमा
र्जनीकाष्ठदशाग्निशूर्पान्निदर्दस्तदधानाकुलटातदास्यात्॥ तस्योपयोगेनपतिस्थिताचेदपरंरजो
नाप्यवतीतदास्यात्॥ नारदः॥ तिथ्यर्क्षवारातिंथ्याश्चेत्तच्छोककर्मनिवारयेत्॥ दोषाधिकेगुणाल्प
त्वेतत्रापिनकारयेत्॥ दोषाल्पत्वेगुणाधिक्येशोककर्मसमाचरेत्॥ तिथ्यर्क्षतिथिवारेषुयदिपु
ष्पंप्रदृश्यते॥ तत्रशांतिंप्रकुर्वीतघृतदूर्वातिलाक्षतैः॥ प्रत्येकंशतमष्टौचगायत्र्याजुहुयात्ततः॥
स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये॥ नर्तनंत्वभिगमनंवर्जयेत्प्रसादर्शनात्॥ वसिष्ठोपि॥
प्रसूतदोषंपरिदृश्यतेतत्पुष्पंततःशांतिककर्मकार्यं॥ विवर्जयेदेवनदीकराम्भोयावद्द्विजोदर्शन
मत्पदस्ते॥ शौनकः॥ आर्त्तवानांतुनारीणांशांतिंवक्ष्यामिशौनकः॥ तिथिवारर्क्षयोगेष्वोल्पं
चसमवांशके॥ प्रदुष्टेदुःस्थितेस्पष्टतद्दोषक्षययायच॥ अत्रपुत्रस्यजातायदंपत्योरनिवृद्ध

ये॥ पंचमेह्निचतुर्थेवागृह्ययज्ञपुरस्सरं॥ तस्मिन्नहनिकर्तव्यमृतुहोमविधानतः॥ आचार्यंवरयेत्प्रा
तःपुण्येस्वरितुष्टये॥ होमार्थंचजपार्थंचवरयेदृत्विजोबहून्॥ यजमानोद्विजैःसार्द्धंशांतिहोमं
समाचरेत्॥ गृहादीशानदिग्भागेदेगताम्रजनायच॥ द्रोणप्रमाणधान्येनव्रीहिराशित्रयंन्यसेत्॥
कुंभत्रयंन्यसेत्ताश्वतंतुवस्त्रादिवेष्टितं पूरयेत्तीर्थसलिलैःप्रतिकुंभंपृथक्पृथक्॥ सूत्रेणावेष्टनंकूर्चेनप्र
सूचपल्लवपंचकं॥ रुचायाप्रचतद्दयत्र्याचततःक्रमात्॥ मध्यकुंभेन्यसेत्सर्वौषधानिचदेस
र्व॥ ततश्वपंचरत्नानिगंधपुष्पाक्षतायुतान्॥ औषधानिचवक्ष्यंतेमुनिभिःशांतिकारणात्॥ औ
दुंबरंकुशादूर्वाराजीवंबेपठिल्वका॥ विष्णुक्रांताथतुलसीबर्हिषंशंखपुष्पिकाशतावर्यश्वगंध
चनिर्गुंडीसर्षपद्वयं॥ अपामार्गपलाशाश्वपनसोजीवकस्तथा॥ प्रियंगवश्चगोधूमाव्रीहयोश्वत्थ
एवच॥ क्षीरंचदधिसर्पिश्वश्रीपर्णचतथोत्पलं॥ करंटकश्वगुंजाचवचचनखाचमुस्तकान्॥ इति॥ श्री

श्राम
७२

त्रिंशाद्दोषधात्रीरुगायत्र्यासर्वमाहरेत्॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥ राजद्वार
प्रदेशाच्च मृदमानीयनिक्षिपेत्॥ कुंभस्थापनमित्येतन्मंत्रेणाकारयेत्॥ मृत्तिका चौषधी
दीतिमंत्रेणप्रक्षिपेत्क्रमात्॥ कुंभोपरिन्यसेत्पात्रं कांस्यं वा ताम्रमेव वा॥ मृन्मयं वेणुपात्रं वा
स्वस्ववित्तानुसारतः॥ पात्रोपरिन्यसेद्वस्त्रं प्रतिमां भुवनेश्वरीं॥ तन्मध्ये वा न्यसेत्पात्रं कांस्यं वा
ताम्रमेव वा इंद्राणीं च पुरंदरं॥ आचार्यः पूजयेद्देवीं गंगायां वा वारणां तिच॥ अन्यांश्च पूजनं तं कु
र्या॥ गायत्र्यामंत्रसारया॥ इंद्राणीं पूजयेद्देवीमिंद्राणीमासुमारिपु॥ क्रमेण पूजयेद्दिंद्र सिद्धकौ
लं वृषं जलं॥ अनेन विधिना चापि पूजयेद्देवतात्रयं॥ आवाहनादिभिः सर्वैरुपचारैः पृथक्
पृथक्॥ तन्मध्ये मं स्पृष्ट्वा तत्कुंभं मंत्रेण भुवनेश्वरीं॥ जपेदाचार्यहोमान्तं श्रीसूक्तं च जपेत्ततः
स्पृष्ट्वान्वेदक्षिणं कुंभं च क्षात्विगेकोजपेदथ॥ चत्वारि सूक्तानि चतुर्मंत्रोत्तराणि च॥ संस्पृशन्तु

राम
७२

त्तरं कुंभं श्रीरुद्रं रुद्रसंख्यया॥ शांतये इंद्रायै श्रीसूक्तं तत्रैव स्पृष्ट्वा तज्जपेत्॥ कुंभस्य पश्चिमे देशे शां
तिहोमं समाचरेत्॥ अन्वाधानं ततः कुर्यात्होममंत्रं समाचरेत्॥ पूर्णपात्रनिधानांतं कृत्वा कार्यौ
हजौ सह॥ दूर्वाभिस्तिलगोधूमैः पायसेन घृतेन च॥ पायसं श्रपयेत्तत्र सावित्रं च हविष्यतत्॥ सहू
त्यन्नागपर्यंतेह विरुद्धासनादिकं॥ तिसृभिश्चैव दूर्वाभिरेकैकाहुतिरनवेत्॥ अग्निमंत्रप्रयुक्ताभि
गायत्रीजुहुयात्क्रमात्॥ अष्टोत्तरसहस्रं तु शतमष्टोत्तरं तु वा॥ तिलमिश्रैश्च गोधूमैर्द्रव्यैनाज्या
हुतीर्भवेत्॥ जुहुयात्पायसेनैव आज्येन च हुनेत्क्रमात्॥ तद्धविश्चतुष्टयेनैव प्रत्येकं वाग्नसंख्य
या॥ गायत्र्या चैव होतव्यद्हविरत्रचतुष्टयं॥ ततः स्विष्टकृतं कृत्वा रक्षाप्रहरणं तथा॥ आयाश्चेत्यादि
भिर्हुत्वा समुद्रादूर्मिस्तु क्रतः॥ सततामाज्यधारां तां पूर्णाहुतिसमाचरेत्॥ परिषेचनपर्यंतं होमं
शेषं समापयेत्॥ महौषधिस्थितैस्तत्र प्रतिकुंभस्थितोदकैः॥ स्नातुमत्यास्त्रियाः शांतिदं पतिस्योस्तु

ग्रां·म
१२

स्नायच। अथाभिषेकमंत्राश्च प्राप्यंते शौनकादिभिः॥ त्रियंबिकेनमंत्रेण जातवेदसएकया॥
समुद्रज्येष्ठइत्यादिचतुर्थाश्च प्रसिद्धा ह्यकैः॥ तायंताभिश्च मंत्रैश्च त्रिभिश्चापि यथाक्रमं॥ इ
मा आपस्तवेनेवदेवस्य त्वेति मंत्रतः॥ मंत्रेणाथ नमीशाने त्वमग्ने रुद्र इत्यथ॥ जमुष्टह्येतिमं
त्रेण भुवनस्य पितुस्तथा॥ यातरुद्रेतिमंत्रेण शिवसंकल्पमंत्रतः॥ इंद्रत्वावृषभंवयं मंत्रैश्चै
वाभिषेचयेत्॥ साचवस्त्रांतरं धृत्वा पुनश्चैवोपवासिनी॥ उपवासोत्र समीपावस्थानं॥ विप्रा
नभ्यर्च्यविधिवत्पुष्पधूपाक्षतादिभिः॥ धेनुंपयस्विनींदद्यादाचार्यायचभूषणैः॥ सदक्षिण
मनड्वाहं प्रदद्याद्रुद्रजापिने॥ ऋत्विग्भ्यश्चाथ सर्वेभ्यो दद्याद्वै दक्षिणां ततः॥ ततः सदा शांतिं प्रज
प्त्वाथ विप्राशीर्वाचनं ततः॥ ब्राह्मणान्भोजयेच्चैव भुंजीयात्स्वजनैः सह॥ स्मृतौ॥ ब्राह्म
णान्भोजयित्वा तु दैवज्ञं भोजयेत्तमः॥ एवं यः कुरुते शांतिं शौनकोक्तप्रकारतः॥ तदनिष्टं तु राम १२

सकलं सर्वं वापि विनश्यति॥ ॥इति शौनकोक्तरजोदर्शनदोषशांतिः॥ ॥अथ प्रयोगः॥ ॥क
र्ता देशकालौ स्मृत्वा मम पत्न्याः प्रथमरजोदर्शने अमुकदुष्टमासादिसूचितारिष्टनिरसनार्थं
शांतिं करिष्य इति संकल्प्य॥ गणेशपूजनस्वस्तिवाचनमातृकापूजनाभ्युदयिकाचार्यर्त्विग्वर
णानि कुर्यात्॥ अथाचार्यो ग्रहशांत्याप्रत्येकं मंत्रावृत्त्या पदार्थानुसमयेन कुंभत्रयं स्थापयेत्॥
तद्यथा॥ महीद्यौरितिमध्ये तद्दक्षिणोत्तरतश्च स्पृष्ट्वा यजुषध इतिस्पर्शः॥ क्रमेण तेषु स्थानेषु प्रोणप्र
मान्व्रीहीन्राशीकृते नैव क्रमेण राशित्रये आकलशेष्विति कुंभत्रयं संस्थाप्य मध्ये प्रसुपआपइ
ति नवभिः॥ तद्दक्षिणे याः प्रवतइत्यष्टाचात्तदुत्तरे गायत्र्या जलं क्षिप्त्वा त्रिषु गंधद्वारामिति गंधं या
ओषधीरिति सर्वौषधीः औषधयः॥ समिति यवान्क्षिप्त्वा मध्यम एव यवव्रीहितिलमाषकंगुश्यामाक
मुद्गान्क्षिप्त्वोदुंबरकुशदूर्वारक्तोपलवयविल्वविल्वपत्रांतानतुलसीबर्हिणस्वपुष्पाणां तावयश्च

गंधा निर्गुंडी रक्तपीतसर्षपा मामार्गपलाशपनसजीवकप्रियंगुगोधूमव्रीह्यश्वत्थदधिदुग्धघृतप
ञ्चपत्रनीलोत्पलसितरक्तपीतकुरंटकगुंजावचानंद्यमुस्तकाख्या तिथित्रिंशद्दोषधानि यथासं
भववा क्षिप्त्वा त्रिसुदूर्वापंचपल्लवसप्तमृत्तिकाफलपंचरत्नसुवर्णानि क्षिप्त्वा युवासुवासा इति
वाससा सूत्रेण वा कुंभकं गलवेष्टयित्वा गंधादिभिरलंकृत्य पूर्णादिवीनियवादिपूर्णपात्राणि
निधापयेत् सुसाष्टदलस्थे तं वस्त्रत्रयं न्यस्य मध्यमे गायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री भुवने
श्वर्यावाहने विनियोगः ॥ तत्सवितुरिति ॥ भुवनेश्वरी तद्दक्षिणे कुंभे इंद्राणी वृषाकपिरिंद्राणी
पंक्तिः इंद्राणी वाहने इंद्राणी मास्विति इंद्राणीं उत्तरकुंभे रुद्र त्वा विश्वामित्र रुद्रो गायत्री रुद्रावाहने
त्वेतीदं प्रतिमासु स्थाप्य षोडशाभिः पंचभिर्वोपचारैरभ्यर्च्य मध्यमे सहस्रमष्टशतं वा गाय
त्री श्रीसूक्तं च जपेत् ॥ तत एकर्त्विक् दक्षिणकुंभे रुद्रसूक्तानि जपेत् ॥ कद्रुद्रायेति न वर्चस राम ७३

घोरः कण्वो रुद्रो गायत्री यजुस्त्वे इमा रुद्राय तवस इत्येकादशर्चस्य कुत्सो रुद्रो जगत्यो द्वि
तुस्तु तौ जये त्रा ते पितरिति दशर्चस्य गृत्समदो रुद्रस्त्रिष्टुप् जये इमा रुद्राय स्थिरधन्वने इति च
तसृणां वसिष्ठो रुद्रः ॥ अथान्य ऋत्विगुत्तरकुंभे एकादशावृत्तिरुद्रसूक्तं शतरुद्रांगानीति पंचदशर्चं
पेत् ॥ अथाचार्यः कुंभपश्चिमेऽग्निप्रणीपूर्तदीक्षान्ते ग्रहस्थापनादिपूजां तं कृत्वा तदीशान्या
मेककुंभं स्थाप्य तत्र वरुणावाहनादिपूजां तत्कृत्वान्वाधमेत् ॥ तत्रास्मिन्नन्वाहितेऽग्नावित्यादि च
क्षुषी आज्येनेत्यंतमुक्त्वा भुवनेश्वरीमिंद्राणीमिंद्रं च प्रत्येकममुकसंख्यया ॥ दूर्वातिलमिश्रयो
मपायसानां ग्रहांश्चामुकसंख्यया समित्तिलाज्यैः शेषेण स्विष्टकृतमित्यादि यक्ष्ये इत्यंतमुक्त्वा
परिस्तरणाद्याघारान्तं कृत्वा यजमानेनांगप्रधानदेवताभ्यो दिह्वेताभ्य इदं न मम इति
क्तेऽग्निमीळेति सहस्रावृत्त्या ध्यानक्रमेण जुहुयात् ॥ अन्ते तु गायत्र्यैव तु होतव्यं द्विरत्र चतुष्टयं ॥ ततः स्वि

स्रुवं हुत्वेत्यत्रैशान्यांग्रहयोर्होमानभिधानात्॥ ततयोर्होमोन्वाधानेवाकीर्तनमित्याहुः तिस्रोऽ
गत्योन्यात्रिष्टुप्जयोः॥ ततः स्विष्टकृदादिबलिदानांतं कृत्वा समुद्रादूर्मिरिति त्र्यृचेन पूर्णाहुतिं हु
त्वा प्रणीताविमोकं कृत्वा ऋत्विग्भिः सदस्यैराचार्ययजमानं कुंभोदकेनाभिषिंचेत्॥ तत्र मंत्राः॥ आपो
इष्टेति नवऋचः॥ यएकद्विपदद्यइति त्रिस्तुंदेवेति ७ ऋचः॥ अज्ञयश्रुएवञ्चेति नेत्वस्त्रिदा वि
यमिति॥ त्र्यंबकमिति जातवेदसइति॥ समुद्रज्येष्ठाइति ४ ऋचा त्रायंतामिति ३ ऋचः॥ इमा आप
इति ३ ऋचः॥ देवस्यत्वेति त्रिमंत्रैः नमो ब्रह्मनेजगतः त्वमग्ने ८ रुद्रइत्येकं यजुः॥ तमुष्टुहि त्रिभुवनस्य
पितरं यातेरुद्रेति॥ यज्ञाग्रतइति॥ एतेयाजुषाः॥ इंद्रत्वावृषभं वयमिति ५ ऋचः॥ सुरास्त्वामभि
षिंचंतु इत्याद्याः ए पौराणाः॥ एवमभिषिक्तः सुस्नातो धृतशुक्लवासाः सपत्नीको यजमानोऽग्नि
माचार्यादीश्च संपूज्याचार्याय धेनुं ब्रह्मणे कृत्विग्भ्यश्च यथाशक्ति दक्षिणां रुद्रजापिने सदक्षि

MEMORIAL

णामनड्वाहं स्वयमसौ च दत्वा ग्रहपीठदेवतानां भुवनेश्वर्यादीनां चोत्तरपूजां कृत्वा यांतु देवगणाइ
ति विसृज्याचार्याय प्रतिपाद्य गच्छ गच्छेत्यग्निं विसर्जयेत्॥ ततो ब्राह्मणाः शांतिं पठेयुः॥ तत्र मंत्राः॥
आनो भद्राइति १० ऋचः॥ स्वस्ति नो मिमीतामिति ५ ऋचः॥ स्वस्ति चेति ३ ऋचः॥ तच्छंयोरिति च॥ ततो
यजमानो दशदन्त ब्राह्मणान् भोजयित्वा संकल्प्य वा विप्राशिषो गृहीत्वा सुहृद्युतो भुंजीत॥ अथ चंद्रा
र्कोपरागनिमित्तकालाना घोरजोदर्शनि विशेषः॥ कर्तात्र कृकाले मासपक्षाद्युल्लिख्य मम पत्न्याश्चंद्रस्य
सूर्यस्य वात्र परागे प्रथमरजोदर्शनसूचितानिष्टनिरासार्थं शांतिं करिष्य इति संकल्प्य प्राग्वत्स्व
कृपूजांतं कुर्यात्॥ अथाचार्यो गोमयेनोपलिप्ते देशे पंचवर्णैरष्टदलं कृत्वा तत्र श्वेतवस्त्रमुदग्द
शं प्रसार्य तत्राप्यायस्वेतिरात्र्यां चंद्रमाऽप्स्वन्तरेति सौवर्णी सूर्यं वा प्रतिमायां मावाह्य तदुत्तरस्तं सो॰ १
स्वन्नानो इति सौम्यां प्रतिमायां राहुमावाह्य यस्मिन्नक्षत्रे ग्रहणं तन्नक्षत्र देवतां सुवर्णप्रतिमायां

तत्तन्मंत्रैः प्रणवादिनमोंतैर्नाममंत्रैर्वा नाड्यकांडानुसमयेन षोडशोपचारैः पूजयेत्॥ तत्र चंद्राय
नक्षत्रदेवतायै श्वेतानि गंधादीनि॥ सूर्याय रक्तानि राहवे कृष्णानि॥ ततः पश्चिमतोऽग्निं प्रतिष्ठा
प्य पक्षे ग्रहणावाहनादिपूजां तं कृत्वान्वादध्यात्॥ तत्र चक्षुषी आज्येनेत्यंतमुक्त्वा चंद्रसूर्य
राहुं नक्षत्रदेवतां पक्षे ग्रहांश्चामुकसंख्यया समिदाज्यचरुतिलाहुतिभिः शेषेणेत्यादि॥
समित्सु विशेषः॥ चंद्रर्क्षदेवतयोः पलाशः सूर्यस्यार्कः राहोर्दूर्वा ताश्चतिस्र एकाहुतिः अथान्व
न्वागांतं कृत्वा यजमानेन प्रक्षेत्यक्तेः स्वाध्यायक्रमेण स्विष्टकृद्धुत्वा स्विष्टकृदादि पूर्णाहुत्यंतं
प्राग्वत्कृत्वैकस्मिन्कुंभे कुलं पंचगव्यं पंचरत्नत्वक्पल्लवसर्वौषधिकल्कदूर्वांकुरानि क्षिप्य स
त्विक्तदंपती पूर्ववदभिषिंचेत्॥ तत्र मंत्राः॥ आपोहिष्ठेति त्र्यृचः॥ इमं मे गंगे इत्येका तत्त्वायामीत्येका॥ राम
अन्येपि समुद्रज्येष्ठाः सुरास्त्वामित्यादयश्च शेषं पूर्ववत्॥ ॥इति दुष्टरजोदर्शनशांतिप्रयोगः॥ ॥ ७५

अथ गोमुखप्रसवः॥ ॥ गर्गः॥ पित्रारिष्टे सुतारिष्टे मात्रारिष्टे तथैव च॥ प्रायश्चित्तं तदा कुर्यान्नत्र दोषस्य
शांतये॥ तादृशनक्षत्रोत्पन्नस्य सूचिते पित्राद्यरिष्टे प्रायश्चित्तमित्यत्रापि तत्रादित्यचेति॥ देवलोदी
पवत्र त्रदोषशांत्यै तत्र प्रायश्चित्तं कुर्यादित्यर्थः॥ सूत्राश्विनौ गुरौ सर्पमघाचित्रेऽम्ललन्ते॥ एषु ऋ
क्षेषु जातस्य कुर्याद्गोजननं मुखं॥ जन्मर्क्षे वाऽथ जन्मर्क्षे शुवारे शुभे दिने॥ कृत्वाऽभ्यंगादिकं सर्वंग
शालंकारपूर्वकं॥ गोमयेनोपलिप्ताय गरस्मिन्प्रागके॥ पंकजं कर्णिकायुक्तं रजोभिः श्वेतकर्णि
कैः॥ व्रीहीस्तत्र विनिक्षिप्य यथाविन्यानुसारतः॥ नवसूर्पे तु तन्मध्ये रक्तवस्त्रं प्रसारयेत्॥ स्थाप
यित्वा शिशुं तत्र पुनः सूत्रेण वेष्टयेत्॥ प्राङ्मुखं तं मातापि तदा तिलगर्भगतं शिशुं॥ गोमुखं दर्शयित्वा
तु पुनर्जातं तु गोमुखात्॥ विष्णुर्योनीस्रक्तेन गर्भेन स्नापयेच्छिशुं॥ गवामंगेषु मंत्रेण गवामंगेषु संस्प
र्शेत्॥ विष्णोः श्रेष्ठेन मंत्रेण मंत्रेण गोप्रसूतं बालकं॥ आचार्यस्तु समादाय पंचश्वान्मात्रे दद्यात् दद॥

शां.म
७६

मातांजघन्यभागस्याच्छिशुमानीयतंमुखात्॥ततःपित्रेनदाद्यात्ततोमात्रेप्रदापयेत्॥वस्त्रेस्थाप्य
पिताथास्यपुत्रस्यमुखमीक्षयेत्॥गोमूत्रंगोमयंक्षीरंदधिसर्पिश्चसंयुतं॥आपोहिष्ठादिभिर्मंत्रैर
भिषिंचेत्ततःशिशुं॥मूर्ध्निचाघ्रायतत्पुत्रंतन्मंत्रेणतदापिता॥अंगादंगात्संभवसिहृदयादधि
जायसे॥आत्मावैपुत्रनामासिसजीवशरदःशतं॥मूर्ध्नित्रिरवघ्रायतंशिशुंस्थापयेत्ततः॥पु
ण्याहंवाचयेत्पश्चात्ब्राह्मणैर्वेदपारगैः॥दरिद्रायाथविप्रायतांगांयस्यचप्रदापयेत्॥गोवस्त्रा
स्वर्णधान्यानिदद्यादर्कादितःक्रमात्॥यथाशक्तिधनंदद्याद्ब्राह्मणेभ्यस्तदापिता॥ततोहोमंप्र शां१
कुर्वीतस्वस्वशाखोक्तमार्गतः॥कृत्वैवंततःपश्चाद्दास्यस्तांगांतमेवच॥होमस्यैशानदिग्भा
गेधान्योपरिशुभ्रंपरं॥पंचगव्यंघटेस्थाप्यतिलंतत्रविनिक्षिपेत्॥क्षीरद्रुमकषायांश्चपंचर राम
त्नानिनिक्षिपेत्॥वस्त्रयुग्मेनसंछाद्यगंधादिभिरथार्चयेत्॥विष्णुंवरुणमर्घ्यप्रतिमांचविधा ७६

नतः॥प्रतिमांपक्षेघ्नः॥अग्नेतद्देवत्यहोमविधानात्॥चकाराच्च॥यतइन्द्रादिभिर्मंत्रैःकुंभंस्पृष्ट्वाभि
मंत्रयेत्॥दधिमध्वाज्ययुक्तेनहोमंकुर्यात्विधानतः॥आपोहिष्ठेतितिसृभिःरक्षोहमेसोमइत्ययं॥तद्वि
ष्णोःपरमंपदं[illegible]स्योनेत्यृचस्ततः॥अग्निरग्निःप्रत्यृचंचाष्टाविंशतिसंख्यया॥अष्टाक्षराष्टसंख्या
वादधिमध्वाज्यसंयुतां॥दधिमध्वाज्यतिपुनर्ग्रहणात्स्यादिग्रहैचेरति॥आदित्यादिग्रहाणांचहो
मंकुर्यात्स्वमंत्रकं॥ ॥इतिगोमुखप्रसवविधिः॥ ॥अथप्रयोगः॥ ॥मासपक्षाद्युल्लिख्यअस्यशिशोर
मूलर्क्षोत्पत्तिसूचितारिष्टशांत्यर्थंगोमुखप्रसवंकरिष्यइत्युक्त्वागणेशपूजनाचार्यवरणेकुर्यात्॥
अथाचार्यःगोमयोपलिप्तगृहस्यैशानभागेश्वेततान्ताम्रदलगतांव्रीहिस्पश्र्पूर्परक्तवस्त्रंप्रसार्यति
सान्विकार्यतत्रप्राङ्मुखंदक्षिणदिग्गतपादंशिशुंसंस्थाप्यसूत्रेणावेष्ट्यगोमुखेसंयोज्यमुखात्प्रास
वंचविचित्यविष्णुर्योनिमितिसूक्तेनपंचगव्येनशिशुंसंस्नाप्य॥गवामंगेष्वितिगांस्पृष्ट्वाविष्णोःश्रे

नेतिश्चिस्तुं गृहीत्वा मात्रे दद्यात्॥ माता गोमुखप्रदेशाच्छिशुमानीय गोपुच्छदेशे पित्रे दद्यात्॥ पिता च
मात्रे दत्वा नूतने वस्त्रे संस्थाप्य तन्मुखं दृष्ट्वा पंचगव्येनापोहिष्ठेति तृचेनाभिषिंच्य गावो भगा गाव इति त्रि
सूक्त्यां घ्रापयपुण्याहं वाचयित्वा गामाचार्याय दत्वा ग्रहप्रीत्यर्थं गोवस्त्रवर्णधान्यानि दत्वान्य
सी दद्यात्॥ अथाचार्योऽग्निं प्रतिष्ठाप्य चक्षुषी आज्येनेत्यंते चरुणा अप्सु यमद्युत्यं चा आपो हिष्ठे
ति तृचेन च विष्णुं तद्विष्णोरित्यृचा यक्ष्मसूरमक्षी स्थामिति ग्रहांश्च प्रत्यृचमष्टाविंशत्यष्टान्यतं
मसंख्यया यदधिमध्वाज्यैः होमं शेषेण स्विष्टकृतमित्युपस्थानांतं कृत्वाग्नेरीशान्यां कुंभं सं
स्थाप्य तत्र पंचगव्यतिलव्रीहिक्षीरकुसुमकषायान् क्षिप्त्वा वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रोपरि
तद्विष्णोरिति विष्णोस्तत्वायामीति वरुणस्याक्षी स्थामिति पंचमपूर्णश्च प्रतिमां च संपूज्य तद
द्भेति षट्सु ऋचो जप्त्वान्वाधानक्रमेण कृत्वा कर्मशेषं समापयेदिति गोमुखप्रसवप्रयोगः॥ ॥ राम ११

अथ संदंतोत्पत्तिशांतिः॥ ॥ विष्णुधर्मोत्तरे॥ उपरि प्रथमं यस्य जायते च शिशोर्द्विजाः॥ द्विजाः दं
ताः दंतैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम॥ मातरं पितरं वाथ खादेदात्मानमेव च॥ तत्र शांतिं प्रव
क्ष्यामि तां मे निगदतः शृणु॥ गजपृष्ठगतं बालं स्नौ स्यंवास्नापयेद्द्विजा॥ तदभावे च सर्वस्वकांचने च व
रासने॥ सर्वौषधैः सर्वबीजैः सर्वपुष्पैः फलैस्तथा॥ पंचगव्येन रत्नैश्च मृत्तिकाभिश्च नागवि॥ सर्वौ
षधानि सर्वगंधाश्च विनायकस्नपने विधौ दर्शिताः॥ स्थालीपाकेन धातारं पूजयेत्तदनंतरं॥ सप्ताहं
चात्र कर्तव्यं ततो ब्राह्मणभोजनं॥ अष्टमेऽह्नि विप्राणां न यादेया च दक्षिणा॥ कांचनं रजतं गाश्च
भुवमागारमेव तु दंतजन्मनि सामान्ये शृणु स्नानमतः परं॥ भद्रासने निवेश्यैनं मूर्ध्नि मृल्लैः फ
लैस्तथा॥ सर्वौषधैः सर्वगंधैः सर्वबीजैस्तथैव च॥ स्नापयेत्पूजयेद्ब्रात्रवन्हिसोमसमीरणं॥
पर्वतांश्च तथा स्थाता देवदेवं च केशव॥ एतेषामेव जुहुयात्॥ घृतमग्नौ यथाविधि॥ ब्राह्मणानां तु

दातव्यायथाशक्त्यानुदक्षिणा। ततस्त्वलंकृतंबालंमासनेचोपवेशयेत्॥ आसीनंसूर्यसंतान
वीजैः सुस्नापयेत्ततः॥ सुविप्रबालकानांचैतैश्चकार्यंचपूजनं॥ पूज्यश्चविधिनाचार्योब्राह्म
णासुहृदस्तथा॥ ॥इतिसदंतोत्पत्तिशांतिः॥ ॥अथकृष्णचतुर्दशीजननशांतिः॥ ॥गर्गः॥ कृष्ण
पक्षेचतुर्दश्यांप्रसूतेस्तद्विधंफलं॥ चतुर्दशीचषड्भागंकुर्यादाद्यंशुभंमतं॥ द्वितीयेपितरं
हंतितृतीयेमातरंस्मृतं॥ चतुर्थेमातुलंहंतिपंचमेवंशनाशनं॥ षष्ठेतुधनहानिःस्यादात्मनोवं
शनाशनं॥ तस्मात्सर्वप्रयत्नेनशांतिंकुर्याद्विधानतः॥ आचार्यंवरयेद्धीमान्पुत्रदारसमन्वितं
स्वकर्मनिरतंशांतंश्रोत्रियंवेदपारगं॥ सर्वालंकारसंयुक्तंसर्वलक्षणसंयुतं॥ वृषभेचसमासी
नंवरदाभयपाणिनं॥ शुद्धस्फटिकसंकाशंश्वेतमाल्यांबरावृतं॥ त्र्यंबकेनचमंत्रेणपूजांकुर्या
द्विधानतः॥ स्थापयेच्चतुरः कुंभान्चतुर्दिक्षुयथाक्रमं॥ पुण्यतीर्थजलोपेतान्धान्यस्योपरिवि राम १८

न्यसेत्॥ तन्मध्येस्थापयेत्कुंभंशतछिद्रसमन्वितं॥ पंचमृत्संचरत्नानिपंचत्वक्पंचपल्लवान्॥ पंच
धान्यंसुवर्णंचतत्तन्मंत्रैर्विनिक्षिपेत्॥ सर्वौषधानिनिक्षिप्यश्वेतवस्त्रेणवेष्टयेत्॥ सुरभीणिचपुष्पा
णिश्वेतानिपरिवेष्टयेत्॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥ आयांतुयजमानस्यदुरितक्षय
कारकाः आवाह्यवारुणैर्मंत्रैरनेनविधिनाततः॥ इमंमेवरुणेत्यनयातत्वायामिऋचस्तथा॥ त्वन्नो
अग्नेइत्यनयासत्वनइतिमंत्रतः॥ आग्नेयकुंभमारभ्यपूजांकुर्याद्यथाक्रमं॥ आनोभद्राख्यसूक्तंचम
जाअग्नेश्चसूक्ततः॥ जप्त्वानुपौरुषंसूक्तंघृतंतुक्रमाज्जयेत्॥ ईश्वरस्याभिषेकंचग्रहपूजांसमाचरे
त्॥ पूजाकर्मसुनिर्वर्त्यहोमंकुर्याद्विधानतः॥ ग्रहादीशानदिग्भागेकुंडंकुर्याद्विधानतः॥ विस्तारायामस्वी
तंचअरत्निद्वयसंमितं॥ समिदाज्यचरूंश्चैवतिलमाषांश्चसर्षपैः॥ अश्वत्थप्लक्षपालाशाःसमिधःखा
दिरैश्चतैः॥ अष्टोत्तरसहस्रंवा अष्टोत्तरशतंतुवा॥ अष्टाविंशतिमेतैश्चहोमंकुर्यात्पृथक्पृथक्।

त्र्यंबकेनमंत्रेणतिलान्याहुतिभिः पृथक्॥ हुत्वाहोमश्चकर्तव्यः अस्मदुक्तविधानतः॥ एवंक्रमेण
कर्तव्यंहोमशेषंसमापयेत्॥ सर्वालंकारसंयुक्तात्रयाणामभिषेचनं॥ त्रयाणांमातापितृशिशूनां
तुभिःकलशैरभिर्द्रुरुत्कंजसमन्वितं॥ धौतांबराणिधृत्वाथकुर्यादाज्यावलोकनं॥ पूर्णाहुतिश्च
जुहुयाद्यजमानःसमाहितः॥ सप्तसर्वपरयान्त्रसाईश्वरायनिवेदयेत्॥ सर्वालंकारसंयुक्तासवत्सां
पयस्विनीं॥ प्रतिमांवस्त्रयुग्मंचआचार्यायनिवेदयेत्॥ अन्येषांचैवसर्वेषांकुर्याद्ब्राह्मणवाचनं॥
स्मादेतेनविधिनावित्तशाठ्यविवर्जितः॥ एवंयःकुरुतेशांतिंसर्वपापैःप्रमुच्यते॥ सर्वान्कामानवा
प्नोतिस्थिरजीवीसुखीभवेत्॥ ॥इतिकृष्णचतुर्दशीशांतिः॥ ॥अथसिनीवालीकुहूशांतिः॥ ॥
गर्गः॥ सिनीवाल्यांप्रसूतस्याद्यस्यभार्यापशुस्तथा॥ गजाश्वामहिषीचैवशक्रस्यापिश्रियंहरेत्॥ ये
संतिसकलाःपश्वास्तस्मात्सादोषजीविनः॥ वर्जयेत्तानशेषांस्तुपशुपक्षिमृगादिकान्॥ कुहूप्रसूति १८

MEMORIAL

रत्यर्थंसर्वदोषंकरीस्मृता॥ यस्यप्रसूतिरेतेषांतस्यायुर्धननाशनं॥ सर्वगंडसमस्तत्रदोषस्तुप्रच
लोभवेत्॥ शांतिविनाविशेषेणपरित्यागोविधीयते॥ परित्यागात्रशांतिंचकुर्याद्धीमान्विचक्षणः॥ प
रित्यागादितिस्यात्त्वलोपेपंचमी॥ परित्यागंकुर्वित्यर्थः॥ तत्कालंतत्क्षणार्द्धेनपुनरेधमनुलेपनं॥ तत्प
त्पत्तिनोमोक्षादर्थादज्ञाततोपिवा॥ तद्योगान्नाशयेत्किंचिस्वपंवानोशमश्रुतं॥ तस्योक्तंशांतिकर्तव्या
सर्वदोषापनुत्तये॥ रुद्रःशक्रश्चपितरःपूज्याःस्युर्देवताःक्रमात्॥ कर्षमात्रसुवर्णेनतदर्द्धार्द्धेनवापुनः॥
अथवाशक्तितःकुर्याद्वित्तशाठ्यविवर्जितः॥ प्रतिमांकारयेच्छंभोचतुर्भुजसमन्वितां॥ त्रिशूलखट्वां
वरदाभयहस्तांयथाक्रमं॥ श्वेतवर्णांश्वेतपुष्पांश्वेतांबरवृषस्थितां॥ त्र्यंबकेनमंत्रेणपूजांकुर्या
द्यथाविधिः॥ इंद्रश्चतुर्भुजोवज्रांकुशचापससायकः॥ रक्तवर्णोगजारूढोयतइंद्रेतिमंत्रतः॥ पितरः
कृष्णवर्णाश्चचतुर्हस्ताविमानगाः॥ गदाक्षसूत्रकमंडलुकत्यस्यैवधारणाः॥ येसत्याइतिमंत्रेण॥ पूजां

कुर्यादनंतरं॥ आग्नेयं दिशमारभ्य कुंभान्कोणेषु विन्यसेत्॥ येसत्यासोहविरदं तइत्यादिमंत्रस्त्वे
दे प्रसिद्धः॥ तन्मध्ये स्थापयेत्कुंभं शतच्छिद्रसमन्वितं निक्षिपेत्पंचगव्यादींस्तत्तन्मंत्रैश्च निक्षिपेत्॥
कल्पोक्तशांतिकर्तव्या कुर्याद्धोमं स्वशक्तितः॥ गोदानं वस्त्रदानं च सुवर्णं चोवरां शुभां॥ दशदानानि
चोक्तानि क्षीरमाज्यं गुडं तथा॥ आज्यावेक्षणपात्राणि तत्तन्मंत्रैश्च कारयेत्॥ समिदाज्यं चरुहोमं चति
लहोमं च सर्षपैः॥ अश्वत्थप्लक्षपालाशाः समिभ्दिः खादिरैः शुभैः॥ अष्टोत्तरशतं मुख्यं प्रत्येकं जुहुया
न्नृद्विजः॥ त्र्यंबकेन मंत्रेण तिलं॥ व्याहृतिभिः पुनः॥ चतुर्भिः कलशैर्युक्तं बहुकुंभसमन्वितं॥ शांति
वस्त्रकलकार्यमभिषेकं च कारयेत्॥ शांतिवत्स्रुवोक्तशांतिवत्॥ पितृमातृशिशूनां च अभिषिंच
वारुणैः॥ शांकरस्याभिषेकं च कुर्याद्ब्राह्मणभोजनं॥ अन्येषां चैव सर्वेषां ब्राह्मणानां च तर्पणं॥ य
थाशक्त्यनुसारेण द्विजवाचनपूर्वकं॥ अथ प्रयोगः॥ ॥ तत्र चतुर्दश्याः षडंशेषु द्वितीयतृतीयष

ष्ठांशेषु जन्म चेत्प्रसवोपि कार्यः॥ कर्ता मासपक्षाद्युल्लिख्यास्य शिशोः चतुर्दश्याद्यत्ताणादिषु सिनीवा
ल्यां कुह्वां चोत्पन्नस्य सूचितस्यानिष्टस्य निरासार्थं शांतिं करिष्ये इति संकल्प्य गणेशपूजां स्वस्तिवाचनमा
तृपूजां वृद्धिश्राद्धं चाचार्यादिवरणं च कुर्यात्॥ तत आचार्यः सर्षपविकिरणादि कृत्वा पीठादौ वरदाभयह
स्तां वृषस्थां हैमीं रुद्रप्रतिमां त्र्यंबकमंत्रेण संपूजयेत्॥ सिनीवालीकुह्वोस्तु रुद्रेंद्रपितरः तत्र रुद्र ईशानो
र्ध्वकरस्त्रिमात्रिशूलखड्गवरदाभयहस्तो वृषस्थस्त्र्यंबकमंत्रेण इंद्रो वज्रांकुशधनुःशरकरो रक्तो गजस्था
यतइंद्रेति मंत्रेण पितरः कृष्णवर्णाः गदाक्षसूत्रकमंडलुवरदाभयकरा विमानस्था येसत्यास इति मंत्रेण पूज्या
इति विशेषः॥ ततः तत्प्राच्यामीशान्यामुदीच्यां वाग्नेयादिषु चतुरः कुंभान्मध्ये च शतच्छिद्रं संस्थाप्य तेषु
पंचरत्नं पंचत्वक्पल्लवधान्यानि सुवर्णं सर्वौषधिश्च क्षिप्त्वा श्वेतवस्त्रपुष्पमालाभिरावेष्ट्य सर्वेसमु
द्राइत्यभिमंत्र्य इमम्मे वरुण तत्त्वायामि त्वन्नो अग्ने सत्वन्न इति क्रमेण मावाह्य संपूज्य क्रमेण नो

ण्याग्नेःसहस्रशीर्षाकुंडायेतिसूक्तानिजपित्वामहादेवंयथाशक्तिरुद्राध्यायादिनाभिषिच्य
ग्रहानावाह्यसंपूज्यगृहेशान्यामग्निंसंस्थाप्यान्वाधानात्॥ तत्रचक्षुषीआज्येनेत्यंतेनचतु
र्दशीशांतौरुद्रमध्यायप्रत्येकपालाशखदिरसमिद्भिराज्यचरुतिलमाषसर्षपैःप्रत्येकममुकसं
ख्ययाव्यस्तसमस्तव्याहृतिभिस्तिलैश्चामुकसंख्ययायक्ष्येइत्यादिसिनीवाल्यांकुह्वांचरुमिंद्र
पितरश्चप्रधानदेवताअत्रमंत्रेणचशक्तितस्तिलहोमोधिकइतिविशेषः॥ ततश्चाज्यभागां
तेआन्वाधानोक्तक्रमेणहोमःसिनीवालीकुह्वोस्तुगोवस्त्रसुवर्णक्षीराज्यगुडान्दत्वागोति
लहिरण्याज्यवस्त्रधान्यगुडरूप्यलवणदानानिचदशकृत्वाहोमःकार्यइतिविशेषः॥ ततोब
लिदानांतेकलशोदकैःशांतश्चिडेणाब्देवस्यमंत्रैरभिषिक्तःपत्नीशिशुसहितोयजमानः राम
आज्यमवेक्ष्यपूर्णाहुतिंकृत्वागुरवेधेनुंवासोयुग्मंऋत्विग्भ्यश्चदक्षिणांचदत्वास्वस्ति ८१

वाच्यकर्मेश्वरार्पणंकुर्यात्॥ ॥इतिकृष्णचतुर्दशीसिनीवालीकुहूशांतिप्रयोगः॥ ॥अथदर्शज
ननशांतिः॥ ॥नारदः॥ अथातोदर्शजातानांमातापित्रोर्दरिद्रता॥ तद्दोषपरिहारार्थंशांतिंव
क्ष्यामिनारदः॥ पुण्याहंवाचयित्वादौऋत्विक्संकल्पपूर्वकं॥ कुंडंवामंडलंकुर्यात्तद्देशेस्थापये
द्घटं॥ मंडलंस्थंडिलं॥ तत्कुंभेनिक्षिपेद्गंधदधिक्षीरघृतादिकं॥ न्यग्रोधोदुंबराश्वत्थाश्चूताः
प्लक्षकास्तथा॥ एतेषांवृक्षमूलानांत्वचादीन्पल्लवांस्तथा॥ पंचरत्नानिनिक्षिप्यवस्त्रयुग्मेनवेष्ट
येत्॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥ आयांतुयजमानस्यदुरितक्षयकारकाः॥ आ
पोहिष्ठात्वचेनाथकयानश्चित्रइत्यृचा॥ यत्किंचेदमृचाचैवसमुद्रज्येष्ठइत्यृचा॥ अभिमंत्र्योदक
पश्चादग्नेःपूर्वप्रदेशके॥ हारिद्रंरक्तकंचैवकृष्णंश्वेतंचजीरकं॥ एतेषांतंदुलैश्चैवसर्वतोभ
द्रमुद्धरेत्॥ दर्शस्यदेवतायाश्चसोमसूर्यस्वरूपकं॥ प्रतिमांस्वर्णगांनित्यंराजतींताम्रजांत

था॥ सर्वतोभद्रमध्येतुस्थापयेद्दर्शदेवता॥ रक्तवर्णवस्त्रयुग्मंतद्दर्शगंधपुष्पकं॥ आप्याय
स्वेतिमंत्रेणसवितापश्चात्तथैवच॥ उपचारैःसमाराध्यततोहोमंसमाचरेत्॥ कृत्वाचग्निप्र
तिष्ठांचक्रतुसंकल्पमीदृशं॥ आयुरारोग्यसिध्यर्थंसर्वारिष्टप्रशांतये॥ पुत्रस्यदोषजनन
दोषानिर्हरणायच॥ मातापित्रोकुमारस्यसर्वारिष्टप्रशांतये॥ तेषामायुःश्रियेचैवशांति
होमंकरोम्यहं॥ समिधश्चचरुमाज्यंक्रमेणजुहुयात्कृती॥ हुनेत्तविरुमंत्रेणसोमोधेनुर्व
मंत्रतः॥ एतैर्मंत्रैश्चप्रत्येकंहुनेदष्टोत्तरंशतं॥ दर्शस्यदेवताहोमअष्टविंशतिसंख्यया॥
होममेवंतुकृत्वातुकुर्याद्धाराभिषेचनं॥ श्रीस्तंमायुष्मस्तंकंसमुद्रज्येष्ठइत्यवा॥ एतैर्मं
त्रैरभिषेकंमातापित्रोःशिशोस्तथा॥ ततस्विष्टकृतंदद्याद्धोमशेषसमापयेत्॥ हिरण्य
रजतंचैवकृष्णांधेनुंसदक्षिणां अन्येभ्योपियथाशक्त्यादातव्यादक्षिणातथा॥ ब्राह्मण

तथा॥ ब्राह्मणान्भोजयेद्दत्वाकारयेस्वस्तिवाचनं॥ इतिदर्शजननशांतिः॥ ॥अत्रसिनीवा
लीकुहूदर्शौचोक्तयोःस्वपात्योर्व्यवस्थाछंदोगपरिशिष्टभाष्येचतुर्दशपात्रंत्योअमायाश्चाद्यै
इतिनवप्रहराश्चद्वक्षयकालः॥ चतुर्दशप्रहरेयामेक्षीणोभवतिचंद्रमाः॥ अमावास्याष्टमेभा
गेपुनःकिलभवेदणुरितिवाक्यात्॥ अत्रेंदुराद्येप्रहरावतिष्ठतेचतुर्थभागोनकलावशिष्टः॥
तंदंतमवक्षयमेतिशेषस्तमेवंज्योतिश्चक्रविदोवदंतिइतिवाक्यात्॥ एवंचतुर्दशपंत्यामास्यया
मयोरणुश्चंद्रःशास्त्रस्यचक्षुषागोचरोभवतिनकालोचंद्रत्वात्सिनीवाली॥ अमांत्यापांयाम
योःशास्त्रचक्षुषारगोचरोतिक्षीणश्चंद्रःसकालःकुहूर्मध्यमाःपंचयामादर्शइतिव्यवस्थयपु
शांतिव्यवस्थेति॥ परेतुचतुर्दशीमात्रयुक्तेहोरात्रेवर्त्तिन्यमासिनीवाली॥ प्रतियन्मात्रयुते
तुकुहूः॥ वारत्रयस्पर्शिमध्यमाहोरात्रवर्त्तिन्यमादर्शः॥ तस्मिंश्चतुर्दशीप्रतिप्रदोरभावे

नोभयसहरणोनाक्रांतत्वात्॥तथाचभवतांमावादर्शः॥केवलचतुर्दशीकेवलप्रतिपद्युक्
त्वाभावात्॥अतस्त्रिस्पर्शिन्यामाचभवतांवासिनीवालीकुहूशांतिप्राप्त्यभावात्॥दर्श
शांतिप्राप्तिरितियुक्तमाकुः॥ ॥अथदर्शजननशांतिप्रयोगः॥ ॥कर्त्तास्यकुमारस्यकुमा
र्यावादर्शजन्मसूचितानिष्टनिवृत्त्यर्थशांतिंकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाच
नाचार्यादिवरणानिकुर्यात्॥अथाचार्यःसर्षपविकरप्रोक्षणादिकृत्वाशुद्धभूमौजलपू
र्णपंचगव्यपल्लवत्वक्करकयुक्तंवासोयुग्मवेष्टितंकुंभंशालोपरिसंस्थाप्यसर्वेसमुद्राइ
तितीर्थानाहाद्यापोहिष्ठेतिऋचेतुकयानश्चित्रइत्युचायत्किंचेदमित्यृचासमुद्रज्येष्ठाइति
ऋचेतान्मंत्रानतैर्न्नस्वदेशेसर्वारिष्टशांतयेतेषामायुः॥श्रियेचैवशांतिहोमंकरोम्यह
मित्युक्त्वातस्यपश्चिमकुंडेस्थंडिलेवाग्निंप्रतिष्ठाप्यतदीशान्यांग्रहान्संपूज्यान्वाधानेऽ

घारावाज्येनेत्युक्त्वापितॄन्समिच्चरूत्याष्टविंशतिवारंहोमंसूर्यंचाष्टोत्तरशतवारंशेषेण
त्वाज्यभागांतेन्वाधानक्रमेणपूजामंत्रैर्हुत्वामातापितृशिशून्हिरण्यवर्णामितिपंचदश
र्चेनआयुष्मंचर्चस्यमितिदशर्चेनसमुद्रज्येष्ठाइत्यृचाचजलधारयाभिषिच्यस्विष्टकृदादि
समापयेत्यजमानोबलिदानपूर्णाहुत्यंतेहोमरूपदक्षिणांदत्वाचार्यायऋत्विग्भ्यश्चयथाश
क्तिदक्षिणांदत्वाविप्रान्संभोज्यस्वस्तिवाचनंकुर्यात्॥ ॥इतिदर्शशांतिः॥ ॥अथज्येष्ठाशां
तिः॥ ॥घटिकैकाचमैत्रांतेज्येष्ठादौघटिकाद्वयं॥तयोःसंधिरितिज्ञेयंत्रिशुगंडंसमीरितं॥प्रथ
मेचद्वितीयेचज्येष्ठर्क्षेचतृतीयके॥पादत्रयेजातनरोज्येष्ठोप्यत्रप्रजायते॥ज्येष्ठांत्यपादजात
स्तुपितुःस्वस्यविनाशकः॥जायतेनात्रसंदेहोदशाहाभ्यंतरेपिवाज्येष्ठर्क्षेकन्यकाजाताहंति
शीघ्रंचवाग्रजं॥तच्छांतिंतस्यवक्ष्यामिगंडदोषप्रशांतये॥सुदिनेशुभनक्षत्रेचंद्रताराबलान्वि

ति॥ सूतकांतेतथा कुर्याच्छेषाः शांतिविधानतः॥ वज्रांकुशधरं देवमैरावतगजान्वितं॥ कुं
र्याच्छचीपतिरूपं देवं प्रसुरनायकं॥ कर्षमात्रसुवर्णेन कर्षार्द्धेनाथ पादतः॥ तद्धिमानं प्रकुर्वी
त वित्तशाठ्यं न कारयेत्॥ शालितंडुलसंपूर्णे कुंभस्योपरि पूजयेत्॥ इंद्रायेंद्रो मरुत्वानिति मं
त्रेण वाग्यतः॥ गंधपुष्पैर्धूपदीपैर्नानाभक्ष्यनिवेदनैः॥ पूजयेद्विधिना विप्रलोकपालगणा
न्वितं॥ रक्तवस्त्रद्वयोपेतं पूजयेत्सुरनायकं॥ तत्र संस्थापयेत्कुंभांश्चतुर्दिक्षु विशेषतः॥ तन्म
ध्ये स्थापयेत्कुंभं शतछिद्रसमन्वितं॥ पुण्योदकसमायुक्तान्वस्त्रयुग्मेन वेष्टितान्॥ कुंभे
षु विन्यसेद्धीमान्पंचगव्यसमन्वितं॥ पंचामृतं पंचरत्नं मृत्तिकाः पंचसंख्यकाः॥ पंचवृक्षकषा
यांश्च पंचपल्लवकांस्तथा॥ सुवर्णकुशदूर्वाश्च स्नानौषधि विनिक्षिपेत्॥ पूजयेद्वारुणैर्मं
त्रैः कुंभान्धीमान्प्रयत्नतः॥ त्वन्नो अग्ने जपेदादौ सत्वन्नोपि द्वितीयकं॥ समुद्रज्येष्ठा इति मंत्रं

MEMORIAL

गंगे चतुर्थकं॥ पूजयेद्वस्त्रयुग्माद्यैश्चतुरः कलशानपि॥ जपं कुर्युः प्रयत्नेन मंत्रैरेभिर्द्विजोत्तमाः॥
त्रातोनःप्राज्यपंचादौ नद्गान्द्वितीयकं॥ इंद्रस्त्वरुद्रजाप्यं जपंस्तुजयेत्ततः॥ इत्थं संपूज्य देवेशं
वरुणं कुंभसंस्थितं॥ स्वसकल्पविधानेन होमकर्म ततश्चरेत्॥ समिद्भिर्ब्रह्मवृक्षस्य शतमष्टोत्तरं
तथा॥ सर्पिषा वरुणं चैव मूलमंत्रेण वाग्यतः॥ हुनेन्मंत्रेचते नैव यतइंद्र जयेति च॥ तिलान्व्या
हृतिर्हुत्वा शतमष्टोत्तरं पृथक्॥ नार्याश्रिताश्च समीपेत यजमानं विशेषतः॥ अभिषेकं प्रकुर्वीत
मंत्रैर्वारुणसंज्ञितैः॥ समुद्रज्येष्ठादिभिर्मंत्रैरिमंमेवरुणस्तथा॥ द्यौःशांतेत्यादिभिर्मंत्रैरभिषेकं स
माचरेत्॥ अभिषेकनिवृत्तौ तु यमानः॥ समाहितः शुक्लांबराणि धृत्वा तु कुर्यादाज्यावलोकनं॥
रूपंरूपेपि मंत्रेण चित्रतद्धस्तुरेवच॥ देवताः पुरतः स्थित्वा धूपदीपनिवेदनं॥ दद्यादाचमनं स
म्यकृतांजलिः प्रार्थयेच्च वा॥ नमस्तेसुरनाथाय नमस्तुभ्यं शचीपतिः॥ गृहाणार्घ्यं मया दत्तं गंधोदी

षप्रशांतये॥ कार्यं तत्पूजकादीनां कारितं तत्फलं श्रुतं॥ जप्त्वानु तत्फलं संवेदिवेजाय समर्पयेत्॥
आचार्याय च गां दद्यात्सुशीलां च पयस्विनीं॥ रक्तवर्णां वस्त्रयुतां सर्वालंकारभूषितां॥ वस्त्रयु
ग्मान्नि धान्यानि तु यथाविभवसारतः॥ यद्गंधर्वसिद्धैश्च पूजितो सिद्धाचीपते॥ दानेनानेन देवेश
गंडदोषं विनाशय॥ अष्टोत्तरशतसंख्या कुर्याद्ब्राह्मणभोजनं॥ तेभ्योपि दक्षिणां दत्वा प्रणिपत्य
क्षमापयेत्॥ इमां कृत्वा ज्येष्ठशांतिं यथाविधु क्रमोगतिः॥ गंडदोषं विनिर्जित्य आयुष्मान्जायते
नरः॥ इत्युक्तं वृद्धगार्ग्येणाशौनकाय विशेषतः॥ ज्येष्ठानक्षत्रसंभूतं गंडदोषप्रशांतये॥ अज्ञाना
द्वाथवाज्ञानाद्देवेश्याद्यध्वनस्य च यन्त्रसूनमतिरिक्तं वा तत्सर्वं क्षंतुमर्हसि॥ ॥ अथ प्रयोगः॥ ॥ राम ८५
गोमुखप्रसवं कृत्वास्य शिशोर्ज्येष्ठाजननस्सूचित सकलारिष्टनिरसन द्वारा श्रीपरमेश्वरार्थं शां
तिं करिष्य इति संकल्प्य गणपतिपूजन पुण्याहवाचन नांदीश्राद्धाचार्यर्त्विक्चतुष्टयवरणानि

कुर्यात्॥ ततः आचार्यः सर्षपविकिरणं भूमिप्रोक्षणं कृत्वा मह्योद्यौरित्यादि विधिना शालितंडुल
पूर्णकुंभं संस्थाप्य पूर्णपात्रोपरि हैमीं इंद्रप्रतिमां इंद्रायेदो मरुत्वत इति मंत्रेण रक्तवस्त्रद्वयेन गं
धादिभिश्च वाग्यतः पूजयेत्॥ तत इंद्राग्निल्लान् लोकपालान् समंतादावाह्य पूजयेत्॥ ततः पूर्वादिदि
क्षु चतुरः कुंभान्न्यग्रोधतल्लिकाभ्रपर्णोदक वस्त्रमालपयुतं संस्थाप्य दिक्कुंभे षु पंचगव्यं पंचामृत
पंचरत्नमृत्तिकापंचवृक्षकषायपंचपल्लवं सुवर्णकुशादूर्वाः शांतौषधीश्च दत्वा त्वन्नो अग्नइति
पूर्वे सत्वन्नो अग्नइति दक्षिणे समुद्रज्येष्ठा इति पश्चिमे इमं मे गंगे इति उत्तरे वरुणमावाह्य वस्त्रपुष्प
यैः पूजयेत्॥ ततश्चत्वारऋत्विज आनो भद्रा इत्यासने अग्ने पुरुषसूक्तं कद्रुद्रायेति सूक्तं नि रूपे पुं
आचार्यो मूलमंत्रं इंद्राविश्वा अनीव्रधान्नित्यष्टं चेदं प्रसूक्तं चेंद्रमस्तुं जयं च जपेत्॥ ततोग्निं प्रतिष्ठा
प्रतिष्ठाप्यान्वादध्यात्॥ अत्र प्रधानं रुद्रं पलाशसमिदाज्यं चरुद्रव्यैरष्टशतसंख्यया अष्टसंरुस्र

संस्रवयाव॥ प्रजापतितिलद्रव्येण हुत्वा तसंस्रवया व्याहृतिभिः होमेणास्विष्टकृतमित्यादि बलिं
ते पूर्णाहुतिं पूर्णपात्रविमोकं च कृत्वा सन्नार्यसन्निश्रुं यजमानं वारुणैः सूक्तैः समुद्रज्येष्ठा इमं मे
वरुण यो शांतेत्यादिभिरभिषिंचेत्॥ ततो रूपं रूपमित्याज्यमवलोक्य तत्पात्रे सदक्षिणं ब्राह्मणा
य दत्वा इंद्रं संपूज्य नमस्ते सुरनाथाय नमस्ते स्वंत्वाचीपते॥ गृहाण अर्घ्यमया दत्तं गंडदोषप्रशांत
ये॥ इत्यर्घ्यं दत्वाचार्यं नत्वा गंधाद्यैः श्रेयो गृहीत्वा इंद्राय समर्प्य॥ चार्याय पयस्विनीं गां रक्तव
स्त्रद्वयं च दत्वोत्तरपूजां तेइं विसृज्य प्रतिमां च ह गंधर्वसि इंद्रस्त्वं पूजितोसि शचीपते॥ दाने
नानेन देवेश गंडदोषं विनाशय॥ अज्ञानाद्यद्वाज्ञानाद्वैकल्याद्यावनस्य च॥ यन्न्यूनमतिरि राम
क्तं वा तत्सर्वं क्षंतुमर्हसि इति मंत्रेण दत्वा कृत्विग्भ्यो पि यथाशक्ति दत्वाग्निं विसृज्याष्टशतं ब्राह्म ८६
णान्भोजयेत्॥ ॥ अथ मूलशांतिः॥ ॥ शौनकः॥ ॥ अथातः संप्रवक्ष्यामि मूलजातहिताय

वै॥ मातापित्रोर्धनस्यापि कुलस्यास्य हिताय च॥ त्यागो वा मूलजातस्य स्याद्दशाष्टाब्दादर्शनं॥ अ
नुक्तमूलजाता नापरित्यागो विधीयते॥ अदनाद्यपि पितुः सन्तुतिष्टेः समाष्टकं॥ एवं द्वितरं प्रोक्तं
मूलजायां फलं बुधैः॥ कन्यायां तु विशेषः॥ न बालादृतिमूलर्क्षे पितरं मातरं तथा॥ मूलजा श्वशुरं ह
ति व्यालजच तदंगनां॥ माहेंद्रजाग्रजं हंति देवरं च द्विदैवजा॥ व्यालश्चाश्लेषा माहेंद्र ज्येष्ठा द्विदैवं वि
शाखा॥ शांतिर्वा पुष्कला चेत्स्यात्तर्हि दोषो न कश्चनेति॥ मुख्यं कालं प्रवक्ष्यामि शांतिहोमजपं त
तः॥ जातस्य द्वादशाहे वा जन्मर्क्षे वा शुभे दिने॥ समाष्टके द्वादशाब्दे कुर्याच्छांतिकमादरात्॥ यदै
व शांतिकं कुर्यात्तदैव मंतिमं प्रचक्षमहे॥ संस्कृते पुण्यदेशे तु मंडपं कारयेद्बुधः॥ पुण्याग्निमंत्रितैस्तो
ये प्रोक्षितायां क्षितौ ततः॥ तत्रोदकुंभं सुश्लक्ष्णं रक्तव्रणविवर्जितं॥ सुवर्णं तु लनिष्कं पूरयोच्चिर्म
लांभसा॥ वस्त्रावगुंठितं कुर्यात्पूरयेत्तीर्थवारिणा॥ कूर्चं हेमसमायुक्तं चूतपल्लवसंयुतं॥ स्वस्ति

कोपरिविन्यस्यसक्षीरद्रुमपल्लवैः॥वीराणांश्रीदाश्चतिक्षिप्यईशानेचनिधापयेत्॥पंचर
त्नानिनिक्षिप्यसर्वौषधिसमन्वितं॥अर्चितंपुष्पगंधाद्यैःश्रीरुद्रंचपठ्यकूपेजपेत्॥षडंगस
हितंसम्यक्जपेद्रुद्रसंख्यया॥बह्वृचारुद्रसूक्तैर्वाछंदोगारुद्रसामभिः॥सूक्तानिसामानि
चत्वार्येव॥कपिंजलन्यायात्॥एकादशावृत्तिरेकसंख्ययाशक्तितोजपेत्॥तत्राप्रतिर
थंसूक्तंशातरुद्रानुवाकंरुद्रानुवाकंतथापुरुषंरक्षोघ्नंचस्यस्त्रान्जपेत्॥त्र्यंबकंजपेत्सम्य
कूअष्टोत्तरसहस्रकं॥एकवारंतथावापिपावमानीःस्वशक्त्याजपेत्॥जपस्यपंचकुंभाःस्युर्द्वि
येवातद्बलात्ततः॥श्रीरुद्रस्यैककुंभस्थस्सर्वसूक्तानितत्रतु॥तथान्यंचस्थत्तंकुंभंपूर्वोक्तैर्ल
क्षणैर्युतं॥चतुःप्रस्रवणांकुर्यात्तंचवक्त्रंतुतद्भवेत्॥अत्रायंसांप्रदायिकार्थः॥आद्यपक्षे
षट्कुंभाःएकोरुद्रस्यतस्मिन्शातरुद्रियंरुद्रसूक्तानिसामानिजप्यानि॥अभिषेकार्थंपंच

कुंभाःतत्रपूर्वादिकुंभचतुष्टयेतत्राप्रतिरथमित्यादिनाक्रमात्सूक्तचतुष्टयाविधिःमध्येचत्र्यंब
कमंत्रपावमानीजपविधिः॥एवंपंचकुंभाशाक्तौचतुःप्रस्रवणएकएवद्वयमितिद्वित्वंतुरुद्रकुंभ
मादायअतएवश्रीरुद्रस्येतिश्लोकार्द्धेनरुद्रकुंभएवपूर्वोक्तोद्वित्वसंख्यापूरणायानूद्यते॥चतुःप्र
स्रवणएवतुपंचकुंभस्यकुंभस्थानेविधीयते॥एवंपंचवक्त्रांतुतद्भवेदितिपंचवक्त्रतोक्तिरपिपं
चकुंभस्थानापत्तौसंगच्छते॥वस्त्रावकुंठितंकुर्यात्स्थापयेत्तीर्थवारिणांपंचरत्नसमायुक्तमाम्रप
ल्लवसंयुतं॥गजाश्वरथ्यारथ्यावल्मीकात्संगमाद्ध्रदगोकुलात्॥राजद्वारप्रदेशाच्चमृदमानीयनि
क्षिपेत्॥कुंभस्यनैरृतेदेशेहोमदेशंप्रकल्पयेत्॥गोमयालेपितेदेशेकुर्यात्स्थंडिलमुत्तमं॥कृत्वा
ग्निमुखपर्यंतमुल्लेखादिस्वशक्तितः॥पूर्णपात्रनिधानांतंकृत्वापूजांसमाचरेत्॥तत्रत्रदेवता
रूपसुवर्णेनप्रकल्पयेत्॥निष्कमात्रेणवार्द्धेनपादेनाथस्वशक्तितः॥प्रतिमांलक्षणोपेतांकार

यित्वाविचक्षणः॥यद्वामूलंसुवर्णस्यस्थापयित्वाप्रपूजयेत्॥मूलंमूलाकारंमूल्यमितिवाचिंता
ठः॥तदाप्रतिमामूल्यमित्यर्थः॥सुवर्णंसर्वदेवत्वंसर्वदेवात्मकोनलः॥सर्वदेवात्मकोविप्रः
सर्वदेवमयोहरिः॥संस्मरेन्निऋतिंश्यामंसुमुखंनरवाहनं॥रक्षोधिपंखड्गहस्तंदिव्याभरणाभू
षितं॥प्रतिमापूजनार्थायवस्त्रयुग्मंप्रकल्पयेत्॥पंकजंकारयेत्तत्रमौरकान्तेचा॥हितंडुलैः॥
चतुर्विंशद्दलोपेतंशुक्लैर्वाकर्णिकान्वितं॥तस्योपरिन्यसेत्पात्रंस्वर्णंवारौप्यमृन्मयं॥शुद्धव
स्त्रेणसंछाद्यतत्रमूलानिनिक्षिपेत्॥मूलानिज्ञातमूलानितानिचस्वयमुत्पाटयेत्प्राज्ञो
मूलानांचज्ञातेपिता॥मंगल्याश्चपवित्राश्चसर्वौषधीःकथयाम्यहं॥लक्ष्मणाज्ञातमूलाचशिरी राम
षोवेतसस्तथा॥सहकाश्वेतमूलाचविष्णुक्रांताथखरिवनी॥सर्पाक्षीमीननेत्राचपुत्रयाचीरि ८८
तांजली॥पालाशोबिल्वकश्चैवरोचनाचंदनद्वयं॥कुष्ठंमांसीमुराशीरंवालकंचतथामला॥

गोजिह्वातुलसीईर्ष्याशतपुष्पीसलांगली॥ब्रह्मदंडीद्रोणपुष्पीप्रियंगुःसितसर्षपा॥पिप्पली
काकजंघाचत्रायमाणाकरूस्तथा॥ज्योतिष्मतीचगंधारीनिर्गुंधापूर्णकोशिका॥नगह्नमासु
गंधाचगडूचीसेंद्रवारुणी॥अलंबुकारुदंतीचकदलीकेतकीतथा॥गोक्षुरंशतपूर्वाचअरिष्टि
कापराजिता॥छिन्नरुहाशतपर्वानिकुंभाचसुवर्चसा॥अश्वगंधाहस्तिकर्णाहरिद्राद्वितयंत
थाजपावीमधुकारश्चअश्वत्थोबकुलस्तथा॥नष्टक्षीरात्वपामार्गोमंदारश्चातिमुक्तकः॥मालती
पुष्पवर्णाचाश्रीपर्णीश्रीफलंतथा॥दर्भमूलंकरवीरंमदयंतीविकंकतः॥पाटलासुरदारुश्चअ
र्कस्त्वदनिकस्तथा॥फलंमन्मथमूलस्यपलाशस्यचपल्लवाः॥रास्नानदीवृक्षमूलसुरदारुविदा
रिका॥श्वेतवीर्याश्वेतपाकानीलोत्पलतथैवच॥नागकेसरमंदारीकुमारीचैवनिक्षिपेत्॥तीर्था
बुपंचगव्यंचसर्वौषध्यश्चकांचनं॥यथासंभवतोवापिग्राह्यंमूलेज्ञातेशुचं॥क्षीरत्वसमेतंच

ग्रा·प·
८९

शतच्छिद्रे घटे न्यसेत्॥ शतमूला शतावरी॥ वेतसो वंजुलः॥ सहकासहदेवी श्वेतमूला पुनर्न
वा॥ मीननेत्रा मत्स्याक्षी॥ पुत्रपारी पुत्रजीवकृतांजलिः अंजलिनी लाथाजोउंउल प्रसिद्धा
बिल्वको बिल्वः॥ चंदनद्वयं श्वेतपीतं चक्रामलाक्तम्यामलकी॥ गोजिह्वा गजजिह्वा इति प्रसिद्धा॥
लांगली कलिहारी इति प्रसिद्धा॥ ब्रह्मदंडी अधःपुष्पा द्रोणपुष्पी कुरबुकः कुबो काकजंघा का
कांगी ज्योतिष्मती॥ मर्कंगुला॥ गांधारी देवगांधारी॥ स्वर्णकोलिका कोशातकी॥ नगदमा
सुत्रजा सारिका॥ अलंबुका तुंबी॥ विशाखपर्वा विवा॥ अरिष्टका नागबला॥ छिन्नरुहा पिंड
गुडूची॥ शतपत्रा कमलिनी॥ निकुंभा दंती मेदः॥ सुवर्चला सूर्यभक्ता हस्तिकर्णैरंडः उरुबुक
पीलु॥ मधुकारो मधूकः॥ सर्जरा बीजकः॥ अतिमुक्तः कोमाधवी॥ मालती जाती॥ स्वर्णपुष्पा ८९
कुशाला॥ श्रीफलं बिल्वं॥ मदयंतीमृधिका॥ विकंठकतः स्रुववृक्षः॥ अर्कस्तदतिकायालंघा॥

DAJI
MEMORIAL

मन्मथवृक्षः आम्रः॥ सुरदारुर्देवदारुः॥ विदारिका घृतकूष्मांडी॥ श्वेतवीर्या गिरिकर्णी॥ श्वेतपाका
गुंजा॥ शेषाणि स्पष्टानि॥ मूलानी मानि गृहीत्वा यास्तु तालान्ते विशेषतः॥ स्थापयेत् कर्णिकामध्ये
वस्त्रगंधाद्यलंकृतं॥ कर्पूरहेमजलोपेतं कुंकुमौषधिसंयुतं॥ कुंभोपरि न्यसेद्विद्वान्नक्षत्रदैवतं॥
अधिपत्याधिदेवौ च दक्षिणे शरदेशतः॥ अधिदेवं यजेदादौ ज्येष्ठा नक्षत्रदैवतं तूत्तराषाढ
ढ्यादि अनुराधांतमर्चयेत्॥ एतेन संस्थाप्य आवाह्याथ समर्चयेत्॥ उपचारैः षोडशभिर्यद्वा
पंचोपचारकैः॥ रक्तचंदनगंधाद्यैः पुष्पैः कुसुमसितादिभिः॥ मेषशृंगादि धूपैश्च घृतदीपैस्तथैव च॥
सुरापोलिकमांसाद्यैर्नैवेद्यैरोदनादिभिः॥ मत्स्यमांससुरादीनि ब्राह्मणानां विवर्जयेत्॥ पुरास्था
ने प्रदातव्यं क्षीरं सैन्धवसंयुतं॥ पायसं लवणोपेतं मांसस्थाने प्रकल्पयेत्॥ रक्तगंधाद्यलाभे तु
यथालाभं समर्चयेत्॥ पुष्पांजलिं तु समभ्यर्च्य होमं कुर्याद्यथोदितं॥ निर्वापप्रोक्षणादीनि चरोः कुर्या

शां·म·
९०

यथाविधिः॥ हविर्गृहीत्वाविधिवन्नैर्ऋत्येनऋचाहुनेत्॥ मोषुणः परापरेतियन्नेदेवीतिवापु
नः॥ पायसघृतसंमिश्रंहुनेदष्टोत्तरंशतं॥ समिदाज्यचरून्यश्वाच्छक्तितः संख्ययाहुनेत्॥ अपि
देवतयोश्चापिजुहुयात्स्वमंत्रतः॥ चतुर्थ्यंतेनमोंतैश्चस्वाहांतैः स्वस्वमंत्रकैः॥ नक्षत्रदेवता
न्यश्चपायसेनतुहोमयेत्॥ हिरण्येतिपंचदशाग्निंजुहुयात्सूक्तारं ततः॥ गायत्र्याजातवेदसे
त्र्यंबकमितिक्रमात्॥ सीरायुजंतितामग्निवास्तोष्पत्यग्निमेवच॥ क्षेत्रस्यपतिनागृणानाम
ग्निंदूतंतथैवच॥ श्रीसूक्तेनतथाविद्वान्समिदाज्यचरून्क्रमात्॥ अष्टोत्तरशतैर्वापिअष्टा
विंशतिभिःक्रमात्॥ अष्टाष्टसंख्ययावापिजुहुयाच्छक्तितोबुधः॥ त्वंनःसोमेनपायसंजुहुयात्तु राम
त्रयोदश॥ चतुर्गृहीतमाज्यंस्याघातेरुद्रेतिमंत्रतः॥ स्रुवेणजुहुयादाज्यंमहाव्याहृतिभिःक्रमा
त्॥ हुत्वास्विष्टकृतंपश्चात्प्रायश्चित्तंहुतिंहुनेत्॥ आचार्योयजमानोवाअग्नोपूर्णाहुतिंहुनेत्॥ ९०

समुद्रादितिसूक्तेनप्राजापत्यंचाततः॥ पूर्णादर्विसमंतेनतैः पूर्णाहुतिंहुनेत्॥ होमशेषंसमा
प्योथवह्निमारोपयेद्बुधः॥ कुंभाभिमंत्रणंकुर्याद्दक्षिणेनाभिमंत्रयेत्॥ मृत्युंजयमनोर्यपिजपेत्र्य
यंबकंततः॥ रुद्रकुंभेचोक्तमार्गेणरुद्रमंत्रस्यशान्जपेत्॥ धूपंदीपंचनैवेद्यंकुंभस्यमेतिवेदयेत्॥ प्र
सादयेत्ततोदेवमभिषेकार्थमादरात्॥ तस्मिन्कालेपरातिष्या॥ कर्तव्यंस्वस्तिमिच्छता॥ पयक्रमा
स्तंतेनैवनक्षत्रेष्यासदैवतु॥ अभिषेकविधिवद्वेपूर्वाचार्यैरुदाहृतं॥ भद्रासनोपविष्टस्ययजमा
नस्यऋत्विजः॥ दारपुत्रसमेतस्यकुर्युःसर्वेभिषेचनं॥ आदौग्न्यामितिसूक्तेनपावमानीभिरेवच॥
आपोहिष्ठेतिनवभिर्यतइंद्रभयेतिच॥ सहस्राक्षेणचेनापिदेवस्यत्वेतिमंत्रकैः॥ शिवसंकल्पमं
त्रेणवरुणस्याश्वमंत्रकैः॥ योसौवज्रधरोदेवोमहेंद्रोगजवाहनः॥ मूलजातशिशोर्दोषमातापित्रो
र्व्यपोहतु॥ योसौशक्तिधरोदेवोहुतभुङ्मेषवाहनः॥ सप्तजिह्वश्चदेवोग्निर्मूलदोषंव्यपोहतु॥ यो

सोदंडधरो देवो धर्मो महिषवाहनः॥ मूलजातशिशोर्दोषं व्यपोहतु यमस्तथा॥ योसौ खड्गधरो
देवो निर्ऋती राक्षसाधिपः॥ प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः॥ योसौ पाशधरो देवो वरु
णश्च जलेश्वरः॥ नक्रवाहः प्रचेता नो मूलोत्थाघं व्यपोहतु॥ योसौ देवो जगत्प्राणो मारुतो मृग
वाहनः॥ प्रशामयतु मूलोत्थं दोषं गंडांतसंभवं॥ योसौ निधिपतिर्देवो गदाहस्तनरवाहनः॥ मा
तापित्रोः शिशोश्चैव मूलदोषं व्यपोहतु॥ योसौ पशुपतिर्देवो पिनाकी वृषवाहनः॥ आश्लेषमूल
गंडांतदोषमाशु व्यपोहतु॥ विघ्नेशः क्षेत्रपो देवः पिनाकी वृषवाहनः॥ आश्लेषामूलगंडांत
दोषमाशु व्यपोहतु॥ सर्वदोषप्रशमनं सर्वं कुर्वंतु शांतिदा॥ तद्धृद्योरनिष्टकं तु सर्वदोषप्रशां
तिदं सर्वकामप्रदं दिव्यं मंगलानां च मंगलं॥ वस्त्रांतरितकुंभास्योपश्चात्तु स्नपयेत्सुतः॥ ततः शु
क्लांबरधरः शुक्लमाल्यानुलेपनः॥ यजमानो दक्षिणाभिस्तोषयेदृत्विगादिकान्॥ धेनुं पयस्वि

नीं दद्यादाचार्याय सवत्सकां॥ निर्ऋतिप्रतिमां वस्त्रं कुंभं हैमं च दापयेत्॥ यमार्थं वस्त्रप्रतिमां तम
शो म्लेश्च दापयेत् प्रदद्यान्नैव दापयेदिति क्वचित्पाठः॥ श्रीरुद्रजापिने देयपक्वान्नं प्रयत्नतः॥ त
लुं नववस्त्रप्रतिमां तस्मै दद्यात्प्रयत्नतः॥ इतरेभ्योपि विप्रेभ्यः शक्त्या दद्याच्च दक्षिणां॥ अकालान्नेत
तीं दद्यान्दाचार्यब्रह्मऋत्विजं॥ तत्रान्नरूपं प्रदातव्यं शक्त्या वाथ प्रदापयेत्॥ आचार्योपि च यद्दत्तं तद
र्द्धं ब्रह्मणे भवेत्॥ सदस्याय ब्रह्मणोर्द्धं ऋत्विग्भ्यश्च तदर्द्धकं॥ गृह्णीयादाशिषस्तेभ्यः प्रणम्याथ क्षमा
पयेत्॥ दद्यादन्नं पायसादि ब्राह्मणान्भोजयेत्ततः॥ अलाभे सति पंचाशद्द्वात्रिंशत्तदर्द्धं वा ततः॥ सर्व
शांतेश्च पठनं ब्राह्मणैराशिषस्तथा॥ गृह्य क्षमापयेद्विप्रान् निर्ऋतिः प्रीयतामिति॥ विधाने चरिते स्मि
न्तु ततः शांतिर्भविष्यति॥ गंडांतेष्वेवमेव स्यात्पुष्यायेष्वेवमेव तु॥ समाष्टके वाद्यमादिकुर्याद्विशांतिमा
चरेत्॥ ॥आश्लेषाशांतावप्येवमेव विधिः॥ ॥मूलार्क्षे नक्षत्रप्रकारेणाकुंभे निक्षिप्य पूजयेत्॥ कुंभोप

रिस्थपात्रेतुआश्लेषाप्रतिमांयजेत्॥ मूलोक्तेनविधानेनकुंभयोरग्निमंत्रणमित्यादिभिरतिदेशा
त्॥ आश्लेषाप्रतिमासर्पाख्या॥॥ अथमूलाश्लेषाशांत्योःप्रयोगः॥ ॥तत्रकर्त्तोक्तकालेमासप
क्षाद्युल्लिख्यममास्यशिशोःकुमार्यावामूलाद्यपादादिषाश्लेषायांवाजन्मनासूचितपित्राद्य
रिष्टशांत्यर्थंशांतिकरिष्यइत्युक्त्वागणेशपूजनस्वस्तिवाचनमातृकापूजनाभ्युदयिकानिकृत्वा
चार्यब्रह्मसदस्यानृत्विजश्चाष्टौषट्चतुरोवावृत्वायथाविभवमर्चयेत्॥ अथाचार्यआचा
र्यकर्मकरिष्यइतिसंकल्प्ययदत्रसंस्थितमितिसर्षपान्विकीर्यापोहिष्ठेत्यादिभिर्भुवंप्रोक्ष्यशा
न्तामरुद्योरितिस्पृष्ट्वौषधयःसमितिद्रोणपरिमितव्रीह्यादिभिःस्थाकलशौद्वितिरुद्रकुंभंसंस्था शाम ९५२
प्यमंमेगंगेइत्यनेनोदकेनापूर्यगंधद्वारामितिगंधंयाओषधीरित्यौषधीरोषधयःसमितियवा
न्कांडादितिदूर्वाअश्वत्थेवइतिपंचपल्लवान्॥ रुचतीन्नीमइतिपंचत्वचःस्योनापृथिवीति

सप्तमृदोयाःफलिनीरितिफलंसहिरण्यानीतिपंचरत्नानिहिरण्यरूपइतिहिरण्यंगायत्र्यागोमूत्रं
पुनर्मनेतिगोमयम्॥ प्यायस्वेतिपयःदधिक्राव्णइतिदधितेजोसीत्याज्यंदेवस्यत्वेतिकौशोदकंमधुवा
तेतिमधुस्वादुरितिशर्करांक्षिप्त्वायुवासुवासाइतिवस्त्रेणसूत्रेणवाकुंभंकंठमावेष्ट्यपूर्णादर्वी
तिपूर्णपात्रेणपिधायततःप्रागुदग्वाचतुर्दिक्षुचतुरःमध्येचैकमितिपंचकुंभान्प्रत्येकंमंत्रावृत्त्याप
दार्थानुसमयेनवापार्श्वसंस्थाप्यरुद्रकुंभेसौवर्णप्रतिमायांत्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्॥ रुद्रावाह
नेविनियोगः॥ त्र्यंबकमितिरुद्रमावाह्य॥ पूजयेत्॥ ततःरुद्रकुंभंस्पृष्ट्वैकर्त्विक्कुर्याद्यजुश्चेद्रुद्रैकाद
शिनींबह्वृचश्चेत्॥ आशुःशिशानइतिसूक्तानिछंदोगश्चेद्रुद्रसामानिजपेत्॥ सर्वेसाम्नामेकद्वित्र्यष्टैकादशा
वृत्तिःशान्तितोज्ञेया॥ कद्रुद्रायेतिनवर्चस्यघोरःकण्वोरुद्रोगायत्रीजपे॥ ९॥ इमारुद्रायतवसइत्येका
दशर्चस्यकुत्सोरुद्रआद्यानवजगत्योत्येत्रिष्टुभौजपेआनेपितरितिपंचदशर्चस्यगृत्समदोरुद्रस्त्रि

शां·म
९३

ष्टुप्जपे विनियोगः॥ सामानितुं आवो राजानं वामदेवो रुद्रस्त्रिष्टुप् तमुष्टुहिं नोमो त्रीरुद्रस्त्रिष्टुप्
भुवनस्य पितरं गिरिभ्यो रुद्रस्त्रिष्टुप् जपे विनियोगः॥ ततोन्यसत्विकूजपार्थं कुंभं चके प्राकृत्र
मिणां जपेत्॥ आशुः शिशानः इति त्रयोदशर्चस्येंद्रोप्रतिरथऋषिरिंद्रो देवता चतुर्थ्या बृहस्पतिस्त्रि
ष्टुप् अंत्यानुष्टुप् जपे विनियोगः॥ त्वमग्ने रुद्र इत्यनुवाकस्य कुत्स वा ऋटरुद्रो जगती जपेत् दक्षिणे
कुंभं इत्यस्य वामदेवो ग्निस्त्रिष्टुप् जपे रक्षोहणमिति पंचविंशति आंगिरसः पायुरग्निस्त्रिष्टुप् ज
पे॥ ततो मध्यमकुंभे जपेत्॥ त्र्यंबकोवसिष्ठो रुद्रो नुष्टुप् जपे॥ अत्रैव पवमानमपि संजपेत्॥ एवं
षट्कुंभं रुद्रकुंभं च चतुः प्रस्रवणं वेति कुंभद्वयं संस्थाप्य रुद्रैकादशिनी रुद्रकुंभे जपित्वा प्रतिदि राम
पादीनि चत्वारि प्रस्रवणेषु त्र्यंबकमंत्रं पावमानीश्च मध्यमे जपेत्॥ अथाचार्यो रुद्रकुंभान्नैरृत्ये ९३
स्थंडिलेग्निं प्रतिष्ठाप्य तदीशान्यां नवग्रहस्थापनं कृत्वान्वादध्यात्॥ तद्यथा॥ समिद्द्वयमादायास्मिं

न्नन्वाधाने देवतापरिग्रहार्थमन्वाधास्ये अस्मिन्नन्वाहिते ग्रावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा नवग्र
हान् नाधिदेवता प्रत्यधिदेवता सोक्रपालान्वितान्विनायकादींश्च प्रत्येकमुदसंख्यया समिच्चरुवीज्ये
र्निऋतिं प्रतिप्रत्यंमष्टोत्तरशतसंख्यं येडेमयश्च प्रत्येकमष्टाविंशतिसंख्यया घृताक्तपायससमिदाज्य
चरुभिर्विश्वेदेवादीनिश्च तुर्विंशत्यकृदेवता अष्टाष्टसंख्यया पायसेन रक्षोहणं कृणुष्व पिसिपंचदश
भिः कृशानुरान्तेन सवितारं दुर्गां जातवेदसे त्विकूस्त्रतिं दुर्गां वास्तोष्पतिं अग्निं क्षेत्राधिपतिं मित्रावरुणौ अ
ग्निमेताश्चाष्टसंख्यया कृशानुरान्तेन श्रियं हिरण्यवर्णामिति पंचदशान्नर्भिः प्रत्येकमष्टसंख्यया समि
दाज्यचरुभिः सोमं त्रयोदयवारं पायसेन रुद्रं चतुर्गृहीतेनाज्येन अग्निं वायुं सूर्यं बृहस्पतिं वरुणं मित्रं
विश्वान्देवान् महाव्याहृतिभिराज्येन शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्म इत्यंतमुक्त्वा समस्त व्या
हृतिभिः समिद्द्वयमग्नावादध्यात्॥ अश्लेषाशांतौ तु सर्पा प्रधानदेवतामधिदेवतां बृहस्पतिं प्रत्यधि

शां.म
९४

देवतां पितॄन्नगाद्यादित्यंतर्क्षदेवताश्चेति विशेषः॥ ततः परिसमूहनादि पूर्णनिधानांतं कृत्वाग्नेः प्राग्
द्वारं नैरृत्ये वीतंडुलैश्चतुर्विंशद्दलं पद्मं कृत्वा ततः प्राग्वत्कुंभं संस्थाप्य तस्मिन्या ओषधीरितित्री
ण्मूलानि तद्दलानि विष्णुक्रांता सहदेवी तुलसी शतावरी कुशमूलानि क्षिप्त्वा पूर्णपात्रं निधाय त
त्रसाष्टदलं वासो वितत्य तत्कर्णिकायां निष्कं तदर्धं तदर्धमितां निरृतिप्रतिमां अग्न्युत्तारणपूर्व
कं वामस्तस्न पितांमो पुर्णो घोरः कृष्णो निरृतिर्गायत्री मोषुणऽइति संस्थाप्य संस्मरेन्निरृतिं रूपा
सुमुखं नखादं नरस्थोधिपखड्गहस्तं दिव्याभरणभूषितमिति ध्यात्वा तद्दक्षिणत इंद्रं वोम घच्छंदा
रं छौ गायत्री तीव्रस्य तद्वत्तरतश्चासु मेमेधातिथिरापोनुष्टुप् इत्यपां च सौवर्णप्रतिमे संस्थाप्य पदा
नुसमयेन स्वमंत्रैस्ताः पूजयेत्॥ तत्र वस्त्रयुग्मं॥ रक्तचंदनं॥ रक्तपुष्पाणि मेषशृंगस्य धूपः आज्य
स्य दीपः॥ पोलिकोदनादि नैवेद्यं॥ ब्राह्मणानां सुरास्थाने सैंधवमिश्रं क्षीरं मांसस्थाने लवणयुक्तप

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्यस्य स्मारकम्

शाम
९४

यसां क्षत्रियादीनां तु मुख्यमेव ततश्चतुर्विंशद्दलेषु प्रागादि विश्वेदेवा विष्णुः वसवः वरुणः अजैकपात्॥
अहिर्बुध्न्यः पूषा अश्विनौ यमः अग्निः प्रजापतिः सोमः रुद्रः अदितिः बृहस्पतिः सर्पाः पितरः भगः अर्यमा॥
सविता॥ त्वष्टा॥ वायुः इंद्राग्नी मित्रः इंद्रः निरृतिः आपः आश्लेषाशांतौ त्विंद्रइत्येतांश्चतुर्थ्यंतैर्नमोंतैर्ना
मभिः क्रमेणावाह्य पूजयेत्॥ आश्लेषाशांतौ तु सर्वप्रतिमांतः नमोस्तु सर्पेभ्यो ये केच पृथिवीमनु ये
अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः इत्यावाह्य सर्पो रक्तस्त्रिनेत्रश्च द्विभुजः पीतवस्त्रकः॥ फलका
सिधरस्तीक्ष्णो दिव्याभरणभूषितः इति ध्यात्वा तद्दक्षिणतो बृहस्पतेः गणपतिः बृहस्पतिस्त्रिष्टु
प् इति बृहस्पति तद्वत्तरतश्चादीरतां नौ खः स्वधा त्रिष्टुबिति पितॄन् तावाह्य चतुर्विंशतिदलेषु प्रागा
दितान्गणावादित्यंतर्क्षदेवताश्चावाह्य पूजयेत्॥ ततो न्वाधानक्रमेण पायसचरुं कृसरान् श्रपयित्वा
ज्याभागांतं कृत्वा यजमानेन सर्वदेवतोद्देशेन द्रव्ये त्यक्ते सर्विग्न्वाधानक्रमेण र्क्षदेवताः न त न्मंत्रे

कृत्वा रक्षोहाद्यान्वहस्य माणाग्निर्जुहुयात्॥ तास्य॥ कृणुष्वेति पंचदशर्चस्य वामदेवो रक्षोहा त्रिष्टुप्॥
कृसरहोमे विनियोगः॥ एवं सर्वत्र॥ गायत्र्या विश्वामित्रः सविता गायत्री॥ जातवेदसे कश्यपो दुर्गा त्रिष्टु
प्॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्॥ सीरायुंजंतिबुधस्त्विकृस्तुतिर्गायत्रि॥ तामग्निवर्णां सोभरिर्दुर्गा त्रि
ष्टुप्॥ वास्तोष्पतेवसिष्ठो वास्तोष्पतिस्त्रिष्टुप्॥ अग्नेनयागस्त्योग्निस्त्रिष्टुप्॥ क्षेत्रस्य वामदेवः क्षेत्र
पालोनुष्टुप्॥ यएणाता जमदग्निर्मित्रावरुणौ गायत्री॥ अग्निदूतं काण्वो मेधातिथिरग्निर्गायत्री॥ हि
रण्यवर्णामिति पंचदशर्चस्य कर्दमानंदचिक्लीतेंदिरासुताः ऋषयः श्रीर्देवता आद्यास्तिस्रोनुष्टुभः चतु
र्थी प्रस्तारपंक्तिः पंचमीषष्ठ्यौ त्रिष्टुभौ ततोष्टावनुष्टुभोंत्या प्रस्तारपंक्तिः प्रत्यृचं समिदाज्यचरुहो
मे विनियोगः॥ त्वन्नः सोम विश्वतो वयोधा इत्यस्य प्रगाथः सोमस्त्रिष्टुप्॥ पायसहोमे विनियोगः॥
त्वन्नः सोम विश्वतो रक्षा राजन्निति वा॥ अस्य प्रगाथः सोमो गायत्री॥ यातेरुद्रेति कश्यपो रुद्रः स्त

रानुष्टुप्॥ चतुर्गृहीताज्यहोमे विनियोगः॥ सप्तमहाव्याहृतीनां विश्वामित्रादय ऋषयोग्न्यादयो देवता
गायत्र्यादीनि छंदांसि आज्यहोमे भूः भुवः स्वः महः जनः तपः सत्यं एवं कृत्वा स्विष्टकृदादि प्रायश्चित्तां कु
स्यंतं कृत्वा लोकपाल नवग्रह विनायकादिभ्यो निरृतीप्राच्यां रुद्रक्षेत्रपालयोश्च बलीन् दत्वा पूर्णा
हुतिं जुहुयात्॥ तत्र मंत्राः सप्त मुंचा दुर्मिरित्येकादशर्चस्य वामदेव आपस्त्रिष्टुप् अंत्या जगती॥ प्रजा
पते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥ पूर्णादर्वि विश्वेदेवाः शतक्रतुरनुष्टुप्॥ सप्त ते अग्ने सप्तवान
ग्निर्जगती पूर्णाहुतिहोमे विनियोगः॥ एवं सर्वत्र॥ ततो होमशेषं समाप्य प्रधानकुंभदक्षिणतः स्थं
डिले नवारं त्र्यंबकमंत्रं जपित्वा तथैव रुद्रकुंभं च स्पृष्ट्वा कृत्वा रुद्रैकादशिन्यादि जपित्वा गोधादिभिः
कुंभद्वयगततीर्थनिरुज्ञावस्य ऋत्विगाचार्यः सर्वकुंभोदकैर्भद्रासनोपविष्टसापत्यकलत्रं यज
मानमभिषिंचेत्॥ तत्र मंत्राः॥ अक्षीभ्यामिति षण्णां काश्यपो यक्ष्मनाशनोनुष्टुप् अभिषेके विनियोगः॥ एव

शां.म.
९६

मुत्तरत्रयवस्वविश्वचर्षणा इति त्रिंशार्चस्य अत्र वैखानसाः पवमानसोमो गायत्री ॥ आपो हि ष्ठेति
नवर्चस्य अंबरीषः सिंधुद्वीप आपो गायत्री अंत्ये द्वे अनुष्टुभौ पंचमी वर्द्धमाना सप्तमी प्रतिष्ठा ॥ यत
इंद्रेति द्वयोः सूक्तर्षयो विश्वेदेवा अनुष्टुप् ॥ सहस्राक्षेणेति ऋचस्य प्राजापत्यो यक्ष्मनाशनो यक्ष्म
नाशस्त्रिष्टुप् ॥ द्वयोरंत्यानुष्टुप् ॥ देवस्य त्वेति त्रिण्णि यजूंषि लिंगोक्ता ॥ यज्जाग्रत इति षण्णां शिवसंकल्पमंत्रा
णां प्रजापतिर्मनस्त्रिष्टुप् ॥ योसौ वज्रधरो देवो महेंद्रो गजवाहनः ॥ मूलजातशिशोर्दोषं माता
पित्रोर्व्यपोहतु ॥ योसौ शक्तिधरो देवो हुतभुङ् मेषवाहनः ॥ सप्तजिह्वश्च देवोग्निर्मूलदोषं
व्यपोहतु ॥ योसौ दंडधरो देवो धर्मो महिषवाहनः ॥ मूलजातशिशोर्दोषं व्यपोहतु यमो मम ॥ यो
सौ खड्गधरो देवो निर्ऋती राक्षसाधिपः ॥ प्रशामयतु मूलोत्थं दोषं गंडांतसंभवं ॥ योसौ पाशधरो देवो
वरुणश्च जलेश्वरः ॥ नक्रवाहः प्रचेता नो मूलोत्थानं व्यपोहतु ॥ योसौ देवो जगत्प्राणो मारुतो मृग

राम
९६

वाहनः ॥ प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः ॥ योसौ निधिपतिर्देवः खड्गधृग् वाजिवाहनः ॥ मातापि
त्रोः शिशोश्चैव मूलदोषं व्यपोहतु ॥ योसौ पशुपतिर्देवः पिनाकी वृषवाहनः ॥ आश्लेषामूलगंडांतदोषमा
शु व्यपोहतु ॥ विघ्नेशः क्षेत्रपा दुर्गा लोकपाला नवग्रहाः ॥ सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः ॥ आश्ले
षाग्रजान्तोतु आश्लेषाग्रजजातस्य मातापित्रोर्धनस्य च ॥ भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु ॥ योसौ
वागीश्वरो नाम अधिदेवो बृहस्पतिः ॥ मातापित्रोः शिशोश्चैव गंडांतं सव्यपोहतु ॥ पितरः सर्वभूतानां रक्षं
तु पितरः सदा ॥ सर्वनक्षत्रजातस्य वित्तं वस्त्राति बांधवान् ॥ इति विशेषः ॥ ततः तद्यो आयुर्विश्वेदेवा आर्कि
रात्रस्त्रिषकः ॥ ततो वस्त्रांतरितनिर्ऋतिरुद्रकुंभोदकेन स्नापितो यजमानो धृतः धौतवस्त्रो सापत्यकल
त्र आज्यं रूपं रूपमित्यवेक्ष्य विप्राय दत्वा चार्यादीन् अभ्यर्च्याचार्याय गां ब्रह्मणे वृषं सदस्याय अश्वं रु
ज्ञापितेभ्यो छत्रं वृषभेन्वा घलान्येतत्रत्न्यस्यं वा दत्वा स्वशक्त्या ऋत्विग्भ्यो दक्षिणां त्रयसीं दत्वोत्तरहस्सी

कृत्वा यो वि॥ यां त्वितिविसृज्याचार्याय निऋतिग्रहप्रतिमां कुंभादि रुद्रजापिने रुद्रप्रतिमां कुंभादि
संकल्पपूर्वकं दत्वाग्निमभ्यर्च्य गच्छ गच्छेति विसृज्य शक्त्या तत्तदर्द्धं दशवा ब्राह्मणान्भोजयित्वा शांत्या
शी वाचयित्वा यस्य स्मृत्येत्याद्युक्त्वा सस्वजनो भुंजीत॥ ॥इति चंद्रनीलकंठकृते भास्करे शांति
मयूखे मूलाश्लेषाशांतिप्रयोगः॥ ॥अथ वैधृतव्यतीपातसंक्रांतिशांतिः॥ ॥शौनकः॥ ॥कु
मारजन्मकाले तु व्यतीपातश्च वैधृतिः॥ संक्रमे च दिने तत्र जातो दारिद्र्यकारकः॥ दरिद्राणां मरणं दुः
खव्याधिपीडासमुद्भवं॥ अप्रियो मृत्युमाप्नोति नात्र कार्या विचारणा॥ स्त्रीणां शोकं च दुःखं च स
र्वनाशकरो भवेत्॥ शांतिर्वा पुष्कलाकाय तिस्य दोषो न कश्चन॥ गोमुखप्रसवं कुर्याच्छांतिं कुर्यात्प्र
यत्नतः॥ जपाभिषेकदानैश्च होमादपि विशेषतः॥ नवग्रहमखं कुर्यात्तस्य दोषोपशांतये॥ प्रथमं गो
मुखं जन्म ततः शांतिं समाचरेत्॥ गृहस्य पूर्वदिग्भागे गोमयेनानुलिप्य च॥ अलंकृते सुदेशे तु व्रीहि

राशिं प्रकल्पयेत्॥ पंचद्रोणमितं धान्यं तदर्द्धं तंडुलेन वा॥ तदर्द्धं तु तिलैः कुर्याद्भिन्नोन्योपरि कल्पयेत्॥
कव्यद्वितयराशौ तु अष्टपत्रं लिखेद्बुधः॥ पुण्याहं वाचयित्वा तु आचार्यं वृणुयात्पुरा॥ आचारवंतं धर्मज्ञं
कुलीनं च कुटुंबिनं॥ मंत्रतत्वार्थतत्वज्ञं शांतिकर्मणि कोविदं॥ पंचांगभूषणं दद्यात्सद्वस्त्रांगुलीयकं॥
राशौ प्रतिष्ठितं कुंभमव्रणं सुमनोहरं॥ तीर्थोदकेन संपूर्य्य सर्वौषधिपल्लवं॥ सगव्यं गंधरत्नं च वस्त्र
युग्मेन वेष्टयेत्॥ तस्योपरि न्यसेत्पात्रं सूक्ष्मं मंत्रसंयुतं॥ प्रतिमां स्थापयेद्धीमान् साधिप्रत्यधिदेव
तां॥ चंद्रादित्याकृती पार्श्वे मध्ये वैधृतिमर्चयेत्॥ एवमेव व्यतीपाते शांतौ संक्रमणे तु॥ भानो रूप
रतो रुद्रमपि दक्षिणतो यजेत्॥ निष्कमात्रेण वार्द्धेन पादेनापि स्वशक्तितः॥ प्रतिमां कारयेद्धीमांस्तत्तल्ल
क्षणलक्षितं॥ प्रतिमापूजनार्थाय वस्त्रयुग्मेन वेष्टयेत्॥ अधिदेवो भवेत्सूर्यश्चंद्रः प्रत्यधिदेवतं ततो व्या
घ्रतिपूर्वेण पूजयेत्सुसमाहितः॥ त्र्यंबकेन मंत्रेण प्रधानप्रतिमां यजेत्॥ भक्त्यैतिमंत्रेण सूर्यपू

जांसमाचरेत्॥ आप्यायस्वेतिमंत्रेण सोमपूजांसमाचरेत्॥ उपचारैः षोडशभिर्यद्वापंचोपचारकैः॥
अर्चित्वा गंधपुष्पाद्यैः फलंनैवेद्यमर्पयेत्॥ मृत्युंजयेनमंत्रेण प्रधानप्रतिमांस्पृशेत्॥ अष्टोत्त
रसहस्रंवा अष्टोत्तरशतंतुवा॥ अष्टाविंशतिवाध्यायपूजायां च स्वशक्तितः॥ सर्वसारं प्रजप्या
थसोममंत्रतः॥ आतोन्वप्रतिसूक्तंचवनजा अग्नेश्वसूक्तकं॥ जपेत्नुपौरुषसूक्तं त्रियंबकमतःपरं॥
कुंभंस्पृष्ट्वाचतुर्दिक्षुजपंकुर्युस्तथर्त्विजः॥ कुंभस्यपश्चिमेदेशेस्थंडिलेग्निप्रकल्पयेत्॥ स्वगृह्यो
क्तविधानेनकारयेत्संस्कृतानलं॥ त्रैयंबकेनमंत्रेणसमिदाज्यचरून्हुनेत्॥ अष्टोत्तरसहस्रं
वा अष्टोत्तरशतंतुवा॥ अष्टाविंशतिवाकुर्यात्स्वस्यशक्त्यनुसारतः॥ मृत्युंजयेनमंत्रेणतिलहोमं राम
समाचरेत्॥ ततः स्विष्टकृतंकृत्वा अभिषेकंचकारयेत्॥ समुद्रज्येष्ठास्सूक्तेन आपोदिष्टान्त्वेन ९८
च॥ अक्षीभ्यामितिसूक्तेनपावमानीभिरेवच॥ त्रैयंबकेनतत्सूर्य आप्यायस्वेतिमंत्रतः॥ सुरास्त्वा

मितिमंत्रेण अभिषेकंसमाचरेत्॥ सुरास्त्वामभिषिंचंत्वित्यादिकोभिषेकमंत्रसमुदायोयुतहोम
विधानेद्रष्टव्यः॥ अभिषेकाद्युतवस्त्रमाचार्यायनिवेदयेत्॥ श्वेतवस्त्रधरोभूत्वाभूषणाद्यैरलं
कृतः॥ यजमानस्त्रियायुक्त आज्यावेक्षणमाचरेत्॥ आचार्यंपूजयेत्सम्यक् वस्त्रहेमांगुलीयकैः॥ गो
दानवस्त्रदानेनचस्वर्णदानेनविशेषतः॥ तद्दोषशमनार्थाय आचार्यायप्रदापयेत्॥ प्रच्छादनपटंदद्यात्त
तः॥ शांतिर्भवेदिति॥ जापकेभ्योब्राह्मणेभ्योदक्षिणाः प्रतिपादयेत्॥ दीनांधकृपणेभ्यश्चप्रदद्या
त्स्वदक्षिणां॥ ब्राह्मणान्शतसंख्याकान्मिष्टान्नैर्भोजयेत्ततोन्॥ बंधुभिः सहभुंजीतयथाविभ
वसारतः॥ एवंयः कुरुतेसम्यग्नितदुःखमवाप्नुयात्॥ आयुरारोग्यमैश्वर्यंमातापित्रोः शिशोरपि॥॥
अथप्रयोगः॥ ॥ कर्त्रागोमुखप्रसवंकृत्वामासैपक्षाद्युत्तरम्यास्यशिशोर्वैधृतौव्यतीपातेसंक्रां
त्यांवास्यमास्यचितारिष्टस्यनिरासार्थंशांतिकरिष्य इतिसंकल्प्यगणेशपूजास्वस्तिवाचनमातृ

शां०प्र०
९५

काश्यपाद्दक्षिणाच्चाचार्यादिवरणानि कुर्यात्॥ अथाचार्यः सर्षपविकरणादि कृत्वा प्राच्यां गोम-
योपलिप्ते चतुर्विंपंचद्रोणं तदर्द्धं तदर्द्धमितान्क्रमात् व्रीहितंदुलतिलानन्योन्योपरि राशी चतु-
तत्राष्टदलं विलिख्य तत्कर्णिकायां कुंभं संस्थाप्य तीर्थोदकेनापूर्य तत्र सप्तमृत्पंचपल्लववरत्नग-
न्धाष्टगंधसर्वौषधीः क्षिप्त्वा वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रं निधाय तत्रैव धृतिव्यतिपातयोरा-
नोमध्ये त्र्यंबकमिति रुद्रं तद्दक्षिणे तत्सूर्य इति मंत्रस्य मैत्रावरुणिर्वसिष्ठः सूर्यस्त्रिष्टुप् सूर्या-
वरुद्दवर्षिति सूर्यमुत्तरस्मिन्नाप्यायस्वेति सोमं संक्रांतिशांतौ तु मध्ये सूर्यं तद्दक्षिणतोग्निं दूतं उत्तरे-
ग्निमुत्तरतो रुद्रं ततः प्रतिमास्वावाह्य षोडशोपचारैः पंच निवेद्य संपूज्य रुद्रसूर्यसोमप्रतिमा-
स्वष्टाष्टसहस्राष्टशताष्टाविंशत्यान्यतमसंख्यया मृत्युंजयमंत्रमुदुत्यमित्यादि सर्वसौरमं-
त्राप्यायस्वेति च क्रमाज्जपेत्॥ संक्रांतिशांतौ तु पूर्वं सौरजपस्ततो मृत्युंजयजपः॥ ततः स्वगृ-

राम
९५

MEMORIAL

प्रागादिक्रमेणानोन्नत्राग्रे सदस्यशीर्षां कुशयेति सूक्तानि जपित्वा कुंभात्पश्चिमेग्निं संस्थाप्य ग्र-
हवाहनादिपूजां तं कृत्वान्वादध्यात्॥ तत्र चक्षुषी आज्येनेत्यंते ग्रहान्समित्चर्वाज्यैः प्रतिद्रव्य-
मष्टाविंशत्यष्टान्यतरसंख्यया अधिदेवताप्रत्यधिदेवतादि यथाशक्तिसंख्यया रुद्रसूर्यसोमान्
समिच्चर्वाज्यैस्तत्तन्मंत्रैर्मृत्युंजयमंत्रेण च तिलाहुतिभिरष्टसहस्राष्टशताष्टाविंशत्यन्यतमसंख्य-
याशेषेण स्विष्टकृतमित्यादि व्यतीपातसंक्रांतिशांतौ तु सूर्याग्निरुद्रानिति विशेषतः॥ ततः आज्यभा-
गांतरे ध्यानक्रमेण हुत्वा बलिदानांते वसुधारोदकैः समुद्रज्येष्ठा इति सूक्तेनापि॥ दिष्टेति चेना-
ह्रीम्यामिति सूक्तेन पावमानीभिः प्रधानाधिप्रत्यधिदेवतामंत्रैः सुरास्त्वेत्यादिपौराणैश्चाभिषि-
क्तो यजमानो निषेकवस्त्रमाचार्याय निवेद्याज्यमवेक्ष्य पूर्णाहुतिं हुत्वाचार्याय धेनुं वस्त्रयुग्मा-
ङ्गुलीयकादि ऋत्विग्भ्यश्च दक्षिणां दत्त्वान्येभ्यश्च भूरिदक्षिणां दत्त्वा शतं ब्राह्मणान्भोज-

यित्वा बंधुभिः सहभुंजीतेति वैधृती व्यतीपात संक्रांतिशांतयः॥ ॥अथैकनक्षत्रजातशांतिः
॥ ॥गर्गः॥ ॥एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः॥ प्रसूतिश्च तयोर्मृत्युर्भवेदेकस्य निश्च-
यः॥ तद्दोषनाशाय तदा प्रशस्तां शांतिं च कुर्याद्विभवेन वा॥ संपूज्य नक्षत्रप्रतिमां तदग्रे दानं
च कुर्याद्विभवानुरूपं॥ तत्र शांतिं प्रवक्ष्यामि सर्वाचार्यमतेन तु॥ शुभर्क्षे शुभवारे च चंद्रताराब-
लान्विते॥ रिक्तां विष्टिं विवर्ज्यैव तु प्रारभेद्विभवे सुधीः॥ आचार्यं वरयेत्पूर्वं चतुरश्च द्विजोत्तमा-
न्॥ पुण्याहं वाचयित्वा तु शांतिकर्म समाचरेत्॥ अग्नेरीशानदिग्भागे नक्षत्रप्रतिमां ततः॥ तन्न-
क्षत्रोक्तमार्गेण अर्चयेत्कलशोपरि॥ रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत्॥ स्वशाखोक्तेन
मार्गेण कुर्यादग्निमुखं ततः॥ अनेनैव तु मंत्रेण हुनेदष्टोत्तरं शतं॥ प्रत्येकं समिदाज्ये प्राय- राम
श्चित्तांतमेव च॥ अभिषेकं ततः कुर्यादाचार्यः पितृपुत्रयोः॥ वस्त्रालंकारगोदानैराचार्यं पूजयेत्तु १००

नः॥ ऋत्विजां दक्षिणां दत्वा माषत्रयसुवर्णकं॥ देवताप्रतिमादानं धान्यवस्त्रादिभिः सह॥ यानश-
य्यासनादीनि दद्यात्तद्दोषशांतये॥ भोजयेद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः॥ ॥अथ प्रयोगः
॥ ॥कर्त्ता मासपक्षाद्युल्लिख्यास्य शिशोः पित्रा ह्येकनक्षत्रोत्पत्तिसूचितारिष्टशांत्यर्थमेकनक्षत्रशां-
तिं करिष्य इति संकल्प्य गणेशपूजनस्वस्तिवाचनाभ्युदयिकाचार्यर्त्विग्वरणानि कुर्यात्॥ अथा-
ग्नेरीशान्यामाचार्यः कुंभं संस्थाप्य रक्तवस्त्रयुग्मेनाच्छाद्य तस्मिन्पूर्णपात्रोपरि तत्तन्नक्षत्रोक्त-
मंत्रेण प्रतिमायां तन्नक्षत्रां तद्देवतां वावाह्य संपूज्याग्निं प्रतिष्ठाप्यान्वाधायाज्यभागांतं कृत्वा
तत्तन्नक्षत्रमंत्रेण समिच्चर्वाज्यानि प्रत्येकमष्टोत्तरशतं हुत्वा होमशेषं समाप्य शिशुं तत्पित्रादीं-
श्चाभिषिंचेत्॥ ततः कर्त्ता नक्षत्रं पूजां कृत्वा विसृज्य प्रतिमादिकं गवादिकं चाचार्याय दत्वर्त्विग्भ्य-
श्च प्रत्येकं सौवर्णमाषत्रयात्मकां यथाशक्ति वा दक्षिणां दत्वा यथावित्तं यानशय्यासनादीनि च

शां॰म॰
१०१

दत्वाब्राह्मणान्भोजयित्वास्वयंभुंजीतेत्येवंनक्षत्रशांति॥ ॥अथग्रहणोत्पत्तौशांतिः॥ ॥
शौनकः॥ ॥ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते॥व्याधिपीडातदास्त्रीणामादौतुसंतुदर्शनात्॥
इत्थंसंजायतेयस्तुतस्यमृत्युर्नसंशयः॥व्याधिपीडाचदारिद्र्यंशोकश्चवक्ष्येहोत्रवेनशांतितेषां
प्रवक्ष्यामिनराणांहितकाम्यया॥यस्मिन्नृक्षेविशेषेणग्रहणंसंप्रजायते॥तदृक्षाधिपतेरूपं
सुवर्णेनप्रकल्पयेत्यथाशक्त्यानुसारेण विन्नशाठ्यंनकारयेत्॥सूर्यग्रहेसूर्यरूपंसुवर्णेनवि
शेषतः॥चंद्रंचंद्रग्रहेधीमान्रजतेनविशेषतः॥राहुरूपंप्रकुर्वीतनागेनैवविचक्षणः॥शुचौ
देशेप्रयत्नेनगोमयेनप्रलेपयेत्॥नागेनसीसेनतस्योपरिन्यसेद्धीमान्नववस्त्रेसुशोभने॥ राम
त्रयाणांचैवरूपाणांस्थापनंतत्रकारयेत्॥रक्तांबररक्तगंधंरक्तपुष्पांबराणिच॥सूर्यग्रहे १०१
प्रदातव्यंसूर्यप्रीतिकरायच॥श्वेतवस्त्रंश्वेतमाल्यंश्वेतगंधाक्षतादिभिः॥चंद्रग्रहेप्रदातव्यं

चंद्रप्रीतिकरायच॥राहवेचैवदातव्यंकृष्णपुष्पांबराणिच॥दद्यान्नक्षत्रनाथस्यश्वेतगंधानुलेपने॥
सूर्यंसंपूज्यधीमानाकृष्णेनेतिमंत्रतः॥चंद्रग्रहेत्वपालाशैःसमिद्भिर्जुहुयात्ततः॥दूर्वाभिर्जुहुया
द्धीमान्राहोःसंप्रीणनायच॥समिद्भिर्जलवृक्षोत्थैशांतियाजुहुधुचः॥निग्रायनक्षत्राधिपतये॥आ
ज्येनचरुणाचैवतिलैश्चजुहुयात्ततः॥पंचगव्यैःपंचरत्नैःपंचत्वक्पंचपल्लवैः॥जलैरोषधिकल्कैश्च
सहितैःकलशोदकैः॥औषधिकल्कैःसर्वौषधिकल्कैःअभिषेकंप्रकुर्वीतयजमानंप्रयत्नतः॥मंत्रैर्व
रुणदैवत्यैरापोहिष्ठादिभिस्त्रिभिः॥इमंमेगंगेतिरस्तत्वायामीतिमंत्रकैः॥अभिषेकेनिवृत्तेतुयजमा
नःसमाहितः॥आचार्यंपूजयेत्पश्चात्सुशांतोनियतेंद्रियः॥तस्मैदद्यात्प्रयत्नेनरत्नाप्रतिकृतित्रयं॥
दक्षिणाभिश्चसंयुक्तंयथाशक्त्यनुसारतः॥ब्राह्मणान्भोजयित्वानुप्रणिपत्यक्षमापयेत्॥तेभ्यो
पिदक्षिणांदद्याद्यजमानःसमाहितः॥अनेनविधिनाशांतिंकृत्वासम्यग्विशेषतः॥अकालमृत्यु

शो कं च व्याधिपीडां त्वतो मुच्यात्॥ सौरं सौमनस्यं नित्यं सौभाग्यं लभते नरः॥ इत्थं ग्रहणजातानां
सर्वारिष्टविनाशनं॥ कथितं गार्गविप्रेण दक्षोनुकाय महात्मने॥ ॥इति चंद्रसूर्यग्रहणप्रसूतिशांतिः॥
॥अथ विषघटिकाशांतिः॥ ॥तत्र वृद्धगार्ग्यः॥ ॥विषनाडीषु संजातं पित्र त्यात्य धेतात्मतां॥ नाशाद्
द्विषनाशस्त्राद्धेः कुलस्यग्नेष्टमेपि वा॥ तद्दोषपरिहाराय शांतिकर्म समाचरेत्॥ रुद्रो यमोग्निर्मृत्युश्च॥ देव
ताः परिकीर्तिताः॥ सुवर्णेन यथाशक्त्या तन्त्वक्षणसंयुताः॥ प्रतिमाः कारयित्वा तु आढकव्रीहिभिः स्थले॥
स्थंडिलं परिकल्प्याथ कुंभं सौषधिसंयुतं॥ जलैः संपूर्य संस्थाप्य मृदादि प्रक्षिपेत्ततः॥ वस्त्रद्वयेन संवे
ष्ट्य पंचरत्नानि निक्षिपेत्॥ कुंभोपरि तु संस्थाप्य चतस्रः प्रतिमास्तथा॥ तत्तन्मंत्रैश्च संपूज्य गंधपु
ष्पोपहारकैः॥ कद्रुद्रायेति मंत्रेण यमाय सोममित्यथ॥ अग्निर्मूर्द्धेति मंत्रेण परं मृत्योऽइति त्वथ॥ राम
एतैश्चतुर्भिर्मंत्रैश्च क्रमाद्धवनं तथा॥ समिद्भिश्चरुघृतद्रव्यैः प्रत्येकं च यथाक्रमं॥ ऋत्विग्भिश्च सहा १०२

चार्येण हुनेदष्टसहस्रकं॥ अष्टोत्तरशतं वाथ अष्टाविंशतिमेव वा॥ ततस्तिलैर्हुनेद्देवांस्तत्तन्मंत्रै
श्च स्पवित्॥ ततोभिषेचयेदेनं मंत्रैः पौराणिकैः क्रमात्॥ प्रार्थितो भगवान्नीशः पिनाकी सर्वतो मुखः॥
तव मूर्त्तिप्रदानेन समेस्ता शोषदोषवः॥ ईषत्पीनोयमः कालो दंडहस्तः प्रशांतधीः॥ रक्तभ्रूकुपा
शांतःकृद्धो मद्विषस्य शिवं कुरु॥ पिंगलश्मश्रुकेशांतः पिंगाक्षश्चतुरोगणः॥ छागस्य साक्षसू
त्रश्च संप्रार्थितः शांतिध्यस्वकः॥ तव मूर्त्तिप्रदानेन मम पापं व्यपोहतु॥ दंष्ट्राकरालवदनो नीलांज
नसमाकृतिः॥ धकूरवक्त्रो गदापाणिरस्तु मायानुसर्वदा॥ इत्थमेव विधैर्मंत्रैर्यथाविधि समा
हितः॥ गोभूहिरण्यवस्त्रैश्च आचार्यं पूजयेत्सुधीः॥ एवं कुर्यात्प्रदानेन विषदोषः प्रशाम्यति
॥ ॥इति विषघटीशांतिः॥ ॥अथ गंडांतशांतिः॥ ॥गार्गिः॥ अश्विनीमघमूलादौ त्रिवेदनवना
डिकाः॥ रेवतीसर्पशाक्रांते मासरुद्ररसाः क्रमात्॥ अश्विनीमघमूलादौ नाडिकाद्वितयं तथा

अश्विनीमघमूलानांपूर्वार्द्धेबाध्यतेपिता॥ पूषादिसर्पपश्चार्द्धेजननीबाध्यतेत्रिशो॥ पितृश्चश्वदि
वाजातोरात्रिजातस्तुमातृकः॥ आत्मनासंध्ययोर्ज्ञातोनाडिगंडेनिरामयः॥ सर्वेषांगंडजातानांपरि
त्यागोविधीयते॥ वर्जयेद्दर्शनंयावत्षण्मासिकंभवेत्॥ तस्यशांतिंप्रवक्ष्यामिसोममंत्रेणभक्तिमा
न्॥ कांस्यपात्रंप्रकुर्वीतपलैःषोडशभिर्नच॥ अष्टभिश्चचतुर्भिश्चघृतांवा[illegible]नंतथा॥ तन्मध्येपा
यसंपूर्णंनवमीतेनपूरितं॥ राजतंचंद्रमर्चेतिसितपुष्पसहस्रकैः॥ देवजःक्षौमवासाश्चशुक्लमाल्यां
बराचितः॥ सोमोदमितिसंवित्यपूजांकुर्या[illegible]दतंद्रितः॥ जपेत्साहस्रकंमंत्रंअघ्यानसमाहितः॥ आ
प्यायस्वेतिमंत्रेणपूजांकुर्यात्समाहितः॥ दद्याद्वैदक्षिणामिष्टांगंडदोषप्रशांतये॥ शुक्लांवागांश्चवत्सचैव राम
ताम्रपात्रसमन्वितं॥ गंडदोषोपशांत्यर्थंदद्याद्वेदविदेशुचिः॥ ॥अथदिनक्षयादिशांतिः॥ ॥गर्गः॥ १०३
दिनक्षयेव्यतीपातेव्याघातेविष्टिवैधृते॥ मूलेगंडेतिगंडेचपरिघयमघंटके॥ कालदंडेमृत्युयोगेदुष्ट

योगेसुदारुणे॥ तस्मिन्गंडदिनेप्राप्तेप्रसूतिर्यदिजायते॥ अतिदोषकरीप्रोक्ता तत्रपापयुतेसति॥ वि
चार्यतत्रदैवज्ञःशांतिंकृत्वायथाविधि॥ यजमानोदेवतानांब्राह्मणानांचैवपूजनं॥ दीपंश्चावालयेत्स
म्यग्घृतेनपरिदीपयेत्॥ अभिषेकंशंकरस्यअश्वत्थस्यप्रदक्षिणं॥ आयुर्वृद्धिकरंजाप्यंसर्वारिष्टविना
शनं॥ गुरुदैवतमंत्राणांपूजनंगोत्रवर्द्धनं॥ पुष्ट्यायुस्तुष्टिशांत्यर्थंअभीष्टफलसिद्धये॥ सर्वारिष्टहरा
र्थायग्रहयज्ञंसमाचरेत्॥ शिवायविधिवत्स्नानादीपदानंकरोतिसः॥ अखंडगोघृतेनैवससैवमृत्युंजय
न्नरः॥ विष्णुमूर्तिमरूपुण्यमश्वत्थंश्रीकरंसदा॥ प्रदक्षिणंनरोभ्रमात्कृत्वामृत्युंजयेन्नरः॥ सर्वसं
पत्समृध्यर्थंनित्यकल्याणवृद्धये॥ अभिष्टफलसिध्यर्थंकुर्याद्ब्राह्मणभोजनं॥ अभिषेकंशिवेशांतिंकृ
त्वाभक्त्यानरोत्तमः॥ अकालमृत्युंनिर्जित्यदीर्घायुर्जायतेनरः॥ गाणपत्यंपुरुषसूक्तंसौरंमृत्युंजयंतु
था॥ शांतिजाप्यंरुद्रजाप्यंकृत्वामृत्युंजयोभवेत्॥ मूलेवासर्पगंडेवाकुर्यादेतानियत्नतः॥ आयुर्वृद्धि

कराथीयगंडदोषप्रशांतये॥ ॥इतिगंडांतजननशांतिः॥ ॥अथत्रिकशांतिः॥ ॥शांतिसर्वस्वे
सुतत्रयेसुताचेत्स्यात्तत्त्रयेवासुतोयदि॥मातापित्रोःकुलस्यापितदानिष्टंमहद्भवेत्॥ज्येष्ठनाशो
धनहानिर्दुःखंवासुमहद्भवेत्॥तत्रशांतिप्रकुर्वीतवित्तशाठ्यविवर्जितः॥जातस्यैकादशाहेवाद्वा
दशाहेशुभेदिने॥आचार्यमृत्विजोवृत्वाग्रहयज्ञःपुरस्सरं॥सहवाग्रहयज्ञःस्यात्स्वस्ववित्तानुसारतः॥
ब्रह्मविष्णुमहेशेंद्रप्रतिमाःस्वर्णतःकृताः॥पूजयेद्धान्यराशिस्थकलशोपरिशान्तितः॥पंचमेकलशे
रुद्रंपूजयेद्रुद्रसंख्यया॥रुद्रसूक्तानिचत्वारिशांतिसूक्तानिसर्वशः॥द्विजएकोजपेद्धोमकालेतु
विःसमागतः॥आचार्योजुहुयात्तत्रसमिदाज्यतिलांश्चरुं॥अष्टोत्तरसहस्रंवाशतंवाविंशतिस्तु शम
वा॥देवतास्यश्चतुर्वक्त्रादिक्रमोपरपुरःसरं॥ब्रह्मादिमंत्रैरिंद्रस्ययतइंद्रभयामहे॥ततःस्विष्ट २०४
कृतंहुत्वाबलिपूर्णाहुतिंततः॥अभिषेकंकुटुंबस्यकृत्वाचार्यप्रपूजयेत्॥हिरण्यधेनुरेकाचऋ

MEMORIAL

त्विजांदक्षिणांततः॥प्रतिमागुरवेदेयाउपस्कारसमन्विताः॥कांस्यास्यवीक्षणंदत्वाशांतिपाठंतुकारये
त्॥ब्राह्मणान्भोजयेतत्रशक्त्यादीनानाथांश्चतर्पयेत्॥एवंशांतिविधानेनसर्वारिष्टविधायते॥ ॥
इतित्रिकशांतिः॥ ॥अथवैकृतशांतिविधिरुच्यते॥ ॥अकालप्रसवानार्यःकालातीतप्रजास्तथा॥
विकृतप्रसवाश्चैवयुग्मप्रसवनास्तथा॥अमानुषाअरंडाश्चअजातव्यंजनास्तथा॥हीनांगाअ
धिकांगाश्चजायतेयदिवास्त्रियः॥पशवःपक्षिणश्चैवतथैवचसरीसृपाः॥विनाशंतस्यदेशस्यदे
शस्यकुलस्यचविनिर्दिशेत्॥निर्वासयेतान्नृपतिःस्वराष्ट्रात्स्त्रियश्चपूज्याश्चततोद्विजेंद्र॥विविधै
नैर्ब्राह्मणतर्पणैश्चततोस्यशांतिंसमुपैतिपापं॥ ॥अथयमलशांतिविधिः॥ ॥अत्रब्राह्मणंतदाकु
र्युश्राद्धितान्नियुस्यश्यायागौर्वापिमोजनयेत्का तत्रप्रायश्चित्तिरितिसोग्नयेमरुत्वतेत्रयोदशकपा
लपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येमरुत्वंतंयस्मिन्द्रियेराज्ञवेदवरमाऋदेवेत्याहुतिंवाहवनीयेजुहु

शां॰म
२०५

यादग्नयेमरुत्वतेस्वाहेतिसानत्रप्रायश्चित्तिरिति॥कारिका॥अथयस्यवधूर्गौर्विजनयेश्चेतुयमौत
तः॥समरुद्भ्यश्चरुंकुर्यात्पूर्णाहुतिमथापिवेतिकात्यायनगृह्ये॥अथातोयमलजननेविधिंव्याख्या
स्यामोयस्यनार्यागौर्वादासीवाउवाविकृतिंप्रसवेत्तत्प्रायश्चित्तीनवेत्पूर्णादिनात्चतुर्णांक्षीरवृक्षा
णांकषायानुपादरेत्॥प्लक्षवटोदुंबराश्वत्थशमीदेवदारुगौरसर्षपास्तेषांपयोहिरण्यंदूर्वांकुरैःस
पल्लवैःरष्टौकलशान्सपूर्यसर्वौषधीन्निर्दपतीस्नापयेदापोहिष्ठेतितिसृभिःकयानइतिद्वाभ्यांपंचवे पावकाय॰
णापंचवारुणोनेदमापःप्रवहतेप्रपापमितिस्नापयित्वा॰लंकृत्यनोदर्तेषूपविश्यमारुतंस्थालीपा
कंश्रपयित्वाज्यभागाष्टावित्याहुतीर्जुहोतिपूर्वोक्तैःस्नपनमंत्रैःस्थालीपाकस्यजुहोत्यग्नयेस्वाहा॰ राम
सोमाय॰पवमानाय॰मारुताय॰मरुद्भ्यः॰यमाय॰अंतकाय॰मृत्यवे॰अग्नये॰स्विष्टकृते॰स्वाहेत्ये॰ २०५
नदेवगृह्योस्यानेषुतल्लकःकपोतोवागृध्रःश्येनोवाप्रविशेत्तस्यमावास्योदेदेस्मीकमधुनालेवा

त्नवेदुदकुंभप्रज्वलनेआसनशय्यनत्नंगेगृगोधिकाद्वूकलासस्सरीसृपसर्पणेछत्रध्वजविनाशेघन्येषु
त्नकंपोल्कापातकाकसर्पसंगमप्रेक्षणादिष्वेतदेवप्रायश्चित्तंग्रहशांतिंचोक्तविधिनाकृत्वाआचार्याय
वरंदत्वाब्राह्मणान्भोजयित्वास्वस्तिवाच्याशिषःप्रतिगृह्णीयादिति॥पंचवेदाणिपदानियस्मिन्तसो
पंचवेदामंत्रः॥एवंपंचवारुणापितौचप्रयोगंवक्ष्ये॥॥अथप्रयोगः॥॥ममनार्यायायमलजननसूचित
सर्वारिष्टशांतिद्वाराश्रीपरमेश्वरप्रीत्यर्थंकात्यायनपरिशिष्टोक्तांसग्रहमखांयमलशांतिंकरिष्यइति
संकल्प्यगणेशपूजनाचार्यवरणंतंकुर्यात्॥ततआचार्योयदत्रसंस्थितेमितिसर्षपान्विकीर्यपूर्वस्यां
पूर्वादिक्रमेणाष्टौकलशान्नमहीद्यौरित्यादिनाक्षीरवृक्षकषायप्लक्षवटोदुंबराश्वत्थशमीदेवदारुगौ
स्वागोरसर्षपहिरण्यदूर्वांकुरपंचपल्लवसर्वौषधीयुतान्स्थ॥पयित्वानजैलेनसपत्नीकंयजमानंस्नाप
येत्॥तत्रमंत्राः॥आपोहिष्ठेतितिसृणांअंबरीषःसिंधुद्वीपआपोगायत्रीअभिषेकेविनियोगः॥अभिव

रुणस्यहेतंसदनमसिवरुणस्यऋतसदनमासीद्॥ अग्निः उदमापउत्यस्यसिंधुद्वीपआपोजुषु
अग्निः अपाघमपकिल्बिषमपकृत्यामयोरपः आपोमार्गत्वमस्मदपतुःस्वप्नंसुव॥ अग्निषेकेततो
वस्त्राद्यलंकृतौदंपतीदर्भेषुउपवेश्याचार्योग्निस्थापनंकुर्यात्॥ ततईशान्यांग्रहस्थापनंतेन्वा
धानंअस्मिन्अन्वाहितेग्नावित्याद्यन्वाधानंयक्ष्यमाणसमिद्वर्बाज्यैरपस्तिस्रस्तिः इदंतिसृभिः॥
वरुणमेकया॥ अथोघोस्यांअजेनअग्निंसोमंपवमानंमावकंमारुतं मरुतः यमंअंतकंमृत्युं॥
णकैकयाचर्वाहुत्याहुत्वाशेषेणस्विष्टकृतमित्यादि॥ ततोन्वाधानादिक्रमेणहोमंसमाप्यबलि
दानपूर्णाहुतिस्त्रिरभिषेकदक्षिणादानांतंकृत्वाब्राह्मणान्भोजयित्वास्वस्तिवंतोब्रुवं राम
त्वितिवाचयित्वातैःस्वस्त्युक्तेतस्यआशिषोगृह्णीयादिति॥ ॥इतियमलशांतिः॥ ॥अथप्र १०६
थमादिदिनेषुदेवीगृहीतबालकरक्षणं॥ ॥मदनरत्नेप्रयोगसारे॥ ॥प्रथमेदिनेगृह्णातिबालकं

बालिनीग्रहः॥ पापिनीग्रहीतिनारायणीयेपाठः॥ गंधिनीतिपुराणांतरे॥ तयागृहीतमात्रस्यचे
ष्टितान्यपलक्षयेत्॥ गात्रोद्वेगोनिराहारोलालाग्रीवाविवर्तनं॥ पेतधसतकोलोभमांजिष्टातालचं
दनैः॥ धूपयेन्महिलाक्षेणततोमुंचतिसाग्रही॥ लेपनधूपनेबालस्य॥ नारायणीयेबलिदानानुक्
तौ॥ मत्स्यमांससुराभक्ष्यगंधास्रक्धूपदीपकैः॥ बलिंदद्यादितिशेषः॥ बलिमंत्रः॥ प्रयोगसारे॥ ॐन
मश्चामुंडेजगवतिविद्युज्जिह्वेह्रींह्रूं३ अवसरंतुगृहाणकुतेघथागच्छंतुपातान्यतःस्थानेरुडोवापप
तिस्वाहाविद्युज्जिह्वेहांहींहुंहूंमुंचमुंचस्वाहेति॥ बालग्रहाणांविद्येयंत्रासाबलिनिवेदने॥ बलि
श्चरवसदयस्तेदिनाद्विवादयः॥ बलिस्थानानिप्रयोगसारे॥ कदंबश्चकरंजश्चविनीतोनिबणवश्च॥
अश्वत्थोदुंबरश्चैववृक्षाश्मातकवटौतथा॥ मात्रवष्टाक्रमेणोक्ताः पूर्वादीन्यांतदिग्गतः॥ तेषामेवं
समाश्रित्यबलिंदद्याद्यथोदितमिति॥ प्रतिस्थूलंप्रसुदकंप्रतिवृक्षमथापिवा॥ स्थूलंतरं॥ ह्वचिन्नुकं

लमित्येवपाठः॥ अत्राम्नायामनुक्तायांप्राकृशोक्तानांअनुसारतः॥ यत्राचारोविनेतत्रमानप्रणांब
लिमाहरेत्॥ कृत्वानीराजनांतबलिमितिविधिवद्बालमाहूयतत्रसंस्पृश्याङ्गैः समंत्रैस्त्रिरसिम्ब
कुसुमैरक्षतैश्चामयित्वाक्षिप्त्वाग्रेदेवतानायाविधिवदुपहितैस्तत्रगीतैः सुमंत्रैः कुर्याद्रक्षांसमी
रणमिवविलयंयातिदुष्टग्रहाग्निः॥ नीराजनमंत्रोङ्कारोनारायणायै॥ ब्रह्माविष्णुश्चरुद्रश्चस्कं
दोवैश्रवणस्तथा॥ रक्षंतुत्वरितंबालमुंचमुंचकुमारकं॥ कालगुणोत्तरे॥ पालाशाश्वत्थकपित्थ
बिल्वोदुंबरपल्लवाः॥ पंचत्वंगाःस्मृताह्येतेबालतोहितकारकाः॥ स्नापितंधूपितंबालंततोमुंचतेस
ग्रहः॥ प्रयोगसारेपि॥ पलाशोदुंबराश्वत्थबिल्वन्यग्रोधपल्लवाः॥ क्वथितेनकषायेणपरिषिंचेत्
प्रशांतये॥ परिषिंचेत्स्नापयेदितिमदनः॥ अत्रमंत्रः॥ ॐनमश्चामुंडे इत्यादिर्बलिदानेपूर्वमुक्तः॥ राम
रक्षामंत्रः॥ प्रयोगसारे॥ रक्षरक्षमहादेवनीलग्रीवजटाधरः॥ ग्रहैस्तुसहितोरक्षमुंचमुंचकुमा १०७

रकं॥ अमुंमंत्रंभूर्जपत्रेविलिख्यतत्पुत्रभुजेबध्नीयादितिमदनः॥ बालशिखास्पर्शपूर्वकंजपेन्मंत्र
उक्तः प्रयोगसारे॥ ॐसर्वमातरउमंग्रहंरंतुरुरोदय२स्फोटय२स्वाहागर्ज२ सरग२हूर२आमर्दय२हिम२
हनर एवंसिद्धिरुजाज्ञापयतिस्वाहा॥ अत्रहोमोपिप्रयोगसारे॥ ॐकूष्मांडिभगवतिसुरागिणिसमुंडिने
मुंच२दह२ पचसर२ गच्छ२ स्वाहा२॥ कृत्वाचतुष्पथेकुंडंमंत्रेणानेनमंत्रवित्॥ त्रिरात्रंपंचरात्रंवा
सहस्रंजुहुयात्तिलैः॥ यातिदुष्टग्रहाशांतिबलिनाचानुमोदिता॥ बालरोदनपरिहारार्थयंत्रमुक्तंप्र
योगसारे॥ षट्कस्रमध्येह्रींकारस्तन्मध्येशिशोर्नामविलिख्यषट्सुअस्रेषुधुधुलुधुलुस्वाहेतिमंत्र
स्यषडक्षराणिविलिख्यतद्बहिर्नेमिवद्वृत्तद्वयंविलिख्यतद्बहिरधोमुखेरईं चईरावेष्ट्यपंचोपचा
रैः संपूज्यबालहस्तेबध्नीयादिति॥ ॥अथबालग्रहस्तवः॥ ॥प्रयोगसारे॥ ॥प्रणम्यशिरसाशां
तिगरोशानंतमीश्वरं॥ बालग्रहस्तवंवक्ष्येसमस्ताभ्युदयप्रदे॥ तपसायत्प्रसादात्स्याद्वपुषावित्र

मेणाच॥निर्दिष्टोयःसदास्कंदःसनोदेवप्रसीदतु॥रक्तबाल्पांबरधरोरक्तगंधानुलेपनः॥रक्तु
दित्योज्वलश्रीनःसनोदेव॰योनंदनःपशुपतेमात्रणांपावकस्यच॥गंगोमाकृत्रिकानांचसनोदे
व॰देवसेनापरिवृतोदेवसेनार्चितःसदा॥देवसेनापतिश्रीमान्सनोदेव॰श्राक्रशक्तिधरःश्रू
रःकुमारःशिखिवाहनः॥सुरारिहामहासेनःसनोदेव॰प्रकृत्यासुंदरोदांतोदेवोश्चर्यादयान्वितः॥
नानाविनोदसंपन्नःसनोदेव॰प्रबोधासुप्रबोधाचबोधनासुप्रबोधना॥प्रबुद्धाचप्रबोधाचसुप्र
नासुनास्तथा॥मत्तोन्मत्तीतिविख्यातायोगिन्यःपांतुबालकं॥सुभ्रतारुक्मणीचैवमंदवेगावि
नोधरा॥विद्युज्जिह्वामहानासाशातानंदातथापराबालदाप्रमदाचेतियोगिन्यःपांतुबालकं॥ राम
हरिणीचाथवाराहीवानरीक्रोष्टुकीतथा॥कुबेरीकोरराक्षीचकुंभकर्णीचचंडिनी॥चलांकि १०८
कारिणीचेतियोगिन्यपांतुबालकं॥शुद्धाविशुद्धाश्रद्धाचयोगासिद्धामितंवदा॥सुभगाश्रमदा

गौरीबलावैकारिणीतिच॥नानाविज्ञानविख्यातायोगिन्यःपांतुबालकं॥लंबाप्रलंबाचतथालंब
कर्णीचलंबिका॥ज्वालाकरालीकालिंदीकालिकेतियथोदिताःस्वछंदाचारसंपन्नायोगिन्यःपां
तुबालकं॥प्रणतासुप्रणीताचमालिनीविश्वमालिनी॥विमलाकमलामालीलोलारोडीचवि
श्रुता॥विचरंत्यायथाकामंयोगिन्यपांतुबालकं॥वायुवेगामहावेगासुवेगावेगवाहिनी॥शांखि
नीहंसिनीदृष्टिपुष्टिःपौष्टिकसिद्धिदा॥दिव्यानुत्तावावादिन्योयोगिन्यःपांतुबालकं॥त्रामिणीत्रा
मिनीनित्यानिर्निन्नासुभगायुरु॥लेदिनीद्राविणीवामायोगिन्यपांतुबालकं॥रुद्रशक्तिवित्ति
क्रांतमेकाशीतिक्रमोदितं॥योगिनीवृंदमेतद्धिसिद्धविद्याधरार्चितं॥स्कंदग्रहाधिदेवंतद्बालकंपा
तुसर्वदा॥शकुनीरेवतीदेवीशिखाचमुखमंडिका॥प्रलंबापूतनाख्याचकूटपूतनिकायुतः॥
विजयागोमुखीध्वस्नासुंडमालातथापरा॥अधसंबाचपप्पाचेनुमुदाप्पप्यवांबिका॥मानिनी

चैककालीचदेवीप्रेतमुखातथा॥रौद्रीमार्जारिकान्स्यःकुरुगीचसुनाकूरा॥कालरात्रिश्चमाया
चक्रोलितापित्रिपिंचिकाभीतारणीचक्रवादीनीवरणादुर्जयापरा॥तापनीकरकोलीचमुक्त
रीमहाबला॥अहंकाराजयातद्वदजमेषात्रिदंडिका॥रोदिनीमुकुटाशिखाललाटापिंगलातथा
श्रीतलोवालिनीचैवतापसीपापराक्षसी॥मानसीधनदादेवीबलनावर्त्तिनीतथा॥यमुनाज
तवेदाचमालिनीकलहंसिनी॥कालिकादेवदूतीचवायसीपक्षिणीतथा॥स्वच्छंदापालिकाचैव
स्वामिनीचांबिकेतिच॥पंचत्रिंशत्कुलोत्पन्नाश्चतुःषष्टिसमीरिताः॥योगिन्योनित्यसंतुष्टाःस्कंद
यस्मारदेवता॥नानारक्षाधिकारस्थाबालकंपांतुसर्वदा॥महालक्ष्मीर्महानंगामहासेनामहाब
ला॥महाकंपामहाभीमामहाभीमामहोत्सवा॥महासेनामहाचंडामोदिनीवीरनायका॥एकवीरा
विशालाक्षीसुकेशीसुमनास्तथा॥सुकेशिनीचसंतुष्टादंडिनीचविलंबिनीत्कामिनीचाथसोव

MEMORIAL

णीसिंहवक्त्राकरंकिनी॥भ्रमराचंचलाचंपाचंडालासिद्धिदापरा॥शाकोदरीधृतिस्वाहास्वधाख्याच
सनातनी॥शांबराचतथादेवीनीलग्रीवातथांबिका॥वितलागंधिनीवामाकांडंताचैववाहिनी॥
कार्षणीमालतीकुछत्रकालकर्णीचचंडिका॥चित्राननागुहाचेतिपार्वतीसंगतिर्गता॥पंचाशल्लवसंघ
लशाकुनीदेवतांप्रिया॥योगिन्यःकामरूपिण्योबालकंपांतुसर्वदा॥विश्वंतपाप्रज्ञावज्ञासर्वज्ञासर्व
गागुहा॥दुर्गासिरस्वतीज्येष्ठाश्रेष्ठापश्चापरापरा॥प्रमदारोहिणीश्रीलाप्रह्वाप्रदादिनीविज्ञा॥विस्त
तिर्विनतिःप्रीतिःप्रकृतिःप्रमतिर्यथा॥एताश्चगवतास्त्र्ष्टायोगिन्योयोगसिद्धिदाः॥पंचविंशतिरा
ख्यातारेवतानोनिशिगोचरा॥जगदाप्यायनेक्राबालकंपांतुसर्वदा॥नंदश्चैवोपनंदश्चगोमतिसुमति
स्तथा॥विद्युजिह्वोमहाकालकरालस्तिमिलोचन॥तेजहोऽजविरूपाक्षगोमुखोवडवामुखः॥कोला
ननकरालश्चशंकुकर्णोविशेषराः॥एतेसकुंदनोत्पन्नावीराःषोडशराक्षसाः॥पूतनादेवताद्यु

ष्टाबालकंपांतुसर्वदा॥वज्रिणीशक्तिनीचाद्यादंडिनीखड्गिनीतथा॥पाशिनीध्वजिनीदेवीगदि
नीशूलिनीपरा॥पद्मिनीचक्रिणीचेतिसर्वाकाराभयप्रदा॥एतादिङ्निर्मितादेव्योयोगिन्योदेवकी
र्त्तिताः॥अधिष्ठितप्रधानायायायाश्चातपूतनाप्रसन्नामातरःसर्वाबालकंपांतुसर्वदा॥अर्थ-
कोजलकोष्टमातयःस्कंदश्चकीर्त्तितः॥वीरेशाःपितरःस्पष्टानैगमेयाधिदेवता॥पंचवक्त्रप्रधा
नास्तेबालकंपांतुसर्वदा॥भैरवावीरमातारःक्षेत्रपालाविनायकाः॥डाकिन्योरुद्रशाकिन्योयक्ष
रक्षांसिपन्नगाः॥वराश्चवानराःसमामनुष्याःपश्चवोमृगाःसरीसृपाश्चसंतुष्टाबालकंपातुसर्व
दा॥आदित्यावसवोरुद्राःपितरोमरुतस्तथा॥मनुयोमनवःकालाग्रहयोगाःसनातनाः॥सिद्धा
साध्याश्चगंधर्वाःदेव्यश्चाप्सरसावराःविद्याधरामहादेत्याबालकंपांतुसर्वदा॥सहजायोगजा
श्चैववीरजामंत्रजातथा॥योगिन्यायोगविनियोनानाविलवगोचराः॥भवानीनामसंतुष्टाबा

लकंपांतुसर्वदा॥भूर्लोकेचभुवर्लोकेस्वर्लोकेयाश्चमातरः॥अधश्चोर्ध्वंचतिर्यक्चचक्राउंत्योनंतमूर्त्त
यः॥प्रसन्नयोगसंपन्नादिव्यैश्वर्यसमन्विताः॥स्वच्छंदयोगसंभूतेभैरवैःपरिवारिताः॥रक्षंतुबाल
कंप्रीताःशांयच्छंतुचेतसा॥दिव्यंस्तोत्रमिदंपुण्यंबालरक्षाधिकारकं॥जपेत्संतानरक्षार्थंबालदो
षोपशांतिदं॥ ॥इतिबालस्तवः॥ ॥इदंचस्तवांतकृत्यमाघमासवर्षयोर्द्वितीयादिदिनमासवर्ष
घपिकार्यविशेषस्तूच्यते॥कुमारतंत्रे॥प्रथमेदिवसेमासेवर्षेवायोगिनीतदा॥अथवातंदिनं
नाम्नापूतनाक्रमतेशिशुं॥तद्गृहीतस्यबालस्यज्वरःस्यात्प्रथमंततः॥गात्रशोषश्चसौवर्णना
हारात्तास्त्रसंभवेत्॥छर्दिर्मूर्च्छाविकंपश्चहीनज्वरयुतस्तदा॥विधानंतत्रवक्ष्यामियेनमुंचतिपू
तना॥नदीमृत्तिकयाकुर्यात्प्रतिमांपुत्रिकांततः॥शुक्लोदनंशुक्लगंधस्तथाशुक्लानुलेपनं॥शुक्ल
पुष्पाणिचपंचध्वजाःपंचप्रदीपकाः॥स्वस्तिकाःपंचपूर्वाह्णेपूर्वस्यांदिशिसंयतः॥बलिंदद्यादथो

क्षीरश्वेतसर्षपमेव वा॥ निंबनिर्माल्यमार्जारनखकेशान्निंबपत्रकं॥ गव्यघृतं चैतत्तेन धूपयेदे
व बालकं॥ एवं दिनत्रयं कृत्वा चतुर्थे शांतिवारिणा॥ स्नापयेद्बालकं पश्चाद्भोजयेच्चापि द्विजान्॥
क्षीरेण भोजयेदेवं सुस्थो भवति बालकः॥ शांतिवारिणेति शं न इंद्राग्नी शं नो वात इत्यादिकैः स्व
स्वशाखापठितैर्मंत्रैरभिमंत्रितं वारि शांतिवारि॥ अथवा वक्ष्यमाणमंत्रेण शतं कृत्वाभिमंत्रितं वा
रि शांतिवारि॥ ॥द्वितीयदिवसे मासे हायने वा सुनंदनं॥ गृह्णाति पूतना बालं योगिनी स्वस्तना
पिवा॥ ततो भवेज्ज्वरः पूर्वं संकोचोदस्तपादयोः॥ दंतान्प्रखादत्यनिशं निमीलयति चक्षुषी॥ आ
हारं च न गृह्णाति दिवारात्रं च रोदति॥ अक्षिरोगं छर्दनं च भवेत्तीतिः पुनः पुनः॥ ज्ञात्वैवं तं च प्रजाये राम
वदत्येतच्छिशुलक्षणं॥ तंडुलप्रस्थपिष्टेन विनिर्माय पुत्रिकां॥ त्रयोदशध्वजा दीपाः स्वस्तिका १११
यवलोदना॥ प्रस्थप्रमाणपिष्टेन स्थिरा पूपाश्च मत्स्यकाः॥ मांसं चैसेतदखिलं पश्चिमायां दि

शि क्षिपेत्॥ पश्चिमायां च संध्यायां एतद्दद्याद्दिनत्रयं॥ धूपः शांतिस्नानब्राह्मणभोजनानि पूर्ववत्॥
॥तृतीयदिवसे मासे वर्षे वा पूतनाभिधा॥ गृह्णीयाद्योगिनी बालं ततः पूर्वं ज्वरो भवेत्॥ प्रस्थप्रमा
णपिष्टेन पुत्रिकां कारयेत्ततः॥ रक्तोदनं ध्वजो रक्तः स्वस्तिको रक्त एव च॥ रक्तपुष्पं रक्तगंधस्तथा रक्ता
नुलेपनं॥ पश्चिमायां च संध्यायामुदीच्यां निक्षिपेद्बलिं॥ धूपशांतिस्नानब्राह्मणभोजनादि पूर्व
वत्॥ ॥चतुर्थे दिने मासे तु वर्षे गृह्णाति बालकं॥ तुषमंडनिका नाम पूतना या च योगिनी॥ भीष
णाख्या ततस्तस्य जायते प्रथमं ज्वरः॥ गात्रभंगो स्थितिर्मूर्छा भवेद्वैवर्ण्यं वाक्षिमीलनं॥ वैवैकल्यं भया
मताः श्वासः कासो रुधिरिंगितं॥ तिलपिष्टमयीं कृत्वा पुत्रिकां विल्वकं रवे॥ अष्टांगं रचयेत्तु एवं
युक्तं शुक्लध्वजेन च॥ स्वस्तिके द्वे प्रस्थसिद्धान्नं कृतावदपूपकाः॥ त्रिसंध्यं पश्चिमाशायां बलिं दद्या
त्प्रयत्नतः॥ तावदपूपका इति अर्धप्रस्थपरोमितिनान्नेन कृता इत्यर्थः॥ गोशृंगस्पर्शनिर्मोकं लशु

शां.म.
११२

नेनिंबपत्रकांमनुष्यकेशमार्जारिलोमास्साज्यघृतंतथा॥एतैश्च धूपयेदेकनिशिसंध्यात्रयेपिच
एकस्मिन्निशिएकस्मिन्नेवदिनेबलिरित्यर्थः॥शांतिस्नानमंत्रब्राह्मणभोजनानिच॥ ॥पंचमेदिवसे
मासेवर्षेवापूतनाशिशुं॥बिडालिकाख्यागृह्णीयात्प्रथमंजायतेंतरा॥हिक्काश्वासश्चशूलंचगा
त्रेंगेगोरुविस्तथा॥तंदुलप्रस्थपिष्टेननिर्मायाथोरुपुत्रिकां॥शुक्लोदनंध्वजाःपंचस्वस्तिकाःपंच
चोज्वलाःपंचदीपाश्चशुक्लानिकुसुमानिचंदनं॥अपराह्णेवृक्षमूलेपश्चिमायांदिशिक्षिपेत्॥धू
पस्तुगोशृंगलशुनमित्यादिकः॥शांतिस्नानमंत्रब्राह्मणभोजनानिच॥ ॥षष्ठेदिनेतथामासेऽ
यनेवापिबालकं॥पूतनाशकुनिर्नामगृह्णीयात्तदनंतरं॥ज्वरच्छर्दिर्जनेमात्रेशोषःश्वासोरु राम
चिस्तथा॥कासश्चहस्तपादाक्षिसंकोचश्चेतिलक्षणं॥तंदुलप्रस्थपिष्टेनविनिर्मायाथपुत्रिकां॥ ११२
कृष्णोदनंध्वजाःपंचकृष्णस्वस्तिकपंचकं॥कृष्णमेवाथमत्स्याश्चपायसंदुग्धमेवच॥मांसंचा

पूपकास्त्वर्द्धप्रस्थपिष्टविनिर्मिताः॥अपराह्णेपश्चिमायांनिक्षिपेद्बलिपुत्रिकां॥पुत्रिकांपूर्ववत्कृ
त्वापललंशूलपाचितं॥मत्स्याःपर्पटिकाश्चैवरक्तंप्रस्थसंमितं॥तदासंध्यापूर्वसंध्यायांबलिर्देयःप्र
शांतये॥अत्रबलिदानयोर्विकल्पः॥तयोरेवकालयोर्बालकस्यधूपोदेयः गोशृंगलशुनमित्या
दिकः॥तथाशांतिस्नानब्राह्मणभोजनंच॥बलिदानपूजायांमंत्रस्तुहुंफट्स्वाहा॥ ॥सप्तमेदिव
सेमासेवर्षेवाशुष्करेवती॥गृह्णातिपूतनाबालंतत्स्यात्प्रथमंज्वरः॥गात्रभंगायेविदूषत्राहारे
कंपरोदनेउत्पेतछर्दनंतत्रबलिर्देयः॥प्रशांतये॥प्रस्थसंमितपिष्टेनसम्यक्कृत्वाथपुत्रिकां॥सप्त
ध्वजाःसप्तदीपाःस्वस्तिकाःसप्तवैतथा॥पुष्पाणिमत्स्यमांसंचरक्तंचैवसुदगादरेत्॥धूपस्तुगो
शृंगलशुनमित्यादिकः॥शांतिस्नानंब्राह्मणभोजनंच॥मंत्रस्तुहुंह्रीफट्स्वाहा॥ ॥अष्टमेदिवसे
मासेवर्षेचाक्रमतेशिशुं॥बिडालिकानामधेयापूतनास्यततोज्वरः॥गात्रभेदोत्ररुदितंरोदनेने

त्रमीलनं॥ जिह्वाशोषः शिरःस्फोटश्चाहारद्वेष एव च॥ अक्षिरोगी भवेदेतदिंगितं तद्ग्रहच्छिद्रोः॥ तंडु
लप्रस्थपिष्टेन पुत्तलीं कारयेत्ततः॥ पायसं मधुसर्पिर्भ्यां क्षीरं पूपाश्च शष्कुलीः॥ गुग्गुलं मेषमांसं च
तथा पर्पटिका अपि॥ ध्वजा दीपाश्च चत्वारो गंधाना नाविधा अपि॥ सुमनांसि च रक्तानीत्येवं मं
त्रौदनो बलिः॥ अमुं समादरेत्पूर्वसंध्यायां दक्षिणादिशि॥ हस्ताष्टम्यां वक्ष्यमाणमंत्रेणानेन
संयतः॥ ॐ नमो नारायणाय त्रैलोक्यविद्रावणाय हुं रूं फट् स्वाहा॥ अनेनैव च मंत्रेण पूजादिब
लिहरणांतं कर्म कुर्यात्॥ धूपस्तु गोशृंगलशुनमित्यादि॥ शांतिस्नानं ब्राह्मणभोजनं च॥ अह
स्ताष्टम्यां बलिहरणमिति न नियमार्थं॥ किंतु सति संभवे प्राशस्त्यार्थं॥ अन्यथा तत्प्रतीक्षायां शि राम
शुनाशापत्तेः॥ ॥ नवमे दिवसे मासे हायने वा पि बालकं॥ गृह्णाति मदनानाम्नी पूतना तदनंतरं॥ ११३
ज्वरश्छर्दिर्घृणाध्मानं कासश्वासश्च रक्तता॥ गात्रभंगश्च शूलं च चिह्नान्येतानि बालके॥ प्रस्थ

मात्रेण पिष्टेन विनिर्माय च पुत्रिकां॥ ओदनं मत्स्यमांसं च पर्पटी च शष्कुलिकां॥ निक्षिपेत्सर्वसंध्यायां तु
त्तरस्यां बलिं दिशि॥ अत्र मंत्रः॥ ॐ नमो भगवते वासुदेवाय दह स्वमंडले बलिमादाय दहनं हुं फट् स्वाहा॥
धूपस्तु गोशृंगलशुनमित्यादिकः॥ शांतिस्नानं ब्राह्मणभोजनं च॥ ॥ दशमे दिवसे मासे हायने वा
पि बालकं॥ पूतना रेवती नाम्नी गृह्णात्याशु बालकं ततः॥ ज्वरश्छर्दिः कासश्वासौ शूलं चेत्येतदीरितं॥ अ
न्नद्वेषश्च तत्रायं बलिर्देयो विचक्षणैः॥ प्रस्थप्रमाणपिष्टेन पुत्रिकां तत्र कारयेत्॥ अष्टांगुले खये तत्र
बिल्ववृक्षस्य कंटकैः॥ गुडोदनं च सर्पिश्च ध्वजानां पंचविंशतिः॥ स्वस्तिकानां प्रदीपानां पंचविंशति
रेव च॥ चत्वारि रक्तपुष्पाणि हरेत्तद्दक्षिणादिगतः॥ संध्यात्रये वक्ष्यमाणमंत्रेणानेन निक्षिपेत्॥
ॐ नमो भगवते वासुदेवाय दहनं हुं फट् स्वाहा॥ धूपो गोशृंगलशुनमित्यादिकः॥ शांतिस्नानं ब्रा
ह्मणभोजनं च॥ ॥ एकादशे दिवसे मासे हायने पूतनार्चिका॥ गृह्णाति बालकं पश्चाज्ज्वरस्तत्र प्रजा

यते॥ अन्तर्दिशो मुखे शोषो गात्रभंगश्च रोदनं॥ ऊर्ध्वदृष्टिरपीत्येतच्चिह्नं तद्ग्रहे शिशोः॥ पुत्रि
का माषपिष्टेन रचिता शुक्लमोदनं॥ पुष्पाण्यपि च शुक्लानि ध्वजानां पंचविंशतिः॥ स्वस्तिकाश्च
प्रदीपानां पंचविंशतिरेव च॥ एतत्सर्वं यमाशायां संध्यायां प्रातराहरेत्॥ अत्र मंत्रः॥ ॐ नमो भ
गवते नारायणाय च॥ इह सर्वज्वररूपाय ज्वलद्दुष्टग्रहाय तु फट्स्वाहा॥ धूपस्तु गोशृंगलशुन
मित्यादिकः॥ शांतिस्नानं ब्राह्मणभोजनं च॥ ॥द्वादशो दिवसे मासे वर्षे वा पूतना शिशुं॥ अत्युत्तु
नाख्या प्रगृह्णाति ज्वरः स्यात्प्रथमं ततः॥ रोदनं सर्वदा दंतखादनं रक्तनेत्रता॥ रोमांचश्चापि भव
त्येतदखिलं तस्य लक्षणं॥ तंडुलप्रस्थपिष्टेन कृत्वा तत्राथ पुत्रिकां॥ त्रयोदश स्वस्तिकाश्च ध्व
जा दीपास्तथैव च॥ अपूपाश्च समांसं च तथा कपर्दिका अपि॥ एतत्सर्वं दक्षिणस्यां दिशि मंत्रेण
निक्षिपेत्॥ मंत्रस्तु ॐ नमो नारायणाय प्रज्वलद्धस्ताय दह २ शोषय २ मर्दय २ पातय २ हन २

MEMORIAL

दुष्टसत्वानां फट्स्वाहा॥ गोशृंगमित्यादिको धूपः॥ शांतिस्नानं ब्राह्मणभोजनं॥ ॥इति देवीग्रहदीनबा
लकरक्षणं॥ ॥अथ बोधायनोक्ता ज्वराद्युत्पत्तौ शांतयः॥ ॥प्रतिपदि कष्टसंदेहो वा दिनान्यष्टादश॥
अग्निर्देवता अग्निरस्मीति पूजामंत्रः॥ हैमी प्रतिष्ठा घृतधूपो घृतदीपश्च॥ यथासंभवं नैवेद्यं घृतं
होमद्रव्यं॥ शांतिर्भवति॥ अत्र सर्वत्र प्रथमं तत्तद्देवतामंत्रजपः॥ सहस्रादिकः॥ पश्चात्पूजा होमदा
नादि होमसंख्या चाष्टोत्तरशतादि॥ व्याधितारतम्येन कल्प्या॥ सहस्रं मृत्युनिर्देशे॥ ॥द्वितीयायां
दिनानि षोडश ब्रह्मा देवता॥ ब्रह्मजज्ञानमिति जपपूजाहोममंत्रः॥ अगरूधूपः॥ सर्वत्र शर्करा
नैवेद्यं॥ तिलयवाज्यानि होमद्रव्यं प्रतिमा च हैमी॥ ॥तृतीयायां दिनानि नव पार्वती देवता गौरी
र्मिमायेति मंत्रः॥ दूर्वा त्रिपूजा॥ कुंकुमं॥ धूपः गुग्गुलु वा धूपो घृतदीपः॥ शाल्योदनं राज्यं नैवेद्यं॥
पायसं त्रिमधरां च दूर्वाश्च होमद्रव्यं प्रतिमा हैमी॥ ॥चतुर्थ्यां दिनानि षोडश गणपतिर्देव

नागणानां चेति पूजा होममंत्रः॥ हैमी प्रतिमा कुंकुमेन रक्तं चंदनं गंधः करवीरादीनि पुष्पाणि॥
अगरुधूपो लडुका ईक्षुखंडानि नैवेद्यं नारिकेलशकलानि इक्षुशकलानि कदलीकपाला
नि च होमद्रव्यं॥ पंचम्यां दिनान्येकविंशतिर्नागा देवता॥ हैमी प्रतिमा नमोस्तु सर्पेभ्य इति मं
त्रः॥ चंदनं गंधः सुरभिपुष्पाणि घृतधूपः पयो नैवेद्यं तिलयवाज्यपायसशर्करामधूनि
यथायोग्यं होमद्रव्यं॥ ॥षष्ठ्यां दिनानि द्वादश स्कंदो देवता इषुश्च स्कंदेति पूजामंत्रः पी
तं चंदनं रक्तं गंधः रक्तानि पुष्पाणि॥ जातिपुष्पाणि वा॥ जटामांसी धूपः लडुकादि नैवे
द्यं॥ फलानि वा तिलयवाः होमद्रव्यं हैमी प्रतिमा॥ ॥शांतिर्भवति॥ ॥सप्तम्यां दिनान्यष्टौ दिन
नाथो देवता॥ आसत्येन आकृष्णेनेति वा मंत्रः॥ हैमी ताम्रजा वा प्रतिमा॥ कुंकुमं गंधः करवी
रादीनि पुष्पाणि॥ गुग्गुलुर्धूपः शर्करा घृतसंयुतं पायसं नाफलानि च नैवेद्यं अर्कसमिधः पा

यसं होमद्रव्यं॥ ॥अष्टम्यां दिनानि त्रयोदश ईश्वरो देवता तमीशानमिति पूजादिमंत्रः॥ राजती प्रति
मा कर्पूरमिश्रितं चंदनं गंधः बिल्वदलानि अर्कपुष्पाणि नीलोत्पलानि पुष्पाणि॥ जटामांसी धूपः॥
पायसं नानाभक्ष्याश्च नैवेद्यं त्रिमधुराक्ततिला होमद्रव्यं रोगशांतिर्भवति॥ नवम्यां दिनान्यष्टा
दश भगवती दुर्गा देवता॥ जातवेदस इति पूजामंत्रः हैमी प्रतिमा रक्तचंदनं गंधः कुंकुमादिकं वा॥
जपाकुसुमादिकं पुष्पं गुग्गुलुर्धूपः घृतपक्वं नैवेद्यं त्रिमधुराक्तं पायसं होमद्रव्यं देव्यै दधिभक्त
पात्रदानं तत्र कार्यं वा॥ ॥दशम्यां दिनानि पंचविंशतिः यमो देवता हैमी लोही वा प्रतिमा यमाय त्वे
ति पूजामंत्रः॥ चंदनं मृगमदश्च गंधः मधुसर्जरसश्च धूपः तिलतैलदीपः बिल्वपत्राणि कृष्णतिला
श्च पूजाद्रव्यं कृशरान्नं वं नैवेद्यं घृतमधुतिलाज्यं होमद्रव्यं॥ ॥एकादश्यां दिनानि सप्त विश्वेदेवा
देवता विश्वेदेवास इति मंत्रः॥ हैमी प्रतिमा श्वेतचंदनं गंधः कृष्णागरु धूमो घृतदीपः तुलसीपत्रा

णिपूजायांपंचमोदकंनैवेद्यंतिलयवमध्वाज्यंहोमद्रव्यं॥ ॥द्वादश्यांदिनानिदशारुद्रोदेवता
यातेरुद्रेतिमंत्रः॥हैमीप्रतिमाचंदनंश्रीखंडं॥अगरुधूपोघृतदीपःपायसंनैवेद्यंचंपकंपुष्पं
कमलंवापूजायांतिलयवाज्यव्रीहिमधुनिहोमद्रव्यंशांतिर्भवति॥ ॥त्रयोदश्यांदिनान्यष्टौत्र
योदेवतारौक्मीराजतीवामूर्त्तिःआप्यायस्वेतिमंत्रः॥पूजादौ॥श्वेतचंदनगंधःचंदनधूपघृ
तदीपःदधिशर्करानैवेद्यंतिलयवास्त्रिमधुकाहोमद्रव्यंशांतिर्भवति॥ ॥चतुर्दश्यांदिना
निद्वाविंशतिःशंभुर्देवतानमःशंभवायेतिमंत्रःरौक्मीराजतीवामूर्त्तिःश्वेतचंदनगंधःअर्क
पुष्पंबिल्वदलानिवाअगरुधूपःपायसंनैवेद्यं॥त्रिमधुकास्तिलाहोमद्रव्यं॥ ॥अमायांदि राम
नान्यष्टादशशचीदेवताहोतायज्ञादितिमंत्रः॥हैमीप्रतिमा॥कुंकुमादिगंधः॥नानासुगंधिपु ११६
ष्पाणिकृष्णागुरुधूपः॥फेणिकाघृतपूरिकादिनैवेद्यंशर्कराघृतपायसंहोमद्रव्यंपूर्णिमायांदिना

निषोडशचंद्रोदेवतामदनकंपूजार्थमन्यत्सर्वंत्रयोदशीशांतावुक्तंयाद्यं॥ ॥इतितिथिदोषशां
तिः॥ ॥अथाश्वालायनोक्तवारशांतिः॥ ॥आदित्यवारस्यरुद्रोदेवतायातेरुद्रेतिमंत्रः॥हैमारा
जतीवामूर्त्तिःचंदनगंधअगरुधूपःघृतदीपःपायसंनैवेद्यंहोमद्रव्यंच॥सोमवारस्यपार्वतीदे
वतागौरीर्मिमायेतिमंत्रः॥हैमीराजतीवामूर्त्तिःकुंकुमगंधःसुगंधिपुष्पं॥अगरुधूपःघृतदी
पःनानान्नरूपाणिनैवेद्यं॥तिलयवाहोमः॥द्व्यंदंपत्नीसंतर्पणंच॥भौमस्यस्कंदोदेवतास्य
सर्वंषष्ठीशांतिवत्॥बुधवारस्यविष्णुर्देवता॥विष्णोरराटमसीतिमंत्रः॥हैमंस्वरूपंपीतं॥चंद
नंपीतपुष्पाणिकमलानिचअगरुधूपःघृतदीपःयवलड्डुकानैवेद्यंतिलयवाज्यहोमः॥गुरु
वारस्यब्रह्मादेवताब्रह्मजज्ञानमितिमंत्रः॥हैमीप्रतिमा॥कुंकुमगंधःपर्णपुष्पंगुग्गुलुधूपः॥
शर्कराज्यंनैवेद्यं॥तिलयवधानाघृतहोमद्रव्यं॥शुक्रवारस्यइंद्रोदेवतात्रातारमिंद्रमितिमंत्र

हैमीमूर्त्तिश्चंदनगंधः॥ चंपकंपुष्पं॥ अगरुधूपं॥ घृतपक्वं नैवेद्यं॥ तिलयवाज्यमधुभिर्होमद्र
व्यं॥ शनिवासरस्य यमोदेवतायमेनदद्यमिति मंत्रः॥ हैमी सौद्वा वामूर्त्तिः ताम्रजेति केचित्॥ चं
दनगंधः॥ पुष्पं कृष्णमथ धूपः तिलतैलदीपः मधुमन्नं माषान्नैवेद्यं॥ तिलाम्लचरुहोमद्रव्यं॥
॥इति वारशांतिः॥ ॥अथ नक्षत्रशांतयः॥ ॥वृद्धवसिष्ठः॥ रोगशांतिं प्रवक्ष्यामि रोगार्त्तानां नरनारि
णां॥ बलिपूजां गृहोमैश्च जपब्राह्मणभोजनैः॥ यस्मिन्धिष्ण्ये यदा नृणां रोगः संजायते तदा॥ त
द्धिष्ण्य पूजा कर्त्तव्या तन्नदीश्वरतुष्टये॥ सुवर्णेन तदर्द्धेन तदर्द्धार्द्धेन वा पुनः धिष्ण्येशप्रतिमा
कल्प्या यथा वित्तानुसारतः॥ ईशान्यामथवा प्राच्यामुदीच्यां दिशि संलिखेत्॥ तंडुलोपर्यष्ट
दलं पद्मं गोमयमंडले॥ पंचामृतैः सलेपैश्च तत्तन्मंत्रैः पृथक्पृथक्॥ स्नाप्य कल्पोक्तमंत्रेण प्र
तिमां स्थापयेत्पुनः॥ कर्णिकायां तु संस्थाप्य ध्यात्वा देवं समर्चयेत्॥ तद्वर्णवस्त्रगंधाद्यैरुक्त

गंधोपहारकैः॥ आरक्तवर्णं कुंभं च पंचपल्लवपद्मवैर्युतं॥ शुक्लवस्त्रस्वर्णरत्नसर्वौषधिसमन्वितं॥
मत्स्यं च गव्यसद्बीजफलक्षौद्रकुशान्वितं॥ देवस्य पूर्वतः स्थाप्य जलमंत्रैः समर्चयेत्॥ प्रतीच्यां स्थंडि
लेवह्निं विधिवत्स्थापयेत्ततः॥ मुखांते जुहुयाद्रक्तद्रव्येणाष्टसहस्रकं॥ तिलहोमव्याहृतिभिरष्टोत्त
रसहस्रकं॥ पूर्णाहुतिं च जुहुयात्सम्यक्जपादिपूर्वकं॥ ततः सुखोपविष्टस्य रोगिणः प्राङ्मुखस्य च॥
मंत्रपूतैः कुंभजलैरब्लिंगैर्वारिमंत्रकैः॥ मार्जनं कारयेत्तस्य सम्यक्संकल्पपूर्वकं॥ नीराजनं च शु
द्धात्मा पूजास्थानं समागतः॥ देवं हुताशनं चैव ब्राह्मणांश्च प्रार्थयेदिति॥ अमृतोद्भवधिष्ण्येश यतस्त्वं
शंकरात्मकः॥ रोगादस्वस्थतां रक्ष तेन वन्नृपाश्च धिष्ण्यप॥ इति प्रार्थ्य ततो दद्यात्प्रतिमां वस्त्रसंयुतां॥
दक्षिणासहितां तत्र तथा आचार्यपुंकुटुंबिने॥ ब्राह्मणाय यथाशक्त्या ब्राह्मणान्भोजयेत्ततः॥ वे
त्वा नक्षत्रपूजां तिथिवासरयोरपि॥ सर्वान्कामानवाप्नोति नरो रोगात्प्रमुच्यते॥ ॥अश्विन्या

मुच्छितोव्याधिर्नवरात्रेणमुंचति॥देवस्यत्वेतिमंत्रेणगायत्रीकश्यपोऋषिः॥श्वेतवर्णोस्तुधा
स्वर्णकुंभांभोजधरोप्यथ॥चंदनोत्पलपुष्पाज्यगुग्गुलोगुरुप्रियो॥क्षीरलड्डुकान्नोकारीस
मिथःक्षीरवृक्षजाः॥गुडोदनबलिंदद्याद्दीपैःसार्द्धनिशामुखे॥ ॥चरणामुस्थितोव्याधिरचि
रान्निधनप्रदः॥मासेनमुंचत्यथवा॥देवस्यकुटिलागतिः॥त्र्यंबकस्यमंत्रस्यप्रोक्ताःछंदर्षि
देवताः॥गंधोगरुकर्वीरंपुष्पंधूपेश्चगुग्गुलुः॥अष्टदीपंचसर्वेषांनैवेद्यंचगुडोदनं॥पात्रार्द्धे
उभयोरन्नंस्वाज्यमध्वक्तंतर्दधि॥महिषीनायकारूढःकृशरान्नंबलिंहरेत्॥वक्ष्यमाणेनमं राम
त्रेणबलिंसम्यक्प्रदापयेत्॥ ॥कृत्तिकास्वस्थितोव्याधिदशरात्रेणमुंचति॥स्रुक्स्रुवाभय ११८
वरदःसुवर्णमेषवाहनः॥मेधातिथिर्जगत्यग्नीपुनंतुमामित्यस्यच॥चंदनंयूथिकापुष्पंघृत
दीपःसगुग्गुलुः॥नैवेद्यंतिलमाषान्नंवरकान्नेनसंयुतं॥गुडोदनरविस्तत्रपायसेनबलिंह

रेत्॥ ॥रोहिण्यामुत्थितोव्याधिदशरात्रेणमुंचति॥नमोब्रह्मणमंत्रस्यगायत्रीविधिरीश्वरः॥
शुक्लःकमंडलुस्त्वक्षस्त्राभयवरप्रदः॥चंदनंकमलंपुष्पंसदशांगंचगुग्गुलुं॥नैवेद्यंपायसांसाज्यं
सर्वदातैर्दधिमिश्रितं॥दधिक्षीरघृतक्षौद्रधान्यान्नेनबलिंहरेत्॥चंद्रभेचोत्थितोव्याधिपंचरात्रेण
मुंचति॥गदावरदपाणिश्चश्वेतोरथवाहन॥नवोनवोभवसस्यागायत्रीगोतमःऋषिः॥चंदनंकुमु
दपुष्पंदशांगपायसोदनं॥नैवेद्यंमंडकाधूपघृतक्षौद्रसमन्वितं॥शर्करादधिमिश्रेणशुक्लान्नेन
बलिंहरेत्॥ ॥आर्द्रायामुत्थितोव्याधिरचिरान्निधनप्रदः॥मासेनमुंचत्यथवा॥दैवस्यकुटिला
गतिः॥शुद्धस्फटिकसंकाशःशूलखड्गाभयप्रदः॥नमःशंकरायेत्यस्यवृहस्पतीऋषिविधीरुद्रः॥
चंदनंसौरभंपुष्पंदशांगंपायसौदनं॥समधाज्यंदधिस्तत्रदध्योदनबलिंहरेत्॥ ॥पुनर्वसौस्थि
तेव्याधिर्नवरात्रेणमुंचति॥कमंडलुरक्षसूत्रेभयोदर्जस्रुकस्रुवधरःसदा॥अदितिर्द्यौरितिमंत्रस्य

त्रिष्टुब्नोबुद्धिरणेदितिः॥हरिद्राकुंकुमंगधंपुष्पंसेवंतिकाह्वयं॥धूपोमलयजंपिष्टंघृतान्नंपीत
वर्णेन॥घृताक्तंतंडुलहविःपीतान्नेनबलिंहरेत्॥ ॥पुष्येसमुत्थितोव्याधिःसप्तरात्रेणमुंच
ति॥पीतोदंडकमंडल्वक्षसूत्राभयवरोद्यतः॥वृहस्पतेपरीत्यस्यत्रिष्टुप्जीवोगिराऋषिः॥कुं
कुमंवारिजंपुष्पंनैवेद्यंघृतपायसं॥मंडकाघृतसंयुक्तमेतद्देवहविर्भवेत्॥सउकघृता
न्नेनबलिंतत्रप्रदापयेत्॥ ॥आश्लेषासुत्थितोव्याधिःक्लेशः॥न्मासेनमुंचति॥नमोस्त्वितिचमंत्र
स्यविराडग्निश्चसर्पराट्॥मध्रुवर्णोनागयुक्तोरक्तचर्मधरःस्मृतः॥सकुंकुमागरुर्गंधःपुष्पंनाग
स्तिसंभवं॥घृतगुग्गुलधूपश्चनैवेद्यंक्षीरसर्पिषा॥हविःसाज्यंसुदध्यन्नंदध्योदनबलिंहरेत्
॥मघायांचोत्थितोव्याधिरचिरान्निधनप्रदः॥अथवाअर्धमासेनपञ्चोदंडपवित्रधृक्॥
आयंतुनस्त्वितिचास्यस्यजगतीपितरोब्रजः॥चंदनंचंपकंपुष्पंधूपःसघृतगुग्गुलुः॥नैवेद्यं

घृतपिष्टान्नंतिलाज्यंसघृतंहविः॥सतिलान्नंचमुद्गान्नंबालिंचपितृतृप्तये॥ ॥पूर्वाफाल्गुनेव्य
व्याधिरर्द्धमासेनमुंचति॥भगएवभगवानित्यस्यानुष्टुप्भगोविधिः॥पद्माभयःकरःपद्मवर्णःसिंहा
सनेस्थितः॥चंदनंमालतीपुष्पंबिल्वदीपोघृतोदनं॥नैवेद्यंशार्करापूपलड्डुकामिश्रसंयुतं॥घृतोद
नंहविस्तत्रपायसेनबलिंहरेत्॥ ॥अर्यमर्क्षेभवेद्याधिरर्धमासेनमुंचति॥पद्मवर्णःपद्मसंस्थः
पद्मगर्भसमद्युतिः॥अर्यमायेतिमंत्रस्यअर्यमाष्टुप्अबुजः॥कर्पूरंकुंकुमंगंधंपुष्पंधूपकसंज्ञकं॥
घृतगुग्गुलुधूपोत्रनैवेद्यंघृतपायसं॥होमद्रव्यंघृतान्नस्याज्यान्नेनबलिंहरेत्॥ ॥हस्तेसमुत्थि
तोव्याधिर्नवरात्रेणमुंचति॥हस्तस्तिविद्युत्पस्तयोगायत्र्यदितिर्जपेत्॥रक्तगंधंकुंकुमंचपु
ष्पंराजीवसंज्ञकं॥सगंधगुग्गुलुधूपोनैवेद्यंघृतपायसं॥मधुपुष्पंतिलाज्यान्नंदूर्वाभिःसहितं
हविः॥गुडशार्करमध्वाज्यमिश्रान्नेनबलिंहरेत्॥ ॥चित्रायामुत्थितोव्याधिर्दशरात्रेणमुंचति॥

DR. BHAU DAJI MEMORIAL
राम ११९

चित्रंदेवानामीत्यस्यत्वष्टानुष्टुप्पितामहः॥ अर्हस्त्वाश्रयकरश्चित्रवर्णाश्रिवेरतः॥ सकुंकुमागरु
गंधः कुंकुमंचित्रवर्णकं॥ नैवेद्यंमोदकान्नाज्यंचित्रान्नंसघृतंहविः॥ तदन्तेनबलिंदद्यात्सर्वरोगा
पनुत्तये॥ ॥स्वात्यर्द्धेचोत्थितोव्याधिः सर्वदानिधनप्रदः॥ एकद्वित्रिचतुःपंचमासेर्वापिविमुंच
ति॥ सनःपितेतिमंत्रस्यगायत्रीमरुदंगिराः॥ खड्गचर्मधरः कृष्णोगंधः कृष्णागरूत्तमं॥ पुष्पंदमनकं
धूपंचंदनागरुगुग्गुलुः॥ नैवेद्यपायसंसाज्यंहविस्तेनबलिंहरेत्॥ द्विदैवत्येत्रवेद्याधिर्मासेनैवे
नमुंचति॥ इंद्राग्नीआगतमितिगायत्रीवास्यचैवहि॥ मधुच्छंदाऋषीइंद्राग्नीतयोर्ध्यानंचपूर्ववत्॥
श्रीखंडंकुंकुमंगंधंतयोःपुष्पंसरोरुहं॥ देवदारुस्तयोर्धूपोनैवेद्यंघृतपायसं॥ तदेवान्नंहविस्तत्रचि
त्रान्नेनबलिंहरेत्॥ ॥मित्रर्क्षेचोत्थितोव्याधिर्दशरात्रेणमुंचति॥ मित्रस्यचर्षणीरितिगायत्री
चास्यचैवहि॥ ऋषिर्हिरण्यस्तूपाख्यस्तत्रमित्रोधिदेवता॥ द्विभुजः पद्मगर्भाभः पद्महस्तप्रसन्न

तः॥ कुंकुमंपुंडरीकाख्यंपुष्पंधूपंचचंदनं॥ नैवेद्यंपायसंसाज्यंहविःकंदंबसंभवं॥ बलिस्तत्रप्रदा
तव्योमधुशर्करपायसं॥ सतपूरकमाषान्नंमुद्गगव्यैश्चसंयुतं॥ ॥ज्येष्ठायांमुत्थितोव्याधिस्त्वु
रेवनसंन्नायः॥ इंद्रवइतिमंत्रस्यगायत्रीअंगिराऋषिः॥ इंद्रायपूर्ववद्गंधः चंदनंकुंकुमंशुभं॥ क
र्पूरधूपोनैवेद्यंचित्रान्नंसुमनोहरं॥ हविस्तुस्वर्णंकुंदंमधुकंदंसुपायसं॥ विचित्रपुष्पगंधेन
दध्यन्नेनबलिंहरेत्॥ ॥मूलेचोत्थितोव्याधिर्मासार्द्धेनविमुंचति॥ खड्गचर्मधरः कृष्णःकराल
वदनःशुभः॥ मोषुणोस्यचगायत्रीघोरःकण्वोथनिरृतिः॥ गंधःकृष्णोगरुःपुष्पंपद्मनीलोत्पलं
शुभं॥ धूपःकृष्णागरुर्माषमिश्रमुपहारकं॥ तत्रदेवान्नंहविस्तत्रमाषान्नेनबलिंहरेत्॥ ॥वारि
णेचोत्थितोव्याधिरोगिणोनिधनप्रदः॥ विमुंचत्यथवामासेद्वित्रिषट्नवसप्तभिः॥ आप्यायस्वे
तिमंत्रस्यगायत्रीपद्मजोज्जलं॥ सुवर्णोद्विभुजःपद्मपाणिर्गंधस्तुचंदनं॥ पद्मेन्द्रोलेयधूपोत्रनै

वेद्यं घृतपायसं॥ हविर्मसूरपिष्टान्नं तदन्नेन बलिं हरेत्॥ ॥विश्वेन्ने चोत्थितो व्याधिः सार्द्धमासेन
मुंचति॥ विश्वे देवास इत्यस्य गायत्री विश्वदेवता॥ कमंडलुत्रयं भोजवरद स्वकुशासनः॥ चंदनं
कमलं पुष्पं धूपं सघृतगुग्गुलुः॥ नैवेद्यं पायसाज्यान्नं हविरप्येतदेव हि॥ समिद्भिर्तिचुलैः सार्द्धं तद
न्नेन बलिं हरेत्॥ ॥श्रवणे चोत्थितो व्याधिर्दशरात्रेण मुंचति॥ अतो देवेति मंत्रस्य गायत्री पद्मो
द्भिरिः॥ पीतांबरः कृष्णवर्णः शंखचक्रगदांबुजः॥ चंदनं मालती पुष्पं धूपकर्पूरगुग्गुलुः॥ शाल्यन्नं
षड्रसोपेतं नक्षत्रे ज्यादिभिः सह॥ नैवेद्यं दधि रम्येतत्॥ पायसेन बलिं हरेत्॥ ॥वासुन्ने चोत्थितो
व्याधिर्द्वादशरात्रेण मुंचति॥ त्रायंतामिह मंत्रस्यानुष्टुप् व्यासो वसुस्ततः॥ चापबाणधरस्त्॥ ॥वारुणे राम
चोत्थितो व्याधिरष्टरात्रेण मुंचति॥ इमं मे वरुणेत्यस्य गायत्री काण्ववारिपः॥ नागपाशधरः श्रीमान् २२९
वररत्नविभूषितः॥ मकरस्थो गरुर्गंधः पुष्पं च कमलोत्पलं॥ कर्पूरं चंदनं धूपो नैवेद्यं घृतपोलि

कां॥ हविरश्वत्थसमिधश्चित्रान्नेन बलिं हरेत्॥ ॥अजपादेन्ने व्याधिः सर्वदा निधनप्रदः॥ अथवा
बहुभिर्मासैर्दिवसैर्वा विमुंचति॥ वामपादकरं न्यस्या आकाशोत्थपरं द्वयं॥ प्रसार्य प्रांजलिः साक्षाद
श्वरंचितयोत्थितः॥ शामग्निरित्यस्याजपाद् गायत्री चतुराननः॥ कुंकुमं चंदनं गंधः पुष्पं श्वेतार्कसंज्ञ
कं॥ धूपः शतौषधीमिश्रो नैवेद्यं दधिपायसं॥ हविः कूष्मांडखंडस्या द्ध्यन्नेन बलिं हरेत्॥ ॥अहिर्बु
ध्न्ये व्याधिः सार्द्धमासेन मुंचति॥ नमस्ते रुद्र इत्यस्य सर्वतत्रैव संस्थितः॥ गंधश्चंदनकर्पूरा पुष्पं प
द्मोत्पलं शुभं॥ सबिल्वं गुग्गुलुर्धूपो नैवेद्यं घृतपायसं॥ मुंमायतिना न्नाज्ययवब्रीहिमयं हविः॥ पूषा
च देवतो भोजवर्णो भोजधरः शुभः॥ रक्तचंदनरा धेनुपुष्पं मांदारसंज्ञकं॥ धूपस्तु गुग्गुलुः साज्यो
नैवेद्यं घृतपायसं॥ हविस्तदेवसजलं दध्यन्नेन बलिं हरेत्॥ ॥रेवत्यामनुगतो यस्मा रोगनाशमहा
ज्वरः॥ रोगादस्माद्ध्मोत्राहि रुद्री त्वा चोत्तमं बलिं॥ ॥जन्मसंबंधिषु नक्षत्रराशिलग्नेषु यमघंटे प्रत्ये

द्विर्निधनतारकेऽष्टमचंद्रे च रोगोत्पत्तौ मृत्युः रविमघादशमीनां सोमविशाखैकादशीनां भौमार्द्रापं-
चमीनां बुधोत्तराषाढातृतीयानां गुरुशततारषष्ठीनां शुक्राश्विन्यष्टमीनां शनिपूर्वाषाढानवमी-
नां च योगे मृत्युः॥ भरण्यनुराधा वा चेद्रवौ॥ आर्द्रोत्तराषाढा वा सोमे॥ मघा शततारा वा भौमे॥ अश्विनी
विशाखा वा बुधे॥ ज्येष्ठा मृगशिरो वा गुरौ॥ श्रवण आश्लेषा वा भृगौ॥ पूर्वाभाद्रपदा हस्तो वा शनौ चेन्मृत्यु-
योगाः॥ अतोत्रोक्तास्तिथिवारर्क्षेषु शांतयो निस्सृताः कार्याः॥ ॥ अथ तिथिवारर्क्षेषु साधारणः प्रयोगः
॥ ॥मासपक्षाद्युल्लिख्य ममोत्पन्नस्य व्याधेर्जीवच्छरीराविरोधेन समूलनाशार्थममुकनक्षत्रामुकदे-
वतामंत्रस्य जपं करिष्य इति संकल्प्याष्टशताष्टसहस्रायुतान्यतमसंख्यया वक्ष्यमाणां तत्तद्देवतामं- राम
त्रस्य जपं कृत्वा अन्येन कारयित्वा वा मासपक्षाद्युल्लिख्य ममोत्पन्नव्याधेर्जीवच्छरीराविरोधेन समूलनि- १२२
वृत्तये अमुकशांतिं करिष्य इति संकल्प्य गणेशपूजनाचार्यवरणं तं कृत्वा आचार्यं जपेत्॥ तत्र आचार्यो भू-

मौ तंडुलैश्चतुरस्रं मंडलं कृत्वा तत्र हैमीं तत्तन्नक्षत्रदेवतां वस्त्रद्वयपरिवृतां वक्ष्यमाणतन्मंत्रैर्गंधधूपादिभिः
पूजयेत्॥ नदीशान्ये धान्ये कुंभं संस्थाप्य जलेनापूर्य गंधसर्वौषधिदूर्वापल्लवपंचत्वक्सप्तमृत्पुष्प-
पंचरत्नपंचगव्यहिरण्यानि तत्तन्मंत्रैः क्षिप्त्वा वस्त्रद्वयेनावेष्ट्य सर्वे समुद्रा इति तत्र तीर्थान्यावा-
ह्य तत्त्वायामीति तत्र वरुणमावाह्य संपूज्याग्नेयदिश्यग्निप्रतिष्ठाप्याज्यभागांते तत्तन्नक्षत्रदेवतामं-
त्रेण तद्द्रव्येणाष्टोत्तरसहस्रशताष्टाविंशत्यन्यतमसंख्यया वा होमं कृत्वा शांतिकलशोदकेन यज-
मानाभिषेके विहिते तां प्रतिमां रोगी ब्राह्मणाय दद्यात्॥ उक्तगंधाभावे चंदनं पुष्पाभावे शतपत्रं
धूपाभावे गुग्गुलुः॥ नैवेद्याभावे घृतौदनं होमद्रव्याभावे तिलाः॥ मंत्राविज्ञाने गायत्री अष्टोत्तरसह-
स्रमत्युर्निर्दिष्टं अष्टोत्तरशतमन्यद्वा जुहुयात्॥ ततः कुशोदकैर्वरुणसूक्तैः पुराणमंत्रैश्चाभिषेकं कु-
र्यात्॥ पूर्णाहुतिं वसोर्धारां च कृत्वा शांतिपाठं कृत्वा आशिषं दद्यात्॥ अतः सर्वशांतिर्भवतीति तत्रा

शां.म.
१२३

चार्याय सुवर्णप्रतिमां वस्त्रयुग्मेन वेष्टितां सवत्सां गां सालंकारां दद्यात्॥ [redacted]यद्दक्षिणां दद्यात्॥ रतरे.श्यो१
ब्राह्मणांश्च भोजयेत्॥ ॥इति रोगोत्पत्तिशांतिः॥ ॥प्रयोगः॥ ॥मदनरत्ने त्रिस्तु सर्वनक्षत्रशांतिषु
गायत्र्यायमुद्देशेन होमोत्तरशतसंख्यः॥ बलिश्च तत्तन्नक्षत्रदेवतायै॥ सोपि होमावशिष्टद्रव्येन
क्वचिदन्येन॥ तच्च तत्र तत्र वक्ष्यते॥ अत्र रोहिणी पुष्य आश्लेषा पूर्वा हस्त स्वाती विशाखानुराधाज्ये
ष्ठा मूलोत्तराषाढा पूर्वाभाद्रपदोत्तराभाद्रपदासु घृतमेव होमद्रव्यं॥ अनुराधासु बलिरपि तैनैव॥
न्यत्र तु होमे बलौ च विशेषस्तत्र तत्र वक्ष्यते॥ द्रव्ये तु विशेषो श्विन्यादिक्रमेण दुग्धाक्तं क्षीरवृक्ष
समिधो होमे दध्योदनं बलौ घृताक्तास्तिला घृतं दध्योदनं वा क्षीरान्नं बलौ ४ मधुमत्तिलाः ५ घृतम राम
पद्घृताक्ताक्षता होमे गंधमाल्योदनं बलौ ७ गंधमाल्योदनं च बलौ ८ मिष्टान्नं बलौ ९ घृता १२३
क्ताक्षततिला होमे अक्षततिला बलौ १० गंधपुष्पाणि बलौ १० तिलमाषाः १२ गंधपुष्पं च बलौ १३

तिलघृतं होमे॥ सघृता मुद्गा बलौ १४ गंधपुष्पाणि बलौ १५ दुग्धाक्तान्नं गंधमाल्यानि बलौ १६ १७ गं
धपुष्पं च माल्यं बलौ १८ पायसं बलि १९ शालयो होमे पायसं बलौ २० होमे पायसं बलौ २१ बीजाक्षतो
होमे गंधपुष्पाणि बलौ २२ अश्वत्थसमिधो होमे घृताक्तमुद्गा बलौ २३ तिलपुष्पाणि होमे पायसं बलौ
२४ गंधमाल्योदनं बलौ २५ गंधपुष्पाणि बलौ २५ घृताक्तमुद्गा बलौ २७ होमे गंधपुष्पाणि बलौ २७
अयं च नक्षत्रेषु ज्वराद्युत्पत्तौ विष्टानिष्टकालः॥ तत्राश्विन्यादिषु पंचविंशतिः २५ एकविंशतिः २१
विकल्पतो मासा षष्ठौ॥ सप्तविंशतिः २७ सप्त ७ अष्टौ ८ दश १० अष्टौ ८ अष्टाविंशतिः २८ एकविंशतिः
२१ विंशति २० विंशति २० विंशति २० पंचविंशति २१ विकल्पतः पक्षत्रयोदश दिन मासाः द्वादश १२ द
श १० दश १० अष्टाविंशतिः २८ दिनानि क्रमात्पीडा अंतसुखं॥ आश्लेषामघापूर्वापूर्वाभाद्रपदासु प
क्षे मृत्युरपि संभाव्यते॥ ॥अथ ग्रहणशांतिः॥ ॥मत्स्यपुराणे॥ ॥होरायां ग्रस्यते यस्य नक्षत्रे वा तिरो

करे॥ प्राणसंदेहमाप्नोतिसवामरणमृच्छति॥ होरायांजन्मलग्नेयस्यत्रिजन्मनक्षत्रेग्रस्येतेग्नात्रि
न्नास्करौतज्ञनानांन्नवेत्पीडायेजनाःस्नांतिवर्जिताः॥ यस्यराशिंसमासाद्यनवेग्रहणसंभवः॥
तस्यपीडाप्रवक्ष्यामिमंत्रौषधीसमन्वितः॥ चंद्रोपरागेसंप्राप्तेकृत्वाब्राह्मणवाचनं सपूज्यचतु
रोविप्रान्स्रुक्मालयानुलेपनैः॥ पूर्वमेवोपरागस्यसमानीयौषधादिकं॥ स्थापयेच्चतुरः कुंभानग्र
व्रतः सागरानिव॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥ राजद्वारप्रदेशाच्च॥ मृदमानीयनि
क्षिपेत्॥ पंचगव्यंपंचरत्नंपंचत्वक्पंचपल्लवं॥ रोचकंपद्मकंरवकुंकुमंरक्तचंदनं॥ शुद्धस्फटिक
तीर्थांबुसितसर्षपगुग्गुलं॥ मधूकंदेवदारुंचविष्णुक्रांतांवरी॥ बलांचसहदेवींचनिशाद्वित
यमेवच॥ एतत्सर्वंविनिक्षिप्यकुंभेष्वावाहयेत्सुरान्॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥ आ रामः १२४
यांतुयजमानस्यदुरितक्षयकारकाः॥ गंगेचयमुनेचैवेति योसौवज्रधरोदेवआदित्यानांप्रभु

MEMORIAL

र्मतः॥ सहस्रनयनश्चंद्रोग्रहपीडांव्यपोहतु॥ मुखयःसर्वदेवानांसप्तार्चिरमितद्युतिः॥ चंद्रोपराग
संभूतांग्रहपीडांव्यपोहतु॥ यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः॥ यमश्चंद्रोपरागोत्थांग्रह॥
रक्षोगणाधिपःसाक्षात्त्रिलोचनसमप्रभः॥ खड्गहस्तोनिलोद्दश्चग्रहदोषं॥ नागपाशधरोदे
वः सदामकरवाहनः॥ चंद्रोपरागकलुषंवरुणोमेव्यपोहतु॥ प्राणरूपोहिलोकानांसदाकृष्णमृ
गप्रियः॥ वायुश्चंद्रोपरागोत्थांग्रह॥ योसौनिधिपतिर्देवःखड्गशूलगदाधरः॥ चंद्रोपरागदुरितंध
नदोमेव्यपोहतु॥ योसौबिंदुधरोदेवःपिनाकीवृषवाहनः॥ चंद्रोपरागपापानिनिवारयतुशंकरः॥
त्रैलोक्येयानिभूतानिचराणिस्थावराणिच॥ ब्रह्मविष्ण्वर्करुद्राश्चदहंतुममपातकं॥ एवमावा
हयेत्कुंभान्मंत्रैरेभिश्चवारुणैः॥ एतानेवतथामंत्रान्स्वर्णपट्टेविलेखयेत्॥ ताम्रपट्टेथवाले
खनेनवस्त्रेतथैवच॥ मस्तकेयजमानस्यनिदध्युस्तेद्विजोत्तमाः॥ कलशानष्टसंयुक्तान्नानाना

रूपसमन्वितान्॥ गृहीत्वा स्थापयेत्कुंभं तत्र पीठोपरि स्थितं॥ सर्वांकैरेव मंत्रैश्च यजमानं द्विजोत्तमाः॥
अभिषेकं ततः कुर्युर्मंत्रैर्वरुणसूक्तकैः॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः॥ आचार्यं वर
येत्पश्चात्स्वर्णपट्टे निवेशयेत्॥ आचार्यदक्षिणां दद्याद्गोदानं च स्वशक्तितः॥ गंधमाल्यैर्धूपदी
पकैः पूजयेद्देवतुष्टये॥ होमं चैव प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा॥ निवृत्ते ग्रहणे सूर्यब्राह्मणे
भ्यो विशेषतः॥ दानं च शक्तितो दद्याद्यदीच्छेदात्मनो हितं॥ सूर्यग्रहे सूर्यनाम्ना युक्तान्मंत्रांश्च
मंत्रवित्॥ चंद्रपदस्थाने सूर्यपदमूहनीयमित्यर्थः॥ अनेन विधिना यस्तु ग्रहणे स्नानमाचरे
त्॥ न तस्य ग्रहणे दोषः कदाचिदपि जायते॥ ॥ अथ जलाशयवैकृतशांतिः॥ ॥ गर्गः॥ ॥ नग राम
राद्पसर्पंति समीपमुपयांति वा॥ नद्यो ह्रदप्रस्रवणा विरसा वै भवंति च॥ विवर्णं कलुषं तप्तं फे १२५
नवज्जंतुसंकुलं॥ स्नीरस्नेहं सुरां रक्तं वहंत व्याकुलोदकं॥ षाण्मासाभ्यंतरे तत्र परचक्रभयं

विंदुः॥ जलाशया नदंते च प्रज्वलंति क्वथंति च॥ विमुंचंति तथा शब्दं ज्वालां धूमं रजांसि च॥ अ
खातवा जलोत्पत्तिः सत्त्वानां जलाशयाः॥ संगीतशब्दरूपं ते जनमारभयं विदुः॥ दिव्यं महा
भयं विद्धि मधुमात्रावसेचनं॥ जप्त्वा वारुणमंत्रांस्तेः स्वच्छो भोजनं भवेत्॥ मध्वाज्ययुक्तं परमा
न्नमत्र देयं द्विजानामथ भोजनार्थं॥ गावश्च देयाः सितवस्त्रयुक्तास्तथोदकुंभाः सकलाघशांत्यै॥
॥ इति जलाशयवैकृत्यशांतिः॥ ॥ अथ वृष्टिवैकृतशांतिः॥ ॥ गर्गः॥ अतिवृष्टिरनावृष्टिर्दुर्भिक्षा
दौ भयं मतं॥ अनृतौ तु दिवानंता वृष्टिर्ज्ञेया भयाय तु॥ अनभ्रवैकृता चैव विज्ञेया राजहृतवे॥
अनभ्रवैकृता मेघमंतरेणाज्ञातगर्जितादयः॥ शीतोष्णानां विपर्यासे नृपाणां रिपुजं भयं॥ शो
णितं वर्षते यत्र तत्र शस्त्रभयं भवेत्॥ अंगारपांसुवर्षेण नगरं तद्विनश्यति॥ मज्जास्थिस्नेहमां
सानां जनमारभयं भवेत्॥ फलं पुष्पं तथा धान्यपर्षेण तिभयाय तु॥ पांसुजंतूपलानां च वर्षतो भ

गजं भयं॥ छिद्रा वांत्रप्रवर्षेण सस्यानां प्रीतिवर्द्धनं॥ विरजस्के रवौ भग्ने यदा छाया न दृश्यते॥ दृश्य
ते नु यदा पापा तत्र देशो भयं भवेत्॥ प्रतीपा प्रतिकूला छाया विपरीतच्छायेत्यर्थः॥ निर्घाते वातश्चारा
त्रौ स्थितथा स्यंतरेण तु॥ इंद्रायुधं तथा दृष्ट्वा उल्कापातं तथैव च॥ दिग्दाहपरिघोषौ वेगं गंधर्वनगरं त
था॥ पराचक्रभयं विद्यात् देशोपद्रवमेव च॥ सूर्येंदुपर्जन्यसमीरणानां यागस्तु कार्यो विधिवद्द्विजे
न्द्र॥ धनानि गोकांचनदक्षिणाश्च देया द्विजानां मघनाशहेतु॥ ॥इति दृष्टिवैकृतशांतिः॥ ॥अथा
ग्निवैकृतशांतिः॥ गर्गः॥ अग्निः प्रदीप्यते यत्र राष्ट्रे भूमिरिंधनः॥ नदी प्रतते वेधनुवानकृतश्च
रूपा उपेन्द्रपः॥ दह्येदारेश्व सदा शांत था प्रोल्लसदोसुधा॥ प्रासादातोरणद्वारं नृपवेश्म सुराल
यं॥ एतानि यत्र दह्येते तत्र राजभयं भवेत्॥ विद्युता वा प्रदह्यंते तथापि त्रपे तेर्भयं॥ अनेनशांति राम
तमांसि सुर्विनापांसुरजांसि च॥ धूमश्चानग्निजो यत्र तत्र विद्यान्महद्भयं॥ तडिद्विनाश्चं गगने भ १२६

यंस्याद्धृष्टिवर्जिते॥ दिवा सतारे गगने तथैव भयमादिशेत्॥ अनक्षत्रे वैकृत्ये तारा विकृति
दर्शने॥ पुत्रवाहनदारेषु चतुष्पदगृहेषु च॥ स्वनावा द्वा पिढायेते धेनुवत्सादिकं चयत्॥ लो
हायुधविकारः स्यात् तत्र संग्राममादिशेत्॥ त्रिरात्रोपोषितस्तत्र पुरोधाः सुसमाहितः॥ समिद्भि
क्षीरवृक्षाणां सर्षपैश्च घृतेन च॥ होमं कुर्यादग्निमंत्रैर्ब्राह्मणांश्चैव भोजयेत्॥ दद्यात् सुवर्णं च त
था द्विजेभ्यो गाश्चैव वस्त्राणि तथा भुवं च॥ एवं कृते तत्समुपैति नाशं यदग्निवैकृत्यभवं द्विजेंद्र॥ ॥
इत्यग्निवैकृतशांतिः॥ ॥अथ प्रतिमादिवैकृतशांतिः॥ ॥गर्ग उवाच॥ ॥देवतार्चाः प्रनृत्यंति प्र
ज्वलंति वा॥ आरटंति च रोदंति प्रस्विद्यंति हसंति च॥ उत्तिष्ठंति निषीदंति प्रधावंति रमंति च॥ भ
जंति विकृतिं भूत्वा मानुषीणां भयावहाः॥ अवाङ्मुखा वतिष्ठंति स्थानात् स्थानात् क्रमंति च॥ वमं
त्यग्निं तथा धूमं स्नेहं रक्तं तथा वसां॥ एवमादीनि दृश्यंते विघ्नाः सद्यो त्थिताः॥ लिंगायतनचि

त्रिषु तत्रावासं तरो चयेत्॥ राज्ञो वाप्यसनं तत्र स च देशो विनश्यति॥ देवयात्रासु चोत्पाता नृद
ष्टा देशत्रयं वदेत्॥ देवयात्रोत्पातावराहसंहितोक्तायां विनाशात् स्वधर्मेण तत्र वासं नरो चये
त्॥ पशूनां रुद्रजं ज्ञेयं नृपाणां लोकपालजं॥ रुद्रजं रुद्रप्रतिमास्व सेन्नं रुद्वैतं पशुत्रयपदमित्य
र्थः॥ एवं सर्वत्रापि ज्ञेयं॥ ज्ञेयं सेनापतीनां च यत्स्यात् स्कंदविशाखजं॥ लोकानां विष्णुवस्विंद्रं विश्व
कर्मसमुद्भवं॥ ज्ञेयं गणानां सेवकाय च॥ देवदूते च याः प्रोक्ताः देवस्त्रीषु नृपस्त्रियः॥ वासुदेवेषु वित्ते
योगलाणामेवनान्यथा॥ देवतार्चाविकारेषु श्रुतिवेत्तापुरोहितः॥ देवतार्चं तु गत्वा वैस्नातो मा
ल्यानुलेपयेत्॥ पूजयेत्तां महादानागांधमाल्यान्नसंपदा॥ मधुपर्केण विधिवदुपतिष्ठेदनंतरं॥ राम
तल्लिंगेचनमंत्रेण स्थालीपाकं यथाविधि॥ पुरोधा जुहुयाद्धोमं सप्तरात्रमतंद्रितः॥ विप्रांश्च पू १२७
ज्यामधुरान्नपानैः सदक्षिणैः सप्तदिनंनतरं॥ प्राप्तेष्टमे क्षितिगोप्रदानैः सकांचनैः शांतिमुपैति

पापं॥ ॥इत्युक्तुतशांतिषु देवतावैकृतशांतिः॥ ॥अथाकस्मिकप्रासादपतनादिशांतिः॥ ॥गर्ग
॥ प्रासादतोरणाट्टालद्वारप्राकारवेश्मनां॥ अनिमित्तं तु पतनं दृष्टा नो राजमृत्यवे॥ रजसा वाथ
धूमेन दिशो यत्र समाकुलाः॥ आलादित्यश्चंद्रताराश्च विवर्णाश्च यत्र हि दृश्ये॥ राष्ट्रसायत्रदृश्यंते
ओसृणाश्च विधर्मिणः॥ ऋतवश्च विपर्यस्ता अपूज्यं पूजयेज्जनः॥ नक्षत्राणि वियोगी नितन्मदृश्य
यलक्षणं॥ केतूदयोपरागौ च छिद्रं वा शशिसूर्ययोः॥ ग्रहर्क्षविकृतिर्यत्र तत्रापि भयमादिशेत्॥
स्त्रियश्च कलहायंते बालानि घ्नंति बालकान्॥ स्त्रियाणामुचितानां च विच्छित्तिर्यत्र दृश्यते॥ अ
ग्निर्यत्र न दृश्येत ह्रयमानो यथाग्निति॥ क्रव्यादा वायसा वा रायंति चोत्तरतस्तथा॥ पूर्णाः कुंभा
श्रवंते च वक्त्रयोर्कविलुंपती॥ मंगल्यध्वनयो यत्र न श्रूयंते समंततः॥ क्षवयुर्बाधते वा ध प्रीतस्मा
हसति निंदितः॥ न देवतेष्ववर्त्तंतयथावद्ब्राह्मणेषु च॥ मंदघोषाति वाद्यानि वाद्यंते विस्वराणि

न्ना॥गुरुमित्रद्विषोयत्रब्राह्मणपरताःसदा॥ब्राह्मणान्सुहृदोमान्यान्जनोयत्रावमन्यते॥शांति
मंगलहोमेषुनास्तिक्यंयत्रमन्यते॥राजावाम्रियतेतत्रअथवादेशोविनश्यति॥राज्ञोविनाशोसं
प्राप्तेनिमित्तानिनिबोधमे॥ब्राह्मणान्प्रथमेद्वेष्टिब्राह्मणांश्चविनिंदति॥ब्राह्मणस्वानिचादत्ते
ब्राह्मणांश्चजिघांसति॥नैतान्स्मरतिकृत्येषुयाचितश्चाभ्यसूयति॥रमतेनिंदयाचैषांप्रशंसां
नाभिनिंदति॥अपूर्वेतुकरंलोकानांतथापातयतेजने॥एतेषुस्वर्चयेत्सम्यक्सपत्नीकान्
द्विजोत्तमान्॥ब्राह्मणानिचैवकार्याणिसुराणांबलयस्तथा॥गावश्चदेयाद्विजपुंगवेषुभुवंत
थाकांचनमंबराणि॥होमंचकुर्याद्विजसत्तमोश्वनंचरणंकृत्वेतेशांतिमुपैतिपापं॥ ॥अस्तुतेतुसमु
त्पन्नेयदिवृष्टिःप्रजायते॥सप्ताहाभ्यंतरेज्ञेयंमस्तुतंविफलंतदा॥ ॥इत्याकस्मिकप्रासादपत राम
नादिशांतिः॥ ॥अथवृक्षविकारशांतिः॥ ॥गर्गः॥रुदतोव्याधिरस्येतिहसतोदेशविभ्रमः॥ १२८

॥स्रवाप्रपतनेकुर्यात्संग्रामंयोधपातनं॥बालानांमरणंकुर्याद्बालानांफलपुष्पतः॥स्वराष्ट्रभेदं
कुरुतेफलंपुष्पमयत्नैच॥क्षीरंसर्वत्रगंधीरस्नेहंदुर्भिक्षलक्षणं॥वाहनापचयंमद्येरक्तेसंग्रा
ममादिशेत्॥मधुस्रावेत्रवेव्याधिर्जलस्रावेचवर्षति॥अरोगशोषणंज्ञेयंब्रह्मलन्दुर्भिक्षलक्ष
णं॥शुष्केषुसंप्ररोहंसुवीर्यमन्नंचहीयते॥उत्थानेपतितानांचभयंभेदकरंभवेत्॥स्थानान्स्था
नुगमनेदेशभंगंतथादिशेत्॥जल्पनेश्वपिचवृक्षेषुस्वनस्वपिचनक्षयः॥एतान्प्रजिनवृक्षे
षुसर्वराज्ञोविपद्यते॥पुष्पैःफलैर्वाविकृतेराज्ञोमस्तुतथादिशेत्॥अन्येषुचैवोत्पातेषुवृक्षोत्प
न्नेषुतद्विनः॥आच्छादयित्वातंवृक्षंगंधमाल्यैर्विभूषयेत्॥वृक्षोपरितथाछत्रंकुर्यात्पापप्रशांत
ये॥शिवमभ्यर्चयेद्देवंपशुंचास्मैनिवेदयेत्॥मूलेस्पद्द्रतिवृक्षेषुकृत्वारुद्रंजपेत्ततः॥मध्वाज्ययुक्ते
नतुपायसेनसंतर्प्यविप्रांश्चतुर्वंचदद्यात्॥गातेनतत्सेननतथार्चयेत्तंदेवंहरेपापविनाशदं

शां॰म॰
१२८

तेः॥ ॥इति बृहदुत्पातशान्तिः॥ अथोत्पातशान्तिः॥ ॥नारदसंहितायां चतुस्त्रिंशोऽध्यायः॥ उत्पाता
विविधा लोके दिव्यभौमान्तरिक्षगाः॥ तेषां नामानि शान्तिं च सम्यक् वक्ष्ये पृथक् पृथक्॥ देवता
यात्रा नृत्यन्ति पतन्ति प्रज्वलन्ति वा॥ मुहुर्गायन्ति रोदन्ति प्रस्विद्यन्ते हसन्ति वा॥ वमन्त्यग्निं तथा धूमं
स्नेहं रक्तं पयो जलं॥ अधोमुखं तु तिष्ठन्ति स्थानात्स्थानं व्रजन्ति वा॥ एवमाद्याश्च दृश्यन्ते विकारा
प्रतिमादिषु॥ गंधर्वनगरं चैव तिदिवा नक्षत्रदर्शनं॥ महोल्कापतनं काष्ठं तृणं रक्तप्रवर्षणं॥
गांधर्वगेहं दिग्दाहं भूमिकंपं दिवा निशि॥ अनग्नौ च स्फुलिंगाः स्युर्ज्वलनं च विनेन्धनं॥ निशीन्द्र
चापमंडकं शिखरं श्वेतवायसं॥ दृश्यन्ते विस्फुलिंगाश्च गोगजाश्वोष्ट्रगास्ततः॥ जन्तवो द्वित्रिशिरस्
सो जायन्ते वा वियोनिषु॥ प्रतिसूर्याश्च तस्मात्सुर्दिक्षु युगपद्भवेः॥ जंबूक ग्रामसंवेशाः केतूनां च
प्रदर्शनं॥ काकानामाकुलं रात्रौ कपोतानां दिवा यदि॥ एवमेते महोत्पाता बहवः स्थाननाशकाः॥

शां॰म॰ १२८

DARBAR MEMORIAL

केचिन्मस्तुपदाः केचिच्चतुस्त्र्यश्वनयप्रदाः॥ देवालयेस्वगेहे वा ऐशान्यां पूर्वतोपि वा॥ कुंडं लक्षणसंयुक्तं
कल्पयेन्मखलायुतं॥ गृह्योक्तविधिना तत्र स्थापयेद्धुताशनं॥ ऊर्ध्वपादाज्यभागांतमथवाष्टोत्त
रं शतं॥ यतऊर्ध्वत्रयामहे स्वस्तिये न च मंत्रकैः॥ समिदाज्यचरुव्रीहितिलैर्व्याहृतिभिस्ततः॥ कोटिहो
मं तदर्द्धं वा लक्षहोममथायुतं॥ यथावित्तानुसारेण पादहोममथापि वा॥ एकविंशति रात्रं वा पक्षं प
क्षार्द्धमेव वा॥ त्रिरात्रमेकरात्रं वा होमकर्म समाचरेत्॥ गणेशक्षेत्रपालार्कदुर्गाख्याश्चांगदेवता
भ्यो सांप्रीत्यै जपः कार्यः शेषं पूर्ववदाचरेत्॥ ऋत्विग्भ्यो दक्षिणां दद्यात्तु षोडशोत्सः स्वशान्तितः॥
॥अथ पल्लीसरटशान्तिः॥ ॥गर्गः॥ पल्ल्याः प्रपातस्य फलं सरटस्य तथैव च॥ शीर्षे चाज्यं प्रियः
प्राप्तिर्भाले श्वर्यवर्द्धनं॥ कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बंधुदर्शनं॥ नासिकायां तु सौभाग्यं वक्त्रे मि
ष्टान्नभोजनं॥ कंठे नित्यं प्रियाश्लेषः स्कंधयोर्विजयो ध्रुवं॥ धनलाभो बाहुयुग्मे करयोरर्थसंक्षयः॥

शां.म
२३०

जंघयोश्चनिरुद्धोगः पादयोर्भ्रमणं भवेत्॥ एवं पल्ल्याः प्रपातस्य फलं ज्ञेयं विचक्षणैः॥ एतदेवं फलं वि
द्यात् सरटस्य प्ररोहणे॥ पल्ल्याः प्रपतने चैव सरटस्य प्रपातने॥ पंचरात्रे भवेत्तस्य व्याधिपीडा विशे
षतः॥ पतनानंतरे तस्य रोहणं यदि जायते॥ पतने फलमुत्सृष्टं रोहणोत्थफलं भवेत्॥ आरोहणे
चोर्ध्ववक्त्रे अधोवक्त्रे निपातने॥ भवेद्यदि तु शीघ्रेण तत्फलं जायते ध्रुवं॥ मृत्युयोगे दग्धयोगे
पाते च यमघंटके॥ चंद्राष्टमे नैधने च जन्मर्क्षे विषनाडिके॥ क्रूरलग्ने क्रूरयुते विष्टिवैधृतिसंयु
ते॥ दुर्भिक्षे च तयोः पाते निधनं जायते ध्रुवं॥ तयोः स्पर्शनमात्रेण सचैलस्नानमाचरेत्॥ गव्यं पंच
विधं प्राश्य कुर्यादाज्यावलोकनं॥ शास्त्रेवाप्यथवाशास्त्रे यदीच्छेदात्मनः शुभं॥ पुण्याहं वाचयि राम
त्वा तु शांतिकर्म ततश्चरेत्॥ प्रतिरूपं तयोः कुर्यात् सुवर्णेन स्वशक्तितः॥ रक्तवस्त्रेण संवेष्ट्य गंध २३०
पुष्पैः प्रपूजयेत्॥ कलशं वस्त्रयुग्मेन पूजयेद्विधिना ततः॥ अग्निसंस्थापनं कुर्यात् होमं कुर्याद्विधा

ततः मृत्युंजयेन मंत्रेण समिद्भिः खादिरैः शुभैः॥ तिलैर्व्याहृतिहोमं च अष्टोत्तरसहस्रकं॥ महाव्याहृ
तिहोमं च सर्पिषा कारयेत्॥ अभिषेकं ततः कुर्याद्यजमानस्य मूर्द्धनि॥ पुण्यैर्वरुणसूक्तैश्च वा
षः शांतादिमंत्रकैः॥ इत्थं मंत्रविधानेन यः कुर्याच्छांतिमुत्तमां॥ तस्यायुर्विजयो लक्ष्मीः कीर्तिः पुष्टिश्च
जायते॥ इति पल्लीशरटशांतिः॥ ॥ अथ ग्राम्यारण्यादिशांतिः॥ ॥ गर्गः॥ प्रविशंति यदा ग्राममरण्या
मृगपक्षिणः॥ अरण्यं यांति वा ग्राम्याः स्थलं यांति जलोद्भवाः॥ स्थलजा वा जलं यांति घोरं वासंति निर्भ
याः॥ राजद्वारे पुरद्वारे शिवा श्वा प्रतिवप्रदा॥ दिवा रात्रिंचरा वापि रात्रौ वापि दिवाचराः॥ ग्राम्यास्त्य
जंति ग्रामं वा तत्रोत्पातस्य निर्दिशेत्॥ उत्पातस्य लक्षणमिति शेषः॥ दीप्ता वासंति संध्यासु मंडलानि
वा कुर्वते॥ वासंते विस्वरं यत्र तदा प्रेतफलं लभेत्॥ प्रदोषे कुक्कुटो वासो हेमंते वापि कोकिलः॥ अर्का
दयेऽर्काभिमुखस्तदा मात्यभयं दिशेत्॥ गृहं कपोतः प्रविशेत्तत्र व्यादनु विलीयते॥ मधवा मक्षिका

कुर्य्यामस्तु र्यद्दपतेन्नवेत्॥ प्राकारद्वारगेहेषुतोरणापणवीथिषु॥ केतुछत्रायुधाग्रेषुक्रव्यान्तंश्र
यतेयदि॥ जायतेवाथवल्मीकामधुवायदिदृश्यते॥ सदेशोनाशमायातिराजावाम्रियतेतदा॥
स्रवकान्नशालस्थानदृष्ट्वाप्रस्नु तंस्रुस्नयवहेत्॥ काष्टोलूकास्थिसंगास्याःश्वानोमरकवेदिनः॥
दुर्निक्षिवेदिनोज्ञेयाःकाकाभ्मस्पद्दयेयदि॥ जनानन्निन्नवर्तेश्च निर्न्नयारणविदिनः॥ काकोमैथुन
युक्तश्चेछ्रुतःसयदिदृश्यते॥ राजावम्रियतेतत्रतद्दिशोविनरूपति॥ उलूकोवाग्रानेयत्रतिमत
घातथागरदो॥ ज्ञेयोगदपतेमस्तुर्ध्दननाशस्तथैवच॥ वाग्रातेग्राष्टं करोति॥ मृगपक्षिविकारेषुकुर्या
द्धोमिंसदक्षिणं॥ देवाकपोतइतिचजप्तव्यंपंचभिर्द्विजैः॥ सुदेवइतिवैकेनदेवागाधश्चदक्षिणं॥ राम
जपेच्छाकुनसूक्तंचनमोवेदशिरांसिच॥ देवाकपोतइत्यादयोमंत्राऋग्वेदेप्रसिद्धाः॥ नमोनमोब्रह १३९
णइति॥ वेदशिरांसिउपनिषदः॥ गावश्चदेवाविधिवद्द्विजानांसकांचनावस्त्रयुगोत्तरीयाएवकृ

तेशांतिमुपैतिपापंमृगैर्द्विजैर्वापिनिवेदितंयत्॥ ॥इतिग्राम्यारण्यादिशांतिः॥ ॥अथकपोतशां
तिः॥ ॥नारदः॥ आरोहयेद्गृहंयस्यकपोतोवाप्रवेशयेत्॥ स्थानहानिर्भवेत्तस्ययद्वानर्थपरंपरा॥
दोषायधनिनांगेहेदरिद्राणांशिवायच॥ तस्यशांतिस्तुकर्तव्याजेपरहोमविधानतः॥ ब्राह्मणान्वर
येत्तत्रस्वस्तिवाचनपूर्वकं॥ षोडशद्वादशाष्टौवाश्रोतस्मार्तक्रियापरान्॥ देवाःकपोतइत्यादिऋचाभिः
पंचभिर्जपं॥ लक्षंकृत्वाप्रयत्नेनगृह्योक्तविधिनाततः॥ ईशान्यांस्थापयेद्वह्निमुखांतेस्तोत्ररंग्रानं॥ मुखां
तेअग्निमुखांतेप्रत्येकंसमिदाज्यान्नैःप्रीतप्रणवपूर्वकं॥ यतइंद्रभयामहेस्वस्तिदेतित्र्यंबके॥ त्रिभि
र्मंत्रैश्चजुहुयात्तिलान्वाहुतिभिस्ततः॥ जयाद्युतोस्तेतोहुत्वाकुर्यात्पूर्णाहुतिंततः॥ विप्रेभ्योदक्षिणां
दद्यात्घोःशांतिचततोजपेत्॥ ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः॥ एवंयःकुरुतेसम्यक्
तस्माद्दोषात्प्रमुच्यते॥ पिंगलायाःस्वरेप्येवंमधुवल्मीकयोरपि॥ संपूर्णेमंदिरेहानिःशून्यसमानिमे

गलं॥प्राकारेच्चपुरद्वारेरथ्यादिषुचवीथिषु॥ग्रामस्यतत्फलंचैवगुरुत्वस्यनयातनः॥शांतिकर्माखि
लंकार्यंपूर्वोक्तेनक्रमेणतु॥ ॥इतिकपोतादिशांतिः॥ ॥अथकाकवैकृत्यशांतिः॥ ॥गर्गसंहिता
यां॥ ॥काकस्यमैथुनंपश्येत्काकःशिरसिचेद्विशेत्॥शिरस्युरसिवाकुर्यात्स्वरूघातंनखैस्तथा॥
विदारणंचकुरुतेशयानंचस्पृशेद्यदि॥तदावदेन्नुमरणंमहारिष्टमथापिवा॥मध्यरात्रेयदाकाको
वाश्यतेहेतुनाविना॥तन्महारिष्टमाचष्टेग्रामारिष्टमथापिवा॥शांतिंतत्रप्रकुर्वीतविधानेनयथोदितं॥
तद्दिष्टादिष्टशमनंकुर्यात्संकल्पमादितः॥शुचौदेशेरत्निमात्रेस्थंडिलेग्निंनिधायच॥तदीशानेष्ट
दलेकुंभोपरिस्वशक्तितः॥हिरण्यनिर्मितंत्विंद्रंलोकपालसमन्वितं॥पूजयित्वास्वशाखोक्तविधिना
अपरेद्युस्सं॥हुत्वाज्यभागपर्यंतंजुहुयात्क्रमशोबुधः॥पालाशीःसमिधोव्रीहीश्चरुमाज्यमितिक्र राम
मात्॥अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥यतइंद्रेतिमंत्रेणस्वाहालोमस्यएवच॥शक्त्याहुत्वा २३२

स्वशाखोक्तप्रायश्चित्ताहुतीर्हुनेत्॥लोकपालबलिंदत्वाऽग्निंचरुशेषतः॥वायसेभ्योबलिंदद्यादैं
द्रवारुणमंत्रतः॥ऐंद्रवारुणवायव्यायाम्यावैनैरृताश्चये॥तेकाकाःप्रतिगृह्णंतुइमंपिंडंसमर्पि
तं॥पूर्णाहुतिंततोहुत्वाआचार्यंपूजयेत्ततः॥कुंभोदकेनाभिषेकोयजमानस्यविस्तरात्॥आचा
र्यायेंद्रप्रतिमांदद्याच्छोपस्करांततः॥शक्त्याचभूयसींदद्याद्द्विजानांभोजनंदिशेत्॥शतंतदर्धमर्धं
वाशक्त्यावावेदशापिवा॥सर्वशांतिंपाठयित्वाग्रहप्रीत्यैद्विजाशिषः॥एवंकृतेत्ववैशांतिःकाकारि
ष्टविनाशिनी॥ ॥इतिगर्गसंहितायांकाकमैथुनशांतिः॥ ॥अथकाकस्पर्शशांतिः॥ ॥नारदः॥स्त्री
गमनवेलायांवायसःसंस्पृशेद्यदि॥निःशेषोवासशेषोवापुंसोमृत्युप्रदायकः॥अंगनांचस्पृशेत्का
कोवैधव्यंतत्रनिर्दिशेत्॥नदीतीरेगवांगोष्ठेक्षीरवृक्षेसुरालये॥नरोवावायसंस्पृष्टोबधबंधनमा
दिशेत्॥प्रतिचंद्रंतिसूर्यंवायसःस्पृशतेयदि॥अर्थहानिंतथामृत्युंशस्त्रेणचविनिर्दिशेत्॥मा

शां·म·
१३३

से: पंचभिरेवास्य निशाभि: फलमादिशेत्॥ तद्दिनादि फलं सद्भि: प्रोक्तमत्र शुभाशुभं॥ शांतिं तत्र प्रकु
र्वीत शास्त्रदृष्टेन कर्मणा॥ महानद्यं जले स्नात्वा शिवलिंगं निरीक्षयेत्॥ नत्वा संपूज्य लिंगं तु स्तुत्वा
तु दिवसत्रीनपि॥ आरभ्य तद्दिनादेव वायसेभ्यो बलिं हरेत्॥ शनैश्चरदिने प्राप्ते एकांते शुभमंदिरे॥
कृष्णानि च वस्त्राणि अहतानि नवानि च॥ पूर्वदिक्क्रमयोगेन स्थापयेच्च पृथक्पृथक्॥ माषप्रस्थ
प्रमाणेन स्थापयेत्तत्र वायसान्॥ पूर्वस्यां कपिलं तत्र स्थापयेन्मंत्रपूर्वकं॥ नीलग्रीवमथाग्नेय्यां
याम्यां च विकृतस्वरं॥ नैरृत्यां चन्यसेत्क्रौंचमपमृत्युविनाशनं॥ विद्युज्जिह्वं च वारुण्यां वायव्यां कृ
ष्णकर्बुरं॥ कौबेर्यां कालनामानं ईशान्यां कालमेव च॥ अहते कृष्णवस्त्रे तु यममध्ये प्रपूजयेत्॥ म राम
हिषं कृष्णवर्णं च यममाषैश्च पूजयेत्॥ रक्तोत्तमांगं सर्वत्र आयुधैश्च समन्वितं लोहदंडं चतुर्बाहुं पू १३३
जयेन्मंत्रपूर्वकं॥ यस्मिन्वृक्षे परि पिवांसं सुगंत: पंथामेव च॥ एते मंत्रा: समाख्याता: स्थापनानाममं

त्रत:॥ अकालमूलकलशं स्थापयेत्तस्य संनिधौ॥ जलपूर्णै रत्नगर्भै पूर्णपात्रसमन्वितं॥ स्थापयेत्तत्र
देवेशं शूलपाणिं महेश्वरं॥ प्रतिष्ठाप्य च तान्सर्वान्त्र्यंबमंत्रै: प्रपूजयेत्॥ कपिलस्त्वं च वर्णेन शुभाशु
भनिवेदक:॥ गृहाणार्घ्यमया दत्तं त्वं वाशुभविनाशन॥ नीलग्रीव गृहाणार्घ्यमया दत्तं खगेश्वर॥ अ
पमृत्युविनाशाय ददामि बलिमुत्तमं॥ क्रूरस्त्वं पापिनां नित्यं सौम्यस्त्वं धार्मिके जने॥ विकृतस्वर गृह
णार्घ्यमया दत्तं शुभाय न:॥ क्रूरस्त्वं पापिनां वायम शुभं न: प्रयच्छति॥ गृहाणार्घ्यमया दत्तं क्रौंच सौम्य
प्रदो भव॥ विद्युज्जिह्व नमस्तेस्तु आधिशोकविनाशन॥ बलिपूजां मया दत्तां गृहाण सुखदो भव॥ कृष्ण
कर्बुरनामस्त्वं मृतजन्मनिवेदक॥ गृहाणार्घ्यमया दत्तं त्वं वैधव्यनाशन॥ काक त्वं कालना
मासि दुष्टकालनिवेदक:॥ गृहाण बलिपूजां मे दत्तां दु:खविनाशन॥ श्वेतस्त्वं सितवर्णोसि मृत्यु
नाशस्य सूचक:॥ गृहाणार्घ्यमया दत्तं त्वमपमृत्युविनाशन॥ तन्मध्ये पूजयेद्देवं धर्मराजं चतुर्भुजं॥

शां॰म
१३४

यमायधर्मराजायमृत्यवेचांतकायच।वैवस्वतायकालायसर्वभूतक्षयायच।औदुंबरायदध्ना
यनीलायपरमेष्ठिने।वृकोदरायचित्रायचित्रगुप्तायवैनमः।नीलग्रीवायलोकेशादंडहस्ता
तेनमः॥पाशहस्तायसायुधायसपरिवारायतेनमः।चंदनैश्चसुगंधैश्चवासोभिःपूजयेद्यमं।त्र्यं
बकमंत्रेणईश्वरंचप्रपूजयेत्॥मृत्युविनाशिनीविद्यांकुंभेचैवनियोजयेत्।शतमष्टोत्तरं
चैवआचार्योहृष्टमानसः॥स्वगृह्योक्तविधानेनचरुंचयमदैवतं।संश्रप्यजुहुयाद्वह्नौसमिदाज्य
चरूंस्तिलान्।ततश्चैवसमित्कार्याशतमष्टोत्तरंतथा॥समिद्धोमेणजुहुयात्प्रतिद्रव्यंशतंहुने
त्।सुगन्नःपथामंत्रेणहोतव्यंसर्वमंत्रतः॥न्यासनंप्रकर्त्तव्यंपंचवर्णकसंयुतं।तस्योपरिन्य राम
सेत्पात्रंयजमानमथाह्वयेत्।निवेश्यपाद्यादितेपीठेअभिषेकंचकारयेत्॥पावमानीभिस्तल्लिंगै १३५
मंत्रैर्वरुणसंभवैः।तल्लिंगैःसुगंन्नपंथामित्यादिभिः।तत्रस्नानंप्रकर्त्तव्यंतीर्थानीतेनवारिणा॥

DR. BHAU DAJI MEMORIAL
डाक्टरभाऊदाजीइत्यस्यस्मारकम्

सहस्राक्षादिभिर्मंत्रैःस्नानंकार्यंद्विजोत्तमैः॥ततोन्यद्वस्त्रमादायधर्मराजंतुपूजयेत्।उक्तैःषोड
शाभिर्मंत्रैःसुगन्नित्यर्थ्यप्रदापयेत्॥ततस्त्वायसंप्रार्थ्यभक्तिभावसमन्वितः।रक्षमांपुत्रपौत्रां
श्चरक्षमांपशुबांधवान्।रक्षपत्नींपतिंश्चैवपितरंमातरंधनं॥अग्निनोमेभयंमास्तुरोगाद्व्याधि
बंधनात्।शस्त्रतोविषतोयैर्वाभयंनाशायमेसदा॥प्रार्थनाचप्रकर्त्तव्यानमस्कारसमन्विता॥का
कस्पर्शंचयद्दुःखंस्नानजंतच्चयज्ञवेत्।सहिरण्यंचतत्कृत्वाब्राह्मणायनिवेदयेत्॥मंत्राःय
त्किंचित्स्पर्शदोषोस्यंदुःखमपिविद्यते।तत्सर्वंनाशमायातुवस्त्रदानेनसूर्यजः।वायसांस्ता
न्यमंचैवआचार्यायनिवेदयेत्।माषान्वासांसिरूपस्ततुधेनुंचैवपयस्विनीं॥शांतिवारेचत
त्कार्यंरविवारेथवापुनः।घृतपात्रेससौवर्णेदर्शयेदात्मनस्तनुं।ब्राह्मणोसौददेदन्नंल्पयसीचे
वशक्तितः।यथोक्तांदक्षिणांदद्यात्वित्तशाठ्यंनकारयेत्।स्थानेयत्रस्पृशेत्काकस्तत्स्थानंपूज

येन्नदा॥ एवंकुर्यात्प्रदानेनध्वांक्षदोषःप्रशाम्यति॥ ॥इतिकाकस्पर्शशांतिः॥ ॥अथप्रकारांतरेण
काकमैथुनदर्शनशांतिः॥ ॥नारदः॥ दिवावाथदिवारात्रौयःपश्येत्काकमैथुनं॥ सनरोमृत्युमाप्नो
तिह्यथवास्थाननाशनं॥ काकघातप्रतंयद्वाविदध्यीतायथवत्परं॥ पिन्नवत्द्विजान्सत्रयाप्रस
द्व्वाभिवादयेत्॥ जितेंद्रियोजितक्रोधःसत्यधर्मपरायणः॥ तद्दोषशमनार्थायशांतिकर्मसमा
रभेत्॥ गृहस्येशानदिग्भागेहोमस्थानंप्रकल्पयेत्॥ गृह्योक्तविधिनातत्रप्रतिष्ठाप्यहुताशनं॥
मुखांतेसमिदाज्यानिहुनेदष्टोत्तरंशतं॥ प्रतिमंत्रंत्र्यंबकेनअथमृत्युंजयेनच॥ व्याहृतिभिर्हि ति
लैर्जयाघृतंप्रकल्पयेत्॥ पूर्णाहुतिचेज्जुहुयात्कर्त्राप्युविरलंदहनः॥ स्वर्णश्रृंगरौप्यखुरांवस्त्रां॥ राम
धेनुंपयस्विनीं॥ वस्त्रालंकारसंयुक्तांनिष्कद्वादशसंयुतां॥ तदर्द्धंनतदर्द्धंनदद्याद्दक्षिणायायु १३५
तां॥ यथावित्तानुसारेणन्यूनाधिक्यस्यकल्पना॥ आचार्यायश्रोत्रियायतांगांदद्यात्कुटुंबि

ने॥ यस्मात्त्वंपृथिवीसर्वाधेनोवैकेशवसंन्निधौ॥ सर्वमृत्युहरेनित्यमतःशांतिंप्रयच्छमे॥ ब्राह्मणेभ्योविशि
ष्टेभ्योयथाशक्त्याचदक्षिणां॥ ब्राह्मणान्भोजयेत्पश्चात्शांतिवाचनपूर्वकं॥ एवंयःकुरुतेसम्यक्तस्मा
दोषात्प्रमुच्यते॥ ॥इतिकाकमैथुनदर्शनशांतिः॥ ॥अद्भुतसागरेनारदः॥ ॥शनौसिंहगतेचैवयस्य
गौःसंप्रसूयते॥ मरणंतस्यनिर्दिष्टंषड्भिर्मासेनसंशयः॥ ततःशांतिंप्रवक्ष्यामियेनसंपद्यतेशुभं॥ प्रसूतां
तत्क्षणात्तांगांविप्रायदापयेत्॥ ततोहोमंप्रकुर्वीतघृताक्तैराजसर्षपैः॥ आहुतीनांघृताक्तानांअष्टायु
तंजुहुयात्ततः॥ सोपवासःप्रयत्नेनदद्याद्विप्रायदक्षिणां॥ वस्त्रयुग्मंयवंचैवससुवर्णंप्रदापयेत्॥ इदंदेव
तमंत्रेणततःशांतिंन्नवेद्द्विजः॥ गर्गः॥ दिवाप्रसूतावडवाश्यावर्णाचविशेषतः॥ माघमासेबुधेचैवप्रसवे
न्महिषीयदि॥ सिंहेगावःप्रसूयंतेस्वामिनोमृत्युदायकाः॥ जंगमेस्थावरंजातंस्थावरेवायजंगमं॥ तस्मि
न्योनिविपर्यासेपरचक्रागमोभवेत्॥ स्यगोविवासोदानंवाहुत्वाप्याशुशुभंलभेत्॥ वडवारुस्तिनागौ

वीयद्वियुग्मंप्रसूयते॥ विज्ञात्वंविकृतंवाथषड्भिर्मासैर्म्रियेतवै॥ वियोनिषुचगच्छंतिमैथुनेदेशनाशना
नं॥ अन्यत्रवसरोस्त्रेनराणांवाजातिमैथुनात्॥ सर्पमूषकमार्जारमत्स्यश्वानविवर्जितां॥ स्त्रियादु
ष्टिक्षकर्त्तारःस्वजातिपिगितास्तमा॥ अकालजोमदोघोरश्चतुष्पान्मृगपक्षिणां॥ अन्यजातिषु
तस्माद्धेनुश्वानोविशेषतः॥ अथानडुहानडुहंधेनुर्धेनुंपिबेद्यदि॥ शुनीवाधयतेधेनुंशुनींधेनुर
थापिवा॥ तिर्यग्योनिंमानुषीवापरचक्रागमोभवेत्॥ अमानुषीमानुषाणिजल्पंतिप्राणिनोयदि॥
विकृतंवान्नसस्यंतेपरचक्रागमंवदेत्॥ त्यागोविवासोदानंवातेषांकार्यंविजानता॥ तर्पयेद्ब्राह्म
णांश्चैवजपहोमांश्चकारयेत्॥ मृदंगवाद्यैपटहैःसुशोभनैःपूजाचकार्यात्रिदिवौकसां॥ धान्यस्त राम
थैस्याविधिनाचकार्यदेयंतथान्नंबहुचद्विजेभ्यः॥ निर्गर्गः॥ उलूखलंवामुसलंवापिस्फुटतेवाप्युलू २३६
खलं॥ उत्तेदलनंयंत्रं स्रुतानांचैवविश्वेतगृहेदेवगृहेथवा॥ दृषदान्नपीठंवाआसनंशयनंत

था॥ अकस्मात्स्फुरतेयत्रकंपतेवाचसंधम॥ इत्यादीनिनिमित्तानीसुक्त्वाशांतिरथुक्तातत्रैव॥
अश्वत्थसमिधौकृत्वाघृताक्तमधुसंयुता॥ सावित्र्याष्टसहस्रेणप्राजापत्यास्तुमंत्रयेत्॥ प्राजाप
त्याःप्रजापतिदेवताकाः॥ पायसंभोजयेद्विप्रान्हुतांतेनरिदक्षिणा ततःप्रणश्यतेपापंप्रजापत्या
मथंयथा॥ सएव॥ वृक्षाःपिपीलिकायत्रग्रामेषुनगरेषुवा॥ अतिमात्रंतुदृश्यंतेजयंर्धवंशाक्षताल
या॥ शांतिगृहेदेवगृहेतथानृपतेर्गृहे॥ उपर्युपरिमात्रंतुदृश्यंतेवेश्मतत्रदा॥ मक्षिकामशाका
दंशाअतिमात्रंभयावहा॥ इंद्रनोर्लक्षणोसातेमहाचौरभयंभवेत्॥ द्रव्याणांहरणंक्षयासरचक्र
स्यचागमं॥ तत्रशांतिंप्रवक्ष्यामिविश्वामित्रोपदर्शितां॥ अश्वत्थसमिधश्चैवकृत्वाष्टोत्तरंशतं॥
पूर्णपात्राणिदेयानिहोमांतेन्नदक्षिणां॥ दासीदाससमायुक्तंगृहंदद्याद्द्विजातये॥ तिलपात्रं
प्रदातव्यंतिलान्जुहुतसंयतः॥ सएव॥ मृतःश्मशानंयोनीतःपुनर्जीवतिमानवः॥ गृहेयस्यप्र

विष्टोसौतिष्ठेदथकदाचन॥अचिराद्भूत्वतांयातिरूवदारपरीग्रहः।तत्रशांतिंप्रवक्ष्यामिधर्मं
धर्ममतंयथा॥सक्षीराणांघृताक्तानांअग्नौहुत्वासुखंबुधः।उदुंबराणांविधिवत्ततःशांतिं
कृनोत्सवेत्।साविप्रस्वसदृस्तेणक्षीरसांतिंचकारयेत्।रक्तानामेकोस्यादिवत्समाणाक्षी
रंशांतिः।कपिलातिलवासांचकृतांतेभूरिदक्षिणा॥ततस्तच्छाम्यतेपापंधर्मराजमतंयथा॥सएव
अतोरोगमनावृष्टिदुर्भिक्षजनमारकं॥ज्वरःकासस्तथाश्वासःकछ्रूदद्रुर्विकोष्टिकाः।शिरोरोगोक्षि
रोगंचपांडुरोगोगलग्रहः।व्याधयश्चप्रवर्तंतेदुर्दृष्टेःस्वप्नलक्षणैः।तत्रशांतिंप्रवक्ष्यामिबृहस्प
तिमतंयथा॥त्रिरात्रपोषितोस्नात्वाद्विद्यार्थीपुरोहितः।सक्षीराणांघृताक्तानांसमिधानांशतं राम
दहेत्।पालाशस्येतिशेषः।ततस्तच्छाम्यतेपापंबृहस्पतिमतंयथा॥सएव।वज्रमिंद्राम।शांति २३७
र्वापिज्वलनापततेयदि।पुरेजानपदेवापितत्रविद्यान्महद्भयं।संवत्सरततोघोरंविद्यांचैवज

नक्षयंराजामात्यविनाशंचनिर्दिशेत्सात्रसंशयः।तत्रशांतिंप्रवक्ष्यामिइंद्राग्निवचनंयथा॥
अपामार्गस्यसमिधांसहस्राष्टोत्तरंहवेत्।पायसंभोजयेद्विप्रान्क्षीरसांतिंचकारयेत्॥रक्तानां
मेकवर्णानांगवांक्षीरंसमादिशेत्॥समाश्रयेदोमार्थंसंपादयेत्॥कृत्वाकृतिशतंविप्राहोमदेशोच
मंत्रवित्॥तदेदेशामहाउंशोमतुजनेत्यादिना॥सुवर्णमणिसंकाशाकृतांतेभूरिदक्षिणा॥गोरिरि
तिशेषः।ततस्तच्छाम्यतेपापंइंद्राग्निवचनंयथा॥शौनकः॥अथयदास्यगणिकुंतस्यासीदरण
माध्यासोराजकुलविवादोवायातत्रग्राम्यासनावसथध्वजगृहैकदेशंनजति।राजवाजिसुखाः
प्रमीयंतेवानाद्भूतिरुत्पेवमादितितान्येतानिसर्वाणिइंद्रदैवत्यान्यद्भुतानिप्रायश्चित्तानिभवंति॥
इंद्रोदेवतानाक्षत्रीचयेषांतानीइंद्रदैवत्यानिअद्भुतानितेषुप्रायश्चित्तान्यपीइंद्रदैवत्यानिभवंति।इदंवि
श्वेतिस्थालीपाकंकृत्वापंचाज्याहुतिर्जुहोति।इंद्रायस्वाहा॥शचीपतयेस्वाहा॥ईश्वरायस्वाहा॥स

शां॰म॰
२३८

र्वपापघ्नामनायस्वाहेतिव्याहृतिभिश्चपृथक्पृथक्॥सएवाहनिचारेणवासर्योगच्छति॥कयोः
नःप्रविशतिद्वारा।रेरोदतिहृस्तस्त्रीदर्शनमित्येवमादीनितान्येतानिसर्वाणियमदैवत्यान्यस्तु
तानिप्रायश्चित्तानित्रवंतेनाकेमुपनार्गमितिस्थालीपाकंकृत्वापंचभिराज्याहुतीर्जुहुयात्॥य
मायस्वाहा॥प्रेताधिपतयेदंडपाणयेसर्वपापघ्नामनायस्वाहेति॥व्याहृतिभिश्चपृथक्पृथक्
जुहोति॥सेरव॥दिशोदशादह्यति॥केतवश्चोतिष्ठतिगवांश्रृंगाद्रुधिरंस्रवति॥अस्यर्यदिमांशुस्त
चतिइत्येवमादीनिसर्वाणिसोमदैवत्यान्यद्भुतानिप्रायश्चित्तानित्रवंतिसोमंराजानमितिस्थाली
पाकंकृत्वापंचभिराज्याहुतीभिरभिजुहोति॥सोमायस्वाहानक्षत्राणांपतयेस्वाहा॥सौरूपाण राम
येस्वाहा॥ईश्वरायस्वाहा॥सर्वपापघ्नामनायस्वाहेतिव्याहृतिभिश्चपृथक्पृथक्जुहोति॥ ॥अ २३९
प्याश्वशांतिः॥ ॥गर्गः॥अश्वशांतिंप्रवक्ष्यामिशृणुशौनकयत्नतः॥अश्वशालासमीपेतुकुंडंकु

र्याद्विधानतः॥उन्नतंहस्तमात्रंचआयामंचतथाभवेत्॥मेखलात्रयसंयुक्तंयोनिरश्वत्थपत्रव
त्॥कुंडस्योत्तरपूर्वंतुवेदिंकुर्यात्सुशोभनां॥सार्द्धहस्तंतथायाममुत्सेधोहस्तमात्रकं॥वर्तुलांचतुरस्रां
चदेवानांस्थापनीयच॥कुर्याद्दिष्टदलंपद्मंतंडुलैर्वेदिकोपरि॥तन्मध्येपूजयेद्देवंसुवर्णेनप्रकल्पि
तं॥अश्वारूढंमहातेजसंभरूस्तंमहाबलं॥अश्वारिष्टहरंशूरंदेवंतंहेमवल्लभं॥देवेंद्रंचधनाधीशंसु
वर्णेनप्रकल्पयेत्॥वरुणंचतथैशानंरजतंचप्रकल्पितं॥यमंचकालंलोहेनताम्रेणापितथैवच॥
निर्ऋतिंचतथावायुंनागेतैवप्रकल्पयेत्॥सोमंचरजतेनैवप्रकल्पयेत्सुसमाहितः॥कृत्वैवलोकपा॥
लांश्चस्वेषुस्थानेषुविन्यसेत्॥आवाहनार्घ्यपाद्याद्यैर्गंधपुष्पादिकैःशुभैः॥धूपदीपैश्चनैवेद्यैःपूज
येत्प्रीतिपूर्वकं॥पंचामृतेनस्नपनंकुर्याद्देवस्यमंत्रकैः॥स्विघयुवाजितमित्यावाहनंचरेत्॥अश्वस्तप
रोगविनिकुर्यात्स्थापनंबुधः॥मानस्तोकेतिमंत्रेणस्नानंसम्यक्प्रकल्पयेत्॥युवंवस्त्राणीति

धावस्त्रं चैव प्रकल्पयेत्॥ यज्ञोपवीतं दातव्यं देवस्य त्वेति मंत्रतः॥ चित्रं दीयेति मंत्रेण अर्चयेत्सुसमा
हितः॥ गंधद्वारेति गंधं च पुष्पं श्रीश्च ते पैव च॥ धूरसीति तथा धूपं दीपं चाग्निर्विशेषतः॥ अन्नंतय
तेति मंत्रेण नैवेद्यं बहु कल्पयेत्॥ एवं संपूज्य विप्रेंद्र विपत्रं हयाधिप॥ ततः संपूजयेद्धीमान् लोक
पालान्स्वमंत्रतः॥ इंद्रं वो विश्वतः प्राक् अग्निर्दूतेति पावकं॥ यमाय सोमेति यमं निरृतिं मोषुणोति
च॥ त्वं नो अग्नेति वरुणं तव वायेति चानिलं॥ सोमो धेनुं तथा सोमं कद्रुद्रेति तथा शिवं॥ पूजयेद्गंध
पुष्पाद्यैर्धूपदीपनिवेदनैः॥ क्रमेण पूजयेद्दिक्षु देवान्संपूजयेत्ततः॥ अश्वारूढ महावीर तुरंगेश्च ब
महाबल॥ अश्वारूढं चरेवतं नाम्ना चास्तु विनाशाय॥ सापेशान गजारूढ वज्रहस्त सुरेश्वर॥ वज्रेण
तुरगारिष्टं निम्नं कुरु शचीपते॥ मेषारूढ महातेजो ज्वलज्ज्वालाविभूषित॥ तीक्ष्णासिना हुतव
ह अश्वारिष्टं विनाशान॥ कालदंडधरो देव महामहिषवाहन॥ कालदंडेन दंडस्वं अश्वारिष्टं विना

DR. BHAU DAJI MEMORIAL

शाय॥ खड्गहस्त महानीम निरृते प्रेतवाहन छिन्नं कुरु हयारिष्टं तीक्ष्णखड्गेन शीघ्रतः॥ पाशहस्त जला
धीश सदा मकरवाहन॥ पाशेन च हयारिष्टं निम्नं कुरु जलाधिप॥ ध्वजहस्त महाकाय मृगारूढ महाच
ल॥ नाशय स्व हयारिष्टं ध्वजदंडेन चानिल॥ शक्तिहस्त महाराज कुबेर नरवाहन॥ अश्वारिष्टं च यद्देश
शान्तया चास्तु विनाशाय॥ शूलहस्त महारौद्र पिनाकिन् वृषवाहन॥ अश्वस्य नाशयारिष्टं त्रिशूलेन त्रि
लोचन॥ एवं संप्रार्थ्य विप्रेंद्र लोकपालक्रमेण च॥ अग्नेः संस्थापनं कृत्वा कुंडे होमं च कारयेत्॥ तिलव्रीहि
यवैश्चैव प्रत्येकं वा ढक्काढकं॥ होमं कुर्यादश्वकामः चरुणा घृतपूर्वकं॥ स्थापयित्वाज्यसंस्थालीतस्थे
नाज्येन यत्नतः॥ उक्तं सर्वैश्च मंत्रैश्च देवमुद्दिश्य कारयेत्॥ अग्नये स्वाहा॥ सोमाय स्वाहा॰ वायवे स्वाहा॰
विष्णवे स्वाहा॰ सर्वज्ञाय स्वाहा॰ सर्वदुरितनाशनाय स्वाहा॰ रेवंताय स्वाहा॥ सर्वकामफलप्रदाय प्र
जापतये स्वाहा॰ सर्वत्र होमकार्यः॥ अग्निरक्षादोन्तपतिरन्नाद्यमस्मिन्यज्ञेन यजमानाय ददानु स्वा

ह॥ सोमोराजाराजपतिं॥ एवंसर्वत्रहोमविधिः॥ इत्थंकृत्वा होमकर्मआचार्योविधिवत्ततः॥ शान्नोनवतु
मंत्रेण अश्वशालांप्रवेशयेत्॥ पवित्रंतेतिमंत्रेण अश्वान्संप्रोक्षयेद्द्विजः॥ एषवाजीतिमंत्रेणतथा
श्वांश्चविसर्जयेत्॥ मानोमित्रेतिमंत्रेणतुरंगान्स्थापयेत्सुधीः॥ पूर्णाहुतींचजुहुयात् अछिन्नघृत
धारया॥ कृतेस्यश्वबलिंदद्यात्दिक्ष्वाल्लमंत्रपूर्वकं॥ असुराःपन्नगायक्षायातुधानाश्चराक्षसाः॥ पि
शाचासिद्धगंधर्वाःवेतालायोगिनीशिवा॥ डाकिनीलाकिनीचैवशाकिनीजंबुकादयः॥ अश्वारिष्ट
स्पशांत्यर्थंबलिंगृह्णंत्विमंग्रह॥ इत्थंदत्वाबलिंसम्यक्कृतेस्यश्वविधानतः॥ अश्वंचदक्षिणायुक्तं
प्रतिमांवस्त्रसंयुतां॥ उपस्करंदेवंआचार्यायप्रदापयेत्॥ आहुतीर्देवतानांचद्विजेभ्योवस्त्र राम
संयुताः दद्यात्ताद्दक्षिणायुक्ताः श्रद्धापूतासमाश्रितः॥ आहुतीःप्रतिमादेवान्नामिंद्रादीनांअनेनवि १४०
धिनाकृत्वाहयानांशांतिकंमहत्॥ अश्वानांनीरुजत्वंचबलंपुष्टिजलंतथा॥ लक्ष्मीःस्थितामन्तनां

चसंग्रामेविजयोभवेत्॥ ब्राह्मणान्भोजयेत्पश्चात्ततःशांतिर्भविष्यति॥ ॥इतिअश्वशांतिः॥ ॥अथग
जशांतिः॥ ॥सनत्कुमारउवाच॥ ॥अथराजाप्रकुर्वीतचथापीगजवाजिनां॥ शांतिमामयनस्तानांन
दुत्पातोदयेदृति॥ किंवलानिचनादन्नेयदात्वश्रूणिमुंचतिसद्यःप्रशांतोतिर्वेदाद्यदास्यान्मदवर्जितः॥
विहानगानिमत्यर्थपरिक्षीणानतुंद्विपां॥ विमानान्त्वस्तसर्वांगशुष्तोनष्टपराक्रमः॥ नष्टशोत्रःसदारुनोमर
ष्टसंज्ञोरुषान्वितः॥ नानाव्याधिसमुत्थाभिःपीडाभिःपीड्यतेयदा॥ अरिष्टोपनिपातेषुतथोत्पातेष्वयेषु
च॥ तदाशांतिप्रकुर्वीतगजरक्षापरोन्टपः॥ अरिष्टाद्यसुभेत्वेवंवाजिनांलक्ष्यतेयदा॥ पुष्कारंत्तेषुचतथाति
षांशांतिंचकारयेत्॥ शांत्यर्थंगजवाजिनांमंडपंचतुरस्रकं॥ द्वादशारत्निमानेनसंमितंकारयेत्सुधीः॥ बाहु
प्रमाणंमध्येतुयोतिनाभिसमुज्वलंकुंडंत्रिमेखलंकुर्यात्द्दत्तंवाचतुरस्रकं॥ तत्सुरस्रात्दक्षिणातःपश्चिमेऽ
चोत्तरेतथा॥ चतुरस्रंततःकुर्यात्कुंडंहस्तप्रमाणकं॥ कोणेषुचतथाकुर्यात्द्दत्तेचाष्टत्रिकोणकं॥ अर्करवा

दिरपालान्॥ बिल्वाश्वत्थवटैरपि॥ औदुंबरअपामार्गसमभिस्तत्र तत्र वा॥ मध्ये सर्वसमिद्भिर्वा पालाशैर्वा॥
वाज्यबिल्वकैः॥ तिलतंडुललाजाभिः सक्तुसिद्धार्थशालिभिः॥ यवैरेभिस्त्रिमध्वक्तैर्मध्ये सर्वमिति स्थितिः॥
दत्वा च पयसा चैव घृतेन मधुना पिधा॥ कोणेषु च तथाज्येन मध्ये तु कलशैरपि॥ स्थापयेच्च ततः कुंभान्
अष्टावष्टासु दिक्षु च॥ वस्त्रयुग्मेन संछन्नान् सर्वौषधिसमन्वितान्॥ सर्वरत्नयुतान् युग्मान् गंधपुष्पोद-
कैरपि॥ हस्तावरप्रमाणं तु वरुत्कुंभं तु मध्यमे॥ तीर्थोदकेन संपूर्णं सर्वरत्नौषधैरपि॥ चतुरः कलशांस्त-
त्र चतुर्थस्य समंततः॥ कोणेषु च यथान्यायं जलवस्त्रादिकैर्युतान्॥ स्मरेत्प्रधानकुंभे तु नरसिंहाकृतिं
हरिं॥ चक्रशंखगदापद्मचर्मासिशार्ङ्गकायः पूर्वादिक्रमयोगेन धातव्यं कलशेष्वपि॥ वहिः शक्रादि
दिक्पालांस्तत्र तत्र च संस्मरेत्॥ प्रधानकुंभात्पुरतः कुर्याच्चक्रानुमंडलं॥ तत्र संपूज्य देवेशं पश्चाद्धोमा- राम २४१
दि साधयेत्॥ मंडलाग्रेण वा कुंभे कुंडाग्रे कुंडमेव च॥ सर्वत्रानलसंस्कारान् स्वगृह्योक्तेन कर्मणा॥ जुहुया-

दग्निसिद्धार्थमाज्याहुतिसहस्रकं॥ आनुष्टुभेन मंत्रेण गुरुर्वास्य पुरोहितः॥ आनुष्टुभो नृसिंहमंत्रोद्-
धासाहस्रमिष्यते॥ समित्तण्डुलचरून् एवं हुत्वा मंत्री समाहितः॥ संपात्याज्याहुतीनां च सहस्रे वायुते
ऽन्वेते॥ ततः स्विष्टकृदित्यादि समापनविधिक्रमात्॥ एवं समाप्य विधिवद्धोमं तत्र पुरोहितः॥ संस्पृशो-
दुदकुंभं च जपेद्वै सहस्रकं॥ पर्यंतकलशान् स्पृष्ट्वा जपेत्तत्र सहस्रकं॥ अनंतरेषु कुंभेषु गायत्र्या प्रण-
वेन वा॥ त्रिविग्रैर्युगपत्कार्यं होमतंत्रं च पूर्ववत्॥ प्रतिकुंभं सहस्रं च जपेत्तान् पुष्पस्पर्शान्॥ पूजयेद्यो-
कपालादीन् गंधादिभिरतंद्रितः॥ अथ राजानमाकार्य स्वास्तीर्णे सिंहविष्टरे॥ समाप्य च शुचिस्नातं स-
चीलं कारसंयुतं कुंभोदकेन देवाग्रे तन्मंत्रेण भिषिंचयेत्॥ पर्यंतकलशैश्चापि तत्पश्चाद्भद्रादिकं॥
अन्यांश्च वाहनान्पूज्य दिव्यलक्षणसंयुतान्॥ गजादीन् वन्हिश्रेष्ठेन तोयेन स्नापयेद्बुधः॥ अन्यवाहना-
न् द्विपदाद्यान् तान् सर्वेनैव समाहितः॥ बाह्यकुंभोदकेनैव स्नापयेत्तत्र साधकः॥ राज्ञो नीराजनं कु-

पीठारूढेषु च मंत्रवित् अन्येष्वेवं विधः कार्यः सहिरण्यकरः परः। राजानं वारनारीश्च तथान्याश्च पुरो
हिताः। सर्वालंकारसंयुक्तान् सर्वमंगलसंयुतान्॥ कृत्वा तु वाचयेत्स्वस्ति ब्राह्मणैराशिषो बहूः। द
क्षिणामप्यलं दत्वा त्विम्मो गुरवे नृप। वादनं वस्त्रभूषाणामाचार्याय निवेदयेत्। दासदासीषु नृ
त्येषु ग्रामादिषु च सर्वशः। सर्वालंकारसंयुक्ते राजा वाहोपरि स्थितं। आरोहेश्वापि संयुक्तं राजानं वा
हसंस्थितं। मंत्री द्विपेद्रवैश्वे च ब्राह्मणैः स्वस्तिवाचनैः। सानंदैश्चैव नन्त्विग्भिर्वृद्धैर्मंत्रिवरैस्तथा।
आचार्यो राजन्नवनेन्रपं संवेशयेत्स्वयं॥ पूर्वस्नातावशिष्टेन कुंभतोयेन मंत्रवित्। गजशालां च
संप्रोक्ष्य अश्वशालां तथैव च॥ सिद्धार्थतंडुलतिलैः पुष्पैर्वाप्यवकीर्य च॥ शालामध्ये न्रसिंहं वासु राम
दर्शनमाताम यं॥ पूजयेद्गंधपुष्पाद्यैः सर्वालंकारसंयुतैः। सक्तुभिः कृशरान्नेन कुर्यात्तु तत बलिं बहिः॥ १५२
ततः शालासु सर्वासु ब्राह्मणान् भोजयेद्बलिं। ततः संवेशनं कुर्यादाचार्यो राजवाजिनां। एवं शांतिप्र

कुर्वीत निमित्ते सति तत्फुरुः। सपरिच्छदस्य नृपते मंत्रविन्मो समाहितः। सर्वकल्याणसंपूर्णः सर्वबा
धाविवर्जितः। सपुत्रो राजमंत्रिस्तु नृपसेन मद्दीयते॥ ॥ इति गजशांतिः॥ ॥ अथ महाशांतिः॥ ॥॥
श्रीकृष्ण उवाच॥ ॥ महाशांतिं प्रवक्ष्यामि महादेवेन भाषितां। पार्थिवानां हितार्थाय महादुःस्वरता
रिणी॥ नृपाभिषेके साकार्या यात्राकाले नृपस्य तु॥ दुःस्वप्ने दुर्निमित्ते च ग्रहवैगुण्यसंभवे विद्युदु
ल्कानिपाते च जन्मर्क्षे ग्रहभेदने। केतूदये च निर्घाते क्षितिकंपस्य संभवे। प्रसूतौ मूलगंडांते यम
लस्य च संभवे। छत्राणां च ध्वजानां च स्वस्थानात्पतनेषु वा। काकोलूककपोतानां प्रवेशे वेश्मन
स्तथा॥ क्रूरग्रहाणां चक्रेषु जन्मादिषु विशेषतः। जन्मनि द्वादशे चैव चतुर्थे वाष्टमे तथा॥ यदा सु
गुरुमंदाराः सूर्यश्चैव विशेषतः। मंदः शनिः आरो भौमः। युद्धे ग्रहाणां सर्वेषां सूर्यसूतानां शुकीलके॥
केत्वायुधगवाश्वेषु जन्मितेशायनासने। यद्याग्निः परिदह्येत राष्ट्रा विड्धनुस्तथा॥ विभ्रमन श्वनुलां

शा·म·
२४३

नेगेनार्तेष्वश्वतरासु च। रविबिंबद्वये दृष्टे महाशांतिः प्रशस्यते॥ सर्वाणि दुर्निमित्तानि प्रशमं यांति
सर्वथा॥ तां कुर्युर्ब्राह्मणाः पंचकुलशीलसमन्विताः। चतुर्वेदास्त्रिवेदाश्च वेदिदाश्चापि यांडवा। आ
र्यवर्णाविशेषेण बह्वृचाश्च सुसंयताः। शुचयः श्रुतसंपन्ना जपहोमपरायणाः। कृच्छ्रोपवासन
क्ताद्यैः कृतकायविशोधनाः। पूर्वमाराधमंत्रास्तु प्रारंभेश्च ततः क्रियाः। मंत्रान्वितियो ह्यप्रमाणान्॥
दशाधादशहस्तं वा मंडपं कारयेच्छुभं। तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तप्रमाणतः। आग्नेय्यां कारये
त्कुंडं हस्तमात्रं सुशोभनं। मेखलात्रयसंयुक्तं योन्या चापि समन्वितं। रवींदूपरागे धूमकेतूल्काय
तनेषु च। उत्पातेषु तथान्येषु निमित्तेषु च सर्वशः। सर्वारिष्टोपशमनी महाशांतिः प्रशस्यते। चा
रुचंदनमालेच तोरणालंकृते तथा॥ गोमयेनोपलिप्ते च मंडपे ते द्विजातयः। शुक्लांबरधराः स्नाताः
शुक्लमाल्यानुलेपनाः। कर्म कुर्युरितिशेषः। ततश्च पंचकलशांस्तस्यां वेद्यां विनिक्षिपेत्। आग्नेया

राम
२४३

दिक्षु कोणेषु पंचमं मध्यतस्तथा॥ अश्वत्थपत्रकृते पथे च तत्पल्लवधारणं॥ ब्रह्मकूर्चविधानेन पंचगव्यं
तु कारयेत्॥ ब्रह्मकूर्चविधानं गोमूत्रं ताम्रवर्णाया इत्यादिना ब्रह्मकूर्चप्रकरणोक्तं। औषधीः पं
च रत्नानि रोचनां चंदनं तथा। सिद्धार्थकान्कुशान्दूर्वांकुशान्व्रीहियवांस्तथा॥ अपामार्गफलवंतीन्यग्रो
धोदुंबरौ तथा॥ प्लक्षाश्वत्थकपित्थांश्च प्रियंगुं तपत्रं वा तु॥ हस्तिदंतं मृदं चैव कोणकुंभेषु विन्यसेत्॥
फलवती गंधप्रियंगुः प्रियंगुः कंगुः। पुण्यतीर्थोदकोपेते पंचगव्ये च मध्यमे॥ रूचं वा च मितोदे च वह्नि
कुंभाभिमंत्रणं। आशुः शिशानो नैरृत्यां यद्देवा वायुगोचरे। ईशावास्यं चतुर्थस्य कुंभस्याभिमंत्रणं॥
मध्यमे त्वथ जप्तव्या रूपाः शुंत्रे यजुर्नेवाः। गंधपुष्पाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः। फलैश्चंदनालिप्तैराद्यै
दीपकैः कुंभपूजनं॥ स्वस्तिवाचनकं चैव कारयेत्तदनंतरं। क्रमेणानेन शांतिकेऽग्निकार्यं प्रयोजयेत्॥
अनेन वह्निमौणेन अग्निं दूतमिहाग्निं च पूर्वमेव निधापयेत्॥ पूर्वकलशस्थापनात्॥ हिरण्यगर्भः

समितिब्रह्मासननियोजने॥ कयानसाप्रणीताश्वमंत्रेणविनियोजयेत्॥ हुत्वावास्तरणंवन्हेराज्यसंस्का
रमेवच॥ अथवासादयेदत्रद्रव्यंयस्यप्रयोजनं॥ ततःपुरुषसूक्तेनपायसःश्रपणंभवेत्॥ अग्निर्घायित्रा
संसिद्धंपायसंस्थापयेद्भुवि॥ अष्टादशप्रमाणेधानूदघादथशमीमयान्॥ पालाशीःसमिधःसप्तस
प्ततेइतिदापयेत्॥ आघारावाज्यभागौतुहुत्वापूर्वक्रमेणतु॥ जुहुयादाहुतीःसप्तजातवेदसइत्य
चा॥ स्थालीपाकस्यजुहुयीतुनवैजातवेदसे॥ तदन्तमंदीस्तूक्तेनेचतस्रोजुहुयात्ततः॥ यमायेति
सप्तान्यास्वाहांताजुहुयात्ततः॥ स्वाहांताइतियोज्यंसर्वत्र॥ इदंविष्णुस्ततःसप्तजुहुयादाहुतीर्न्रपो
नक्षत्रेस्यस्ततःस्वाहासप्तविंशतिराहुती॥ नक्षत्राहुतयश्चवक्षतिकाभ्यःस्वाहाइत्यादिभिर्मंत्रैःका १४४
र्याः॥ तत्ररोहिणीद्वयपुष्पहस्तादित्रयानुराधादित्रयेत्रिजिद्वयशततन्निषक्रूरेवतीश्चैकवचनं॥ पुन
र्वसुफल्गुनीद्वयविशाखाश्विनीषुद्विवचनंशेषेषुबहुवचनं॥ यत्कर्मणाविजुहुयात्ततःस्विष्ट

कृतंपुनः॥ ग्रहस्तोमस्ततःकार्यस्तिलैराज्यपरिप्लुतैः॥ अत्रतिलविधानंचेकस्मिकयवादिनिष्ट
त्र्यं॥ आयश्चित्रंततोहुत्वाहोमकर्मसमापयेत्॥ ततस्तुतर्पनिर्घोषैःकाहलाशंखनिस्वनैः॥
यजमानस्यकर्मणोद्यन्निषेकोद्विजोत्तमैः॥ कारमयंवृद्धसंस्तृतेसमेत्तद्वासनेस्थितं॥ काश्मर्यवृ
क्षःश्रीपर्णीभद्रासनं॥ विदीमध्यगतंहुत्वाचतुर्निमित्रप्रशांनये॥ पंचभिःकलशैःपूर्णैःपूर्णमंत्रैरतै
र्यथाक्रमं॥ सहस्राक्षेतिप्रथमंततश्चवशतायुषा॥ सजोषसाचंद्रइतिविश्वानिवेरुणेतिच॥ द्रु
पदादिवेतिचेततःस्नापयेयुःसमाहिताः॥ ततोदिशांबलिंदद्याद्विचित्रान्नसमाश्रितान्॥ नमो
स्तुसर्वरूपेभ्यइममंत्रमुदाहरेत्॥ स्नातस्यब्राह्मणाःसर्वेपठेयुःशांतिसूक्तमं॥ भूतिनोयेन
धारांचपातयित्वासमंततः॥ पुण्याहवाचनंकृत्वाशांतिकर्मसमापयेत्॥ नीर्षदेवालयेवापिगो
दोहंकारयेद्बुधः॥ क्षितिनिद्दिरण्यंवासांसिशयनान्यासनानिच॥ विप्रेभ्योदक्षिणांदद्याद्यथाशक्त्या॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

शां.म
२४५

विमन्त्रः॥ दीनानाथविप्रेभ्योदद्याच्चैवयुधिष्ठिर। भोजनंवातिलांदत्वाततःसर्वंप्रसिध्यति॥
आयुश्चबलमतेदीर्घंशत्रून्विजयतेक्षणात्॥ इति॥ दुर्गादिसिद्धान्तिपुत्रांश्चबलमतेशुभान् य
थाशास्त्रप्रकाराणांकवेचवारणंभवेत्॥ नष्टादेवोपघातानांशान्तिर्भवतिवारणं अदित्स
कस्यदानस्यधर्मार्जितधनस्यचोदयादाक्षिण्ययुक्तस्यसर्वसानुग्रहस्यपरः॥ अर्थान्नसमृद्ध
यतिवर्द्धयतेचधर्मकामप्रसाधयतितस्यविनश्यंतिपापाः॥ यःकारयेत्लोकलेदोषहरीमहार्थां
शांतिंप्रशांतहृदयःपुरुषःसदैव॥ इति॥ श्रीनीलकंठरचितःस्मृतिभास्कराख्योग्रंथोमयार
सखवर्षिकुसंमितेश्व॥ चैत्रेसितेरवितिथौरविपादपद्मप्रेमप्रकृतोविकसंतांजनतोपकृत्यैः॥
चेन्मादतःकृतिमयैरपिदुष्टभावैःकिंतेनभावनिपुणाःखलुसंतिसंतः॥ किंदग्धचंचुपुटका राम
कमुखदवकेनपक्वंरसालफलमुज्झितमेवसम्यक्॥॥ इतिश्रीमीमांसकभट्टशंकरात्मजभट्टनी २४५
लकंठकृतेभास्करेशांतिमयूखःसमाप्तिमगमत्॥ ॥लेखकपाठकयोःशुभंभवतु॥ ॥श्रीरस्तु॥श्री